CC-0. In Public Domain. Digitization by eGangotri

आ ८१

आ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. २०४६R.
२०३८

"वाचं धेनुमुपासीत"

त्रिभुवनविश्वविद्यालयसंस्कृतपरिषदः

सुरभिः

★

★★★

★

★ ★

★

★

त्रिभुवन-विश्वविद्यालयः

कीर्तिपुरम्

नेपालः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमः

आख्यातार्थविचारः	डा. हरिदेवमिश्रः
आर्यदर्शनसमन्वयः	प्रा. शेषराजशर्मा
उपनिषत्सु मानवजीवनादर्शः	प्रा. खेमराज उपाध्यायः 'केशवशरणः'
न्यायदर्शनस्य न्यायः	प्रा. रामेश्वरशर्मा पोखरेलः
मूलशब्दखोजनम्	प्रा. हरिप्रसादशर्मा आचार्यः
वैशेषिकदर्शनस्य वैशिष्टयम्	प्रा. लोकनाथो ढकालः
अभिलेखालयो नेपालस्थः	प्रा. जुननाथः पण्डितः
आर्यसंस्कृतिः	प्रा. रामचन्द्रः पौडेलः
भूमिसुधाराभियानमपि स्मृतिसम्मतमेव	प्रा. राधाकृष्णशर्मा अधिकारी
वैदिकवाङ्मयस्य संक्षिप्तः परिचयः	प्रा. ऋषिरामशर्मा पोखरेलः
आर्यानार्यशतकम्	स्व. पं. हरिनाथः प्याकुर्यालः
गुरुशिष्याणामादर्शः	प्रधानाचार्यो रामनाथ आचार्यः
निजजन्मभूमिः	प्रा. हरिनाथ उपाध्यायो ढुङ्गेलः
संस्कृताभिनन्दनम्	प्रा. जुननाथः पण्डितः
तमसो ज्योतिषि (नाटकम्)	प्रा. तोयनाथः पाण्डेयः
अरस्तूमहोदयस्य भरतमुनेश्च नाट्यविषयकविचारः	डा. जयमन्तो मिश्रः
महाकवेरश्वघोषस्य काव्येषु पात्राणामन्तर्द्वन्द्वानि	डा. सच्चिदानन्दश्चौधरी
मालतीमाधवे भवभूतिः	प्रा. चूडानाथो भट्टरायः
सुलोचनामहाकाव्यं परम्परायां नवीनः प्रयोगः	प्रा. अम्बिकाप्रसादोऽधिकारी
उपनिषद्को दर्शन यसै जीवनको दर्शन हो	प्रा. शिवराज आचार्यः
धर्ममा प्रमाण के ?	प्रा. दुर्गाप्रसादो दवाडी
न्यायदर्शनमा बुद्धि वा ज्ञान	प्रा. विद्यानाथ उपाध्यायः
शिव—शक्ति	प्रा. बाबुरामशर्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा.२०४६R. नं २६२६ वा० सं० म० वि०
R.
श्री ५ को सरकार पुरातात्विक संरक्षण सम्बन्धि...
सा.पु.

सुरभिः

(सङ्ग्रहः)

सम्पादकमण्डलम्–

डा. हरिदेवमिश्रः

प्रा. शेषराजशर्मा — डा. जयमन्तमिश्रः

प्रा. चूडानाथभट्टरायः — प्रा. रामेश्वरशर्मा पोखरेलः

प्रा. हरिप्रसादशर्मा आचार्यः — प्रा. राधाकृष्णशर्मा अधिकारी

प्रा. दुर्गाप्रसादो दवाडो — प्रा. ऋषिरामः पोखरेलः

प्रा. शिवराज आचार्यः

संयोजकः

सङ्ख्या १.

आचार्यसङ्घायस्य वार्षिकोत्सवावसरे
२०२६ संवत् सौरमार्गशीर्षमासे
प्रकाशितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूल्यम्–रूप्यकद्वयम् ।

सर्वविधः पत्रव्यवहारः

"सुरभि–सम्पादकमण्डलम्,

त्रिभुवन-विश्वविद्यालयः,
कीर्तिपुरम्,
काष्ठमण्डपः
नेपालः"
इति सङ्केतेन कार्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. २०४६ R.

सम्पादक-वक्तव्यम्

सत्यामपि त्रिभुवन-विश्वविद्यालयशोधपत्रिकायामस्माकं हिन्दुराष्ट्रस्य हिन्दुसंस्कृतेश्चाधार-भूतायाः संस्कृतभाषायास्तत्रत्यविद्यायाश्च सर्वेषु साधारणजनेषु प्रचाराय प्रसाराय च नेपाले तदनुकूल-पत्रिकाणां न्यूनतामनुभूय संस्कृत-समुन्नतये तत्प्रसङ्गेन राष्ट्रियभावनोद्दीपनाय चास्य सङ्ग्रहस्य प्रकाशनं पत्रिकान्तरैरगतार्थमिति विमर्शः समजनि ।

वस्तुतो विश्वविद्यालयः खलु आन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिरिति सङ्कायचतुष्टय-विभक्तानां सकलानां विद्यानामाकरः । तत्रापि सर्वातिशयमहिममहित-प्रथमोपात्तान्वीक्षिकी-सङ्कायान्यतमशाखान्तर्गत-स्वसंस्कृतिकलानां समुत्थापनं प्रमुखं कर्तव्यं विश्वविद्यालयस्येति विदितमेव सर्वेषां विपश्चिदपश्चिमानाम् । अतः आर्यसंस्कृति-सभ्यता-राष्ट्रियता-निबन्धनस्य संस्कृतस्य प्रसाराय विशिष्टंप्रयत्नं विधित्सुर्विश्वविद्यालयोऽस्य प्रकाशने समुत्पन्न-कुतूहलः ।

शिक्षैकदेशजुषां तथा संस्कृतेतरशिक्षायामेव विहितपरिश्रमाणामपि 'अनलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वद्, अचलानि भानि तद्वत्समपश्चिमगानि लङ्कायामिति' पञ्चमशताब्द्यामार्यभटेनोपदिष्टे भूभ्रमणज्ञानविषयकप्रमाणे जागृत्यपि त्रयोदशशताब्दयनन्तरलब्धजनिभ्यो भूभ्रमणज्ञानविषयं यशः समर्पयताम्, "आकृष्टिशक्तिश्च मही तया यत्खस्थं गुरु स्वाभिमुखं स्वशक्त्या, आकृष्यते तत्पततीव भाति समे समन्तात्क्व पतत्वियं खे" इति द्वादशशताब्द्यां भास्कररेणोपदिष्टस्य भूमेर्गुरुत्वाकर्षणविषयकस्यापि ज्ञानस्य सप्तदशशताब्द्यामुत्पन्नाय यशो दित्सूनां "संस्कृतवाङ्मये धर्मस्यैव वर्णनं विद्यते" इति दुष्परिहरा धारणा वरीवृतीति । तत्र धर्मपदेन च यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म इत्यादिपूर्वाचार्यपरिभाषितमबुध्यमाना हवन-गोदान-तिलकधारणादिक्रियामेव धर्मस्वरूपं मन्यन्ते ते । वस्तुतो धर्मस्वरूपं न हवनादिरूपं नापि संस्कृते धर्मस्यैव वर्णनम् । निदर्शनाय केवले महाभारतमात्रेऽपि राजनीतेरर्थशास्त्रस्य चिकित्साशास्त्रस्य वनस्पतिविज्ञानस्य भूगोलस्येतिहासस्याचारशास्त्रस्य मनोविज्ञानस्य किं बहु वक्तव्यं सर्वेषामेव विषयाणां सन्निवेशो वर्तते । अतएवेयं भतार्थवादा साटोपं गर्जना-यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिदिति । यद्येकमेव महाभारतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषामपि विषयाणामाकरस्तर्हि का कथा समगृस्य संस्कृतवाङ्मयस्य । अनुपासिता तु धेनुरपि प्रशस्तं पयो न ददातीति विदितमाबालगोपालम् । एतादृशस्य सर्वविषयसम्पन्नस्य संस्कृतवाङ्मयस्य सर्वतः सर्वथा सर्वदा समुन्नतिमुद्दिश्य प्रथमं दिग्दर्शनाय सङ्ग्रहस्यास्यावतारः ।

विश्वविद्यालयाधिकारिणां सौमनस्येनास्य सङ्ग्रहस्य प्रकाशनं समभूदिति ते धन्यवादार्हाः ।

अस्य सङ्ग्रहस्य प्रकाशनं विश्वविद्यालयस्य वार्षिकोत्सवावसरे भवत्विति केचिल्लेखास्त्वरयैव मुद्रिताः । तेनात्र मुद्रणे काश्चन त्रुटयश्च संवृत्ताः किन्तु समयस्याल्पीयस्त्वेन प्रकाशनन्तदा न समभूत् । अतो विलम्बेनागतानामपि केषाञ्चिल्लेखानां समावेशोऽत्र समभवदिति विलम्बस्यैको लाभोऽपि संवृत्तः । संस्कृतलेखमुद्रणायोपयुक्तयन्त्रालयस्यालाभादपि त्रुटयो बहुलीभूताः । पुनश्च दृष्टिदोषबाहुल्यमपि न स्यादिति वक्तुमक्षमैः क्षमां प्रार्थयमानैरेतदेव निवेद्यते—

'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।' इति ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डा. हरिदेवमिश्रः

आख्यातार्थविचारः

व्यक्तवागर्थकादाङ् पूर्वकाच्चक्षिङ्धातोर्बाहुलकात् करणे क्तप्रत्यये कृते सति 'आख्यायते अनेने' तिव्युत्पत्या निष्पन्नआख्यातशब्दः प्रकरणवशात् धातोः, तिङः, तिङन्तस्य च बोधको भवति। यथा 'नामान्याख्यातजानि' इति शाकटायनोक्तौ नामानि धातुजानीतितदर्थस्वीकारादाख्यातपदवाच्योधातुः, एवम्— 'यदितु 'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते, इति भर्तृहरिप्रतिपादितरीत्या प्राधान्येनधातूपात्तव्यापारवत्त्वरूपंकर्तृत्वं तवापि संमतं कस्तर्हीदानीमाख्यातार्थः? व्यापारस्य धातुनैवाभिहितत्वात्' इति भूवादिसूत्रस्थशब्दकौस्तुभे आख्यातपदेनतिङ्ग्रहणेनात्राख्यातपदवाच्यस्तिङ्प्रत्ययः, मयूरव्यंसकादिगणे "आख्यातमाख्यातेन क्रियासातत्ये" इति पठितसूत्रस्य 'पचतभृज्जता, खादतमोदता, इत्यादि तिङन्ते समासदर्शनेन आख्यातपदस्य तिङन्तमपिवाच्यम्। एवञ्चधातुःतिङ्प्रत्ययस्तिङन्तञ्चेति सर्वमाख्यातपदवाच्यतां लभते। तत्र सर्वेषां धातूनां फलं तदनुकूलोव्यापारश्चार्थ इति वैयाकरणसिद्धान्तः। 'द्वयर्थः पचिः' इति भूवादिसूत्रस्थभाष्योक्तेः, 'फलव्यापारयोर्धातुरितिदीक्षितोक्तेश्च। अत्रेदमप्यवधेयम् यत् फले व्यापारे च धातोः पृथक् शक्तिः न तु फलविशिष्टे व्यापारे, अत एव द्विवचनान्तनिर्देशः सङ्गच्छते, एकवृन्तगताम्रादिफलद्वयन्यायेनपृथगुपस्थितिप्रयोजिका खण्डश एकैत्रशक्तिरिति वा, विशिष्टशक्तिस्वीकारेविशेष्यविशेषणभावे विनिगमनाविरहेण व्यापारविशिष्टेफलेऽपि शक्तिस्वीकारस्यावश्यकतया धातोः शक्तिद्वयकल्पनासाम्येऽपि फलविशिष्टव्यापारत्वम्, व्यापारविशिष्टफलत्वञ्चेति गुरुधर्मद्वयस्यधातुपदशक्यतावच्छेदकत्वेऽतिगौरवापत्तेः। अपि च विशिष्टशक्त्युपस्थापितस्य फलस्य व्यापारस्य च पदार्थैकदेशतया 'देवदत्तः ग्रामं गच्छति' इत्यादौ गम्धात्वर्थे उत्तरदेशसंयोगरूपे फले ग्रामस्य, 'देवदत्तेन ग्रामो गम्यते' इत्यादौ व्यापारे च देवदत्तस्यानन्वयापत्तेः "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इतिन्यायात्। यत्र विशेषणान्वयश्चिकीर्षितस्तत्रेतरनिरूपितविशेषणत्वानापन्नत्वेनज्ञायमानत्वस्यनियम इत्यत्रैवोक्तन्यायस्य तात्पर्यम्। अत एव घटपदात् घटत्वविशिष्टविषयकशक्त्योपस्थापितघटत्वे नित्यत्वविशेषणाभिप्रायेण 'नित्योघटः' इति प्रयोगस्य प्रामाणिकत्वं न भवति। किन्तु तत्रैव पदार्थैकदेशे घटे नील इति विशेषणाभिप्रायेण 'नीलो घटः' इति प्रयोगस्तु प्रामाणिक एव घटस्येतराविशेषणत्वेनज्ञायमानत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवीनास्तु— धातूनां फलविशिष्टे व्यापारे, व्यापारविशिष्टे फले च शक्तिः, फले, व्यापारे च पृथक् शक्तिस्वीकारे उद्देश्यविधेयभावेनान्वयापत्तिस्तयोः स्यात्, विभिन्नशक्तिग्रहजन्यविभिन्नोपस्थितीयविषयतावतोरुद्देश्यविधेयभावेनान्वयो दृष्टः, यथा 'नीलो घटः' इत्यत्र नीलघटयोर्विभिन्न-शक्तिग्रहजन्यविभिन्नोपस्थितिविषययोरुद्देश्यविधेयभावेनान्वयबोधो जायते, तथा फल व्यापारयो-रित्यत्रापि उद्देश्यविधेयभावेनान्वयः स्यात ताडशबोधप्रयोजिकायाः पृथगुपस्थितेः विद्यमानत्वात्। विशिष्टशक्तिवादिनां मते तु न तादृशबोधापत्तिः तत्प्रयोजिकायाः पृथगुपस्थितेरभावादिति वदन्ति।

तत्र यद्यपि अन्यत्र यदुद्देश्येन धात्वर्थक्रियायाम् प्रवृत्तिस्तादृशस्यैव फलस्य ग्रहणम् यथा स्वर्गमुद्दिश्य यागे प्रवृत्तिरिति स्वर्ग एव यागस्य फलम्, तस्य च कर्तृगामित्वे "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति सूत्रेण 'स्वं यज्ञं यजमानः यजते, इत्यत्रात्मनेपदंसिद्ध्यति। हरिः।पि-यस्यार्थस्य प्रसिद्धयर्थमारभ्यन्तेपचादयः। तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम्॥ इति फलस्वरूपमुक्तम् तथापि तादृशफलस्य धात्वर्थत्वस्वीकारे किञ्चिदुद्दिश्यैव लोके क्रियायाम् प्रवृत्तिदर्शनेन धातूनां सकर्मकत्वाकर्मकत्वव्यवहारस्य दुर्ज्ञेयत्वापत्तेः, 'परोपकाराय वहन्ति नद्यः' इत्यादौ परोपकाररूपफलस्य व्यापारव्यधिकरणस्य विद्यमानतया वहनादिक्रि-याणामकर्मकाणामपि सकर्मकत्वापत्तेश्चेति प्रकृते पारिभाषिकमेव फलं गृह्यते, नतु पूर्वोक्तम्। तच्चात्र–कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वे च सति तद्धात्वर्थत्वम् इति 'देवदत्तः ग्रामं गच्छति, इत्यत्र गम् धात्वर्थहस्तपादादि-सञ्चारादिरूपव्यापारजन्यत्वे सति तादृशव्यापारनिष्ठविशेष्यतानिरूपितानुकूलत्वसम्बन्धाव-च्छिन्नप्रकारताश्रयत्वे च सति गम्धात्वर्थत्वम् उत्तरदेशसंयोगे वर्तते इति तत्र लक्षणसमन्वयः। अत्र लक्षणे जन्यत्वमारोपितानारोपितसाधारणम्, तेन 'अग्नेः माणवकं वारयति' इत्यत्र संयोगानुकूलव्यापाराभावानुकूलव्यापाररूपे धात्वर्थे संयोगानुकूलव्यापाराभावे फलत्वलक्षणसमन्वयः। कर्मप्रत्ययसमभिव्याहारे 'देवदत्तेन ग्रामो गम्यते' इत्यादौ उत्तरदेशसंयोगादेः नव्यमतेन विशेष्यतयाभानात् फलत्वं न स्यादिति लक्षणे कर्तृप्रत्ययसमभिव्याहार इत्युपात्तम्। विभाग-जन्यसंयोगरूपे पत्धात्वर्थे विभागस्यापि गम्यादिरूपधात्वर्थजन्यत्वेन फलत्वलक्षणातिव्याप्ति वारयितुम् लक्षणे तत्पदस्य निवेशः। तत्रैव संयोगे फलत्ववारणाय द्वितीयविशेषणम्, ततश्चो-क्तसंयोगस्य पत्धात्वर्थजन्यत्वेऽपि पत्धात्वर्थत्वेऽपि च पत्धात्वर्थनिष्ठविशेष्यतानिरूपित प्रकारताश्रयत्वाभावात् न फलत्वम्। एवञ्च पत्धात्वर्थविभागसंयोगयोः फलत्ववारणाय सत्यन्तं विशेषण द्वयम्। 'प्रयागात काशीं गच्छति चैत्रः' इत्यादौ गम्धात्वर्थजन्यतया विभागस्य फलत्ववारणाय तद्धात्वर्थत्वनिवेशः, तथाच उत्तरदेशसंयोगानुकूलव्यापारो गम्धात्वर्थः, विभागस्य च गम्धात्वर्थत्वाभावात् न फलत्वम्। इदञ्च नव्यमतेन लक्षणम्। प्राचीनमतेतु–तद्धात्वर्थ-जन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वमित्येव फललक्षणमवसेयम्।

व्यापारोऽपि धातुवाच्य एव, व्यापारत्वञ्च 'धात्वर्थफलजनकत्वे सति धातुवाच्यत्वम्' गच्छतीत्यादौ उत्तरदेशसंयोगरूपधात्वर्थफलजनकत्वात् धातुवाच्यत्वाच्च हस्तपादादिसञ्चा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लनादेः व्यापारत्वं सङ्गच्छते। उत्तरदेशसंयोगादेरपि धातुवाच्यतया व्यापारत्वलक्षणातिव्याप्तिरिति तद्वारणाय सत्यन्तं विशेषणम्. तावन्मात्रोक्तौ च 'काष्ठैः पचती' त्यादौ काष्ठादिनिष्ठप्रज्वलनादिक्रियायाः पच्धात्वर्थविक्लित्यात्मकफलस्य जनकतया व्यापारत्वापत्तौ काष्ठादिपदेभ्यस्तृतीयाद्यनापत्तिरिति धातुवाच्यत्वमिति विशेष्यदलम्. तथा च देवदत्तादिनिष्ठफूत्कारादेः धातुवाच्यत्वविवक्षायां काष्ठादिक्रियाया धातुवाच्यत्वाभावान्नोक्तदोषावकाशः, काष्ठादिक्रियाणाम् धातुवाच्यत्वविवक्षायान्तु तासामपि व्यापारत्वमिष्टमेव। अतएव काष्ठानि पचन्ती'-त्यादिप्रयोगाः सङ्गच्छन्ते।

बृहद्भूषणकारास्तु-'वस्तुतो धातुसंज्ञाविध्यनुरोधात् धातूनां क्रियावाचकत्वावश्यकत्वेऽपि फलवाचकत्वं नावश्यकम्, अतोऽस्त्यादौसत्तादिरेव क्रिया, अत एव पश्यति भवः स्वयमेव, दर्शयते भवः इत्यादौ निवृत्तप्रेषणेऽपि विषयतारूपफलस्यैव क्रियात्वं धात्वर्थत्वञ्चाभ्युपगतम्' इति मते अस्त्यादौ व्यापारस्थानीयस्य केवलसत्तादेरेवार्थस्य विद्यमानतया फलांशाभावात् प्रागुक्तलक्षणस्याव्याप्तिरिति तन्मते "पदान्तरसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकप्रतीतिविषयत्वम् व्यापारत्वम्" घटं करोतीत्यादौ करोतिपदसमभिव्याहारात् घटस्यापि साध्यत्वेन प्रतीतेर्घटे व्यापारत्वलक्षणस्यातिव्याप्तिरिति तद्वारणाय प्रतीतौ पदान्तरसमभिव्याहाराप्रयोज्येति विशेषणम्। तेन केवलात् घटपदात् सिद्धत्वेन रूपेण द्रव्यस्यैव बोधो भवतीति नोक्तदोषावकाशः। पचतीत्यादौ अधिश्रयणादारभ्य अधःश्रयणपर्यन्तक्रियासमूहस्य पदान्तरसमभिव्याहारमन्तराऽपि साध्यत्वेन प्रतीतेः लक्षणसमन्वयः। अत एव कौण्डभट्टेन 'व्यापारस्तु भावनाभिधसाध्यत्वेनाभिधीयमाना क्रिया' इति भूषणसारेऽभिहितम्। हरिरप्याह "यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥" एवञ्च क्रमिकावयवोत्पत्तिसाध्यसमूहात्मकं वस्त्वेव क्रियास्वरूपमिति फलति। यत्र तु आश्रयत्वादौ न क्रमिकावयवोत्पत्तिमान् व्यापारस्तत्र क्रमिकावयवोत्पत्तिमत्त्वस्यारोपो विधेयः। एवम् एकस्मिन् व्यापारेऽपि समूहगतक्रियात्वारोपं विधायाधिश्रयणकालेऽपि पचतीति प्रयोगः उपपद्यते, यथाह हरिः- "एकदेशे समूहे वा व्यापाराणां पचादयः। स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः॥" पतञ्जलिनाऽपि-'क्रिया नामेयमत्यन्तापरिदृष्टा, अशक्या पिण्डीभूता निदर्शयितुम् ······ यस्मिन् सन्निहिते पचतीत्येतद् भवति सा नूनं क्रिया' इति भूवादिसूत्रस्थभाष्येऽभिहितम्।

स चायं व्यापारो द्विविध-साध्यरूपः, सिद्धरूपश्च, तत्र 'क्रियान्तराकाङ्क्षानुत्थापकताऽवच्छेदकं सत् कारकान्वययोग्यताऽवच्छेदकरूपत्त्वम् साध्यत्वम्। यथा पचतीत्यादिप्रयोगे किम् पचति, कः पचति, केन पचति, कुत्र पचतीत्यादिरूपेण कारकाणामाकाङ्क्षायामपि क्रियान्तराकाङ्क्षाया अदर्शनेन तिङन्ते साध्यरूपा क्रियाऽभिधीयते। 'क्रियान्तराकाङ्क्षोत्थापकताऽवच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तरान्वयायोग्यत्वञ्च सिद्धत्वम्। यथा पाक इत्युक्तौ क्रियते, भवति, नश्यतीत्यादिरूपेण क्रियाणामाकाङ्क्षा जायत इति तत्र घञादिवाच्या क्रिया सिद्धा, किन्तु तत्रापि धातपस्थाप्या क्रिया साध्यरूपैव। उक्तञ्च दीक्षितेन —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ।।

अत एव धातूपस्थाप्यसाध्यरूपक्रियाविशेषणत्वेन ओदनस्य पाकः, काष्ठैः पाकः इत्यादौ कारकविभक्त्युत्पत्तिः, एवम् तत्रैवान्वयतात्पर्येण स्तोकं पाकः इति, घञ्-पस्थाप्यक्रियाविशेषणान्वयतात्पर्येण स्तोकः पाक इति प्रयोगद्वयस्य चोपपत्तिः ।

नचैवम् हिरुगित्याद्यव्ययानां तादृशसाध्यत्वेन रूपेण तत्तदर्थानुपस्थापकतया क्रियाप्रधानत्व व्यवहारस्य 'तद्धितश्चे"-ति सूत्रे भाष्ये क्रियमाणस्यानुपपत्तिरिति वाच्यम् हिरुगाद्यव्ययार्थानां क्रियामात्रे विशेषणतयाऽन्वयस्य जायमानत्वेन क्रियाप्रधानव्यवहारस्योपपत्तिसम्भवात् । अत एव हिरुगाद्यर्थे कारकाणां नान्वयो भवति, हिरुग् गत इत्यादौ हिरुगादीनां क्रियान्तराकाङ्क्षादर्शनात् ।

ननु धातुतः क्रियान्तराकाङ्क्षानुत्थापकताऽवच्छेदकरूपेणोपस्थितौ 'कृष्णं नमेच्चेत् सुखं यायात्' इत्यत्राकाङ्क्षाया अभावेन नमनसुखप्राप्तिरूपक्रिययोः हेतुहेतुमद्भावेनान्वयो न स्यादितिचेन्न चेच्छब्दसमभिव्याहारसाचिव्येन आकाङ्क्षोत्थापनसम्भवेऽपि तदसमभिव्याहारे आकाङ्क्षोत्थापनाभावेनादोषात् ।

नव्यास्तु-साध्यत्वं निष्पाद्यत्वमेव तेनैव रूपेण बोधस्यानुभवसिद्धत्वात् । पतञ्जलिनापि "सुट्कात्पूर्वः" इत्यत्र भाष्ये धातूपसर्गयोः कार्यमन्तरङ्गमित्याद्युक्त्वा 'नैतत् सारं पूर्वं हि धातुः साधनेन युज्यते पश्चादुपसर्गेण, साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि" इत्युक्तम् । साधनं तद्बोधकप्रत्ययः, क्रियां निर्वर्तयति = साध्यत्ववैशिष्ट्येन बोधयति. अतस्तत्प्रयुक्तं कार्यम् पूर्वम् इति तदर्थमाहुस्तद्व्याख्यातारः । एतद्भाष्यप्रामाण्येन पचादीनामर्थे साध्यत्वेन ज्ञाते तत्र साधनाकाङ्क्षाया अवश्यं भावित्वात् "साधनाकाङ्क्षोत्थापकतावच्छेदकधर्मत्त्वमेवसाध्यत्वम" स्युपेयम् । अत एव 'ओदनं भुक्त्वा व्रजती' त्यादौ भुजिक्रियायाम् ओदनमित्यादि कारकाणामन्वयो भवति, अन्यथा धातुसम्बन्धे विहितक्त्वाप्रत्ययसमभिव्याहारेण भुजिक्रियाया व्रजत्यादिक्रियाकाङ्क्षासत्त्वात् क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपसाध्यत्वेनाभानात् तत्रौदनमित्यादिकारकान्वयो न स्यात्, साध्यत्वेन प्रतीयमानक्रियायामेव कारकान्वयनियमात् ।

स चायं धातुवाच्यो व्यापारः फुत्कारत्वाधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण पच्यादिधातुशक्यः पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात् । अत एव पचतीत्यादितः फूत्कारत्वादितत्तद्विशेषरूपेण शाब्दबोधे जातेऽयं फूत्कारत्वादिमान्न वेति संशयो न जायते, सामान्यरूपेण बोधे तु एकतरकोटि-निश्चयाभावेन तादृशसंदेहापत्तिर्दुर्वारा ।

ननु अनुभवबलात् पचतीत्यादितः फुत्कारत्वादितत्तद्विशेषरूपकबोधस्वीकारे नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्वरूपस्य नानार्थत्वस्य विद्यमानतया हर्यादिशब्दवत् पच्यादेर्नानार्थत्वापत्तिरिति चेन्न तदादिन्यायेन बुद्धिविशेषविषयत्वोपलक्षित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फूत्कारत्वाद्यवच्छिन्ने पच्यादीनां शक्तिस्वीकारेण नानार्थत्वापत्तेरभावात् । तत्रेदं तात्पर्यम्तदादिशब्देभ्यो यद्यपि घटत्वादेतत्तद्विशेषधर्मपुरस्कारेण घटादयोऽनेकेऽर्थाः प्रतीयन्ते तथापि बुद्धिविशेषविषयत्वरूपैकानुगतधर्मोपलक्षितघटत्वादिनानाधर्मावच्छिन्नघटाद्योऽर्थाः तदादिशब्देभ्यः प्रतीयन्ते इत्यनुगतैकधर्मपुरस्कारेण नानाधर्मावच्छिन्नार्थप्रत्यायकतया न तेषां हर्यादिशब्दवन्नानार्थत्वसंभावना, अननुगतनानाधर्मावच्छिन्नशक्तिनिरूपकताऽवच्छेदकैकधर्मवत्त्वस्यैव नानार्थत्वाभ्युपगमात् । तदुक्तं बृहद्भूषणकारैः—बुद्धिविषयत्वरूपेणोपस्थितघटत्वादिशालिषु बुद्धिविषयतावच्छेदकवति शक्तं तदादिपदमित्येव तदादेः शक्तिग्रहः । बुद्धिविषयत्वमुपस्थितावनुगमकमात्रं न तु तदंशे शक्तिः" तद्वत् प्रकृतेऽपि शक्यताऽवच्छेदकानां फूत्कारत्वादीनामनुगमकस्य बुद्धिविशेषविषयत्वादेः सत्त्वेन तादृशोपलक्षणीभूतेन बुद्धिविशेषविषयत्वरूपेण फूत्कारत्वादीननुगमय्य तदवच्छिन्ने पच्यादीनां शक्ति स्वीकरणसंभवान्न नानार्थत्वापत्तिः, शक्यतावच्छेदकस्य नानात्वेऽपि शक्यतावच्छेदकतावच्छेदकस्यैकस्यैव संभवात् ।

कर्तृकर्मसंख्याकाला इति चत्वारोऽर्थास्तिङः, तत्र 'कृत्रिमाकृत्रिम' न्यायेन फलाश्रयव्यापाराश्रययोरेव कर्मकर्तृपदाभ्यां ग्रहणम्, न तु लौकिकयोः स्पन्दनकृतिमतोः "स्वतन्त्रः कर्ता" इतिसूत्रेण प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयस्यैव स्वतन्त्रस्य कर्तृसंज्ञाविधानात् । कृतिमतः एवं कर्तृसंज्ञाविधाने 'घटो भवति, काष्ठैः पचती'त्यादौ घटादेः कर्तृसंज्ञाद्यनापत्तेः ।

तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तदंशे तिङः शक्तिः किन्त्वाश्रयमात्रे, एतदेवाभिप्रेत्य "आश्रये तु तिङः स्मृताः' इति दीक्षितेनोक्तम् ।

ननु तिङः आश्रये शक्तिस्वीकारे आश्रयत्वम् तिङ्पदशक्यताऽवच्छेदकमभ्युपेयम्, आश्रयत्वञ्चाधारत्वम्, तच्च निरूपकादिभेदात् भिन्नम्, तथा चाश्रयत्वस्य नानात्वेन शक्तेर्नानात्वापत्तिरिति चेन्न आश्रयतात्वेनानुगतस्याश्रयत्वस्य अखण्डोपाधिधर्मात्मकस्यवा तस्य तिङ्पदशक्यताऽवच्छेदकत्वे शक्तिनानात्वादिदोषानवकाशात् ।

नच कर्तृकर्मणोस्तिङ्पदवाच्यत्वे प्रमाणाभाव इति वाच्यम् "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रेण तिबादिनिष्ठामर्थबोधकतारूपां शक्तिं शास्त्रीयप्रक्रियानिर्वाहाय तत्स्थानित्वेन कल्पिते लकारे आरोप्य कर्तरि कर्मणि च विधानस्यैव मानत्वात् । तिङां कर्तृकर्मवाचकत्वादेव "युष्मद्युपपदे समानाधिकारणे स्थानिन्यपि मध्यमः" इत्यादिसूत्रैः समानाधिकरणे युष्मद्युपपदे पुरुषव्यवस्था विधीयते, सामानाधिकरण्यञ्चात्रतिङ्वाच्यकारकवाचकत्वरूपं सङ्गच्छते, अन्यथोक्तसामानाधिकरण्याभावेन पुरुषव्यवस्थाऽनापत्तेः ।

नच "लः कर्मणी"ति सूत्रे कर्तृकर्मपदे लाघवानुरोधात् कर्तृत्वकर्मत्वरूपधर्मार्थके धर्मिपरत्वे तु कृतिविशिष्टे कर्तरि, फलविशिष्टे कर्मणि च तिङः शक्तिः कल्प्या, तथा च अनन्तानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलानां कृतीनाञ्च तिङादशक्यताऽवच्छेदकत्वमभ्युपेयमिति गौरवम्, कृतेः तिङ्पदशक्यत्वे तु कृतित्वस्य जातिरूपतयैकत्वात् शक्यताऽवच्छेदकत्वे लाघवमितिवाच्यम् फलव्यापारयोश्च धातुनैव-प्रतिपादनात् "अनन्यलभ्यः शब्दार्थः" इति न्यायेन पुनस्तत्र लकाराणां शक्तिकल्पनायोगात्।

तत्राधाराधेयभावसम्बन्धेन तिङर्थकर्तृकर्मणी क्रमेणधात्वर्थव्यापारे फले च विशेषणे। संख्या तु कर्तृप्रत्ययसमभिव्याहारे कर्तरि, कर्मप्रत्ययसमभिव्याहारे तु कर्मणि विशेषणतयाऽन्वेति, समान-प्रत्ययोपात्तत्वात्, तथा च आख्यातार्थसंख्याप्रकारकबोधम्प्रति विशेष्यतासम्बन्धेन आख्यातजन्य-कर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावोऽत्र फलति। कालस्तुधात्वर्थव्यापारेऽन्वेति, तत्र मानं तु "वर्तमाने लडि" ति सूत्रस्य धात्वधिकारीयत्वेन तत्रानुवृत्तंधातोरितिपदं फलव्यापारा-त्मकं धात्वर्थमुपस्थापयद धातुजन्यबोधे प्राधान्येन व्यापारमेवोपस्थापयतीति तत्रैव "गुणानाञ्च परार्थत्वादि" तिन्यायेन कालान्वयस्यौचित्यात्। तथा चाह हरिः "क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका" इति।

न च तिङर्थसंख्यायाः समानप्रत्ययोपात्तत्वेन यथा कर्तृकर्मणोरन्वयस्तद्युक्त्यैव कालस्यापि तत्रैवान्वयोऽस्त्विति वाच्यम् पाकं समाप्य यदा कर्ता विश्राम्यति तदापि पचतीति प्रयोगापत्तेः, अपाक्षीदितिप्रयोगस्यानापत्तेश्च कर्तुस्तदानीं विद्यमानत्वात्, एवमेव पकानारम्भदशायां कर्तुः वर्तमानतया पक्ष्यतीत्यनापत्तेश्च। नापि धात्वर्थफले कालान्वयः कर्तुं शक्यते व्यापारसत्त्वेऽपि फलानुत्पाददशायांपचतीतिव्यवहारस्य सर्वानुभवसिद्धस्यानापत्तेः। एवमेव कर्मणि न कालान्वय-स्तथा सति व्यापारविगमेऽपि ओदनादिकर्मणो विद्यमानदशायां पचतीति प्रयोगापत्तेः।

एवञ्च 'चैत्रः ग्रामं गच्छती' त्यतः ग्रामाभिन्नकर्मनिष्ठसंयोगानुकूलःसमवायसम्बन्धावच्छिन्नै-कत्वावच्छिन्नचैत्राभिन्नाश्रयको वर्तमानकालिको व्यापार इति, चैत्रेण ग्रामो गम्यते' इत्यतश्च चैत्रा-श्रयको वर्तमानकालिकः समवायसम्बन्धावच्छिन्नैकत्वावच्छिन्नग्रामरूपकर्मनिष्ठसंयोगानुकूलो व्यापार इति चोभयत्र व्यापार मुख्यविशेष्यकः एव शाब्दबोधो भवतीति प्राचीनवैयाकरणानां मतम्। नव्यास्तु कर्तृप्रत्ययसमभिव्याहारे व्यापारविशेष्यकः कर्मप्रत्ययसमभिव्यापारे च फलमुख्यविशेष्यकः शाब्दबोधो भवतीति मन्यन्ते। न च कर्मप्रत्ययस्थले फलमुख्यविशेष्यकशाब्दबोधाङ्गीकारे 'क्रिया-प्रधानमाख्यातमि' ति यास्कवचनविरोधः, तत्र क्रियाया अप्राधान्यादितिवाच्यम् तत्रस्थक्रियापदस्य करणव्युत्पत्त्या व्यापारः, कर्मव्युत्पत्त्या फलमित्यर्थद्वयकरणेनोक्तदोषानवकाशात्। एवमर्थकरणे च "सुप आत्मनः क्यच्" इति सूत्रस्थं भाष्यमप्यनुकूलम्-तथाहि आत्मनः पुत्रमिच्छतीत्यत्रेव 'इष्टः पुत्रः, इष्यते पुत्र इत्य दावपि क्यच् कथंनेत्याशङ्क्य भिन्नार्थत्वादिति समाहितम्। उभयत्राख्याते व्यापार-मुख्यविशेष्यकबोधे तु समानार्थकत्वस्य विद्यमानतया भिन्नार्थत्वकथनस्यासङ्गत्यापत्तेः। नव्यमते तु एकत्र व्यापारो विशेष्यः, अपरत्र फलं विशेष्यम् इति भिन्नार्थत्वं स्पष्टमेव। एवञ्च नव्यवैयाकर-णमते 'चैत्रेण ग्रामो गम्यते' इति कर्मणिप्रयोगे चैत्रकर्तृकवर्तमानकालिकव्यापारजन्यः समवाय-सम्बन्धावच्छिन्नैकत्वावच्छिन्नग्रामाभिन्नकर्मनिष्ठः संयोगः, इति शाब्दबोध इति संक्षेपः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. शेषराजशर्मा

आर्यदर्शनसमन्वयः

नैतत्तिरोहितं सचेतसां चेतसि तत्त्वज्ञानाऽपवर्गसंपादने समेषामप्यार्यदर्शनामन्योन्यसाहाय्य-सम्पादनेनाऽविसंवादित्वम् । यद्यपि कण्ठरवेण सर्वैरपिदर्शनैर्नाऽभ्यधायि परं गूढाऽभिप्रायरूपेण तैरूरीकृत एषोऽर्थोऽत्यधस्तनीभिः कतिपयपङ्क्तिभिः संसाध्यते ।

तथाहि त्वंपदवाच्येन जीवेनाऽधिष्ठितशरीरस्य तत्त्वज्ञानौपयिकतां सम्पादयितुं लोक आयतेन लोकायतदर्शनेन प्रत्यक्षमेवैकंमानमभ्युपगतम् । ततश्च प्रत्यक्षप्रमाणमाश्रित्येन्द्रियगोचरस्य शरीर-स्यैव दार्ढ्यमापादनीयमिति यस्तस्य सिद्धान्तस्तत्र शरीररक्षणे न कस्याऽपि विप्रतिपत्तिः । "शरीरमाद्यं खलु धर्मसाधनम्" इत्यादौ समेषामैकमत्यमेव । अथाऽपरमवशिष्टं तदनुशिष्ट-मनुमानशब्दप्रमाणयोः परमेश्वरस्य च प्रमेयस्यखण्डनं न तत्र तस्य मुख्यतया तात्पर्यम् । यतो हि जानन्त्येव सर्वे "न हि निन्द्यं निन्दितुं निन्दा प्रवर्तते, अपितु विधेयं स्तोतुम् " इति नयेन चार्वाकदर्शनस्य पूर्वोक्तविषयखण्डने न मुख्यं तात्पर्यं प्रत्युत विधेयस्यात्माऽधिष्ठितशरीरस्य रक्षण एव । एवं च तत्राऽनुमानप्रामाण्यस्याऽनभ्युपगमे देहएव रागाऽतिशयरूषां कर्तृत्वभोक्तृत्वरूपां चाऽनुपपत्तिमनुभूय जीवान् वैराग्यभूमिकायामवतारयितुं बुद्धदर्शनस्य प्रबोधः ।

ननु नैरात्म्यवादसमर्थकस्येश्वरसत्ताखण्डकस्य च बुद्धदर्शनस्य कथङ्कारं वैराग्यभूमिकाऽवतारणे तात्पर्यमवसीयत इतिचेन्न । भगवता सुगतदेवेन नैरात्म्यवादं मण्डयितुमीश्वरवादं च खण्डयितुं न कोऽपि ग्रन्थः प्रणीतः । व्याख्यानाऽवसरे च कुत्राऽपि कण्ठरवेण न पूर्वोक्तवादः समर्थितः, प्रत्युत शिष्यकर्तृके जीवेश्वरविषयकेऽनुयोगे तथागतेन मौनमेवाऽवलम्बितम् । इत्थङ्कारं तदीयं मौनं "परमतमप्रतिषिद्धमनुमतं भवति" इति नयेन पूर्वोक्तविषये विरोधाऽभावं प्रत्याययति । ततश्च "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्" इति पुरातनी विचारसरणिरपि बुद्धदेवेन लोकेषु प्रबोधिता । अत्र विषये बहुवक्तव्यत्वेऽपि साम्प्रतं विस्तरभियैतावतैव विरम्यते ।

इत्थं च भगवता समन्तभद्रेण भद्रोद्भाविकायां वैराग्यभूमिकायामुद्भावितायामपि कालक्रमेण तच्छिष्याणां मतिभेदेनात्मनः कर्तृत्वे भोक्तृत्वे च लुप्तप्राये सति तत्स्थापनाऽर्थं न्यायदर्शनस्याऽव तारः सचेतसां चेतसि स्थितिमलभत ।

एवं च त्वंपदवाच्यस्याऽऽत्मनः कर्तृत्वे भोक्तृत्वे च समर्थितेऽपि "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते" इति नयेन ज्ञानौपयिकानि कर्माण्यनुष्ठापयितुं सहस्राऽधिकरणी जैमिनीया मीमांसा कृतिनां प्रवृत्तिपथे प्रावर्तत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थं कर्मवादे प्रवृत्तेऽपि तत्रैवाऽर्थवादवाक्यश्रवणजनितव्यामोहेन समापतितामत्यासक्तिं निराकर्तुमात्मनि कर्तृत्वं प्रत्याख्यातुं विवेकख्यातिरूपां ज्ञानसरणिं च प्रवर्तयितुं सांख्यं नाम दर्शनं संख्यावतामग्रे विचारसंख्ये समुद्यतम् ।

इत्थङ्कारं त्वंपदवाच्य आत्मनि भोक्तृत्वाऽवच्छिन्ने विलसिते तत्पदवाच्यस्येश्वरस्योपासनां संसाधयितुं वासनाकलुषितं चित्तं मार्जयितुं यौगिकविभूत्युत्कर्षतो लौकिकभूतिप्रवणत्वं पुरुषस्य निवारयितुं च पातञ्जलं योगशास्त्रं प्रादुर्बभूव । ततश्च त्वंवाच्यस्यात्मतत्त्वस्य सांख्यसिद्धान्ततः कर्तृत्वे निवारितेऽपिभोक्तृत्वस्य व्यामोहमपसारयितुं तत्त्वंपदवाच्ययोर्ब्रह्मजीवयोर्मायाशक्त्यावरणविक्षेपजनितां भेदबुद्धिं च दूरीकर्तुं सर्वदर्शनशिरोमणिर्वेदान्तदर्शनं प्रावर्तिष्ट ।

पूर्वोक्तदिशा सारग्राहिणां विदुषांचेतस्येतदुपारूढं भवति यदापाततो दर्शनानां मिथो वैमत्ये दृश्यमानेऽपि परमार्थतस्तत्तद्विषयेषु परस्परमुपकार्योपकारकभाव एव वरीवर्तीति निश्चप्रचम् ।

एवं च विचारदृष्ट्या दर्शनानां मिथो विरोधे परिहृतेऽप्याचारदृष्ट्या विरोधाऽतिशयो गोचरीभवति । भारते वर्षे ब्राह्मणश्रमणानां विद्वेषः परां काष्ठामध्यारुरोह । तेषां मिथो मुहुर्मुहुः प्रकर्षनिकर्षयोः सतोरप्यन्ततो बौद्धानां दर्शनं धर्मश्च परित्यज्य भारतं चीन-जापान-स्यामवर्मप्रभृतीनि देशान्तराणि संश्रितवन्ताविति विदन्त्येव दर्शनेतिहासनिष्णाता विपश्चितः ।

देशान्तरेष्वेतादृशे व्यतिकरे दृश्यमानेऽपि विश्वस्यैकमात्रे हिन्दुराष्ट्रे श्री ५ महेन्द्रपरिपालिते सूर्यचन्द्रध्वजविलसितेऽस्मदीये नेपाले पुरातनसमयादेव वैदिकानां बौद्धानां च न केवलं विरोधाऽभावः प्रत्युत समन्वयवादस्य संसेवनेनाऽनिर्वचनीयं भ्रातृत्व व दरीदृश्यते । अत्रत्या जना यथा भगवति पशुपतिनाथे तथैव स्वयम्भूनाथेऽपि भक्तेः परां काष्ठां बिभ्रति । विषयोऽयं समेषां सचेतसां मतिपथे विलसत्येवेत्यतोऽहं नाऽऽम्रेडितेनात्मानं कदर्थयामि।

एवं च मञ्जुश्रियं भगवतीं तारां नामोदरां देवीमुभयेऽपि वैदिकबौद्धाः समानरूपेणोपासते । अतोनिःसङ्कोचं वक्तुं पार्यते यन्मिथो विरोधेन व्यथिता देशान्तरस्था जना नेपालदर्शनतः समन्वयवादस्य परां काष्ठां परिशीलयन्तु परस्परविद्वेषं च परिहृत्य भ्रातृभावेन विलसन्तु सन्ततमिति ।

अन्ते च राष्ट्रप्रशस्तिमुद्घोष्य स्वीयं वक्तव्यमुपसंहरामि—

अनादेश्च कालाच्छ्रुतो यः स्वतन्त्रः समुत्तुङ्गशृङ्गैः सदाऽप्रधर्षणीयः ।
अनन्तानि रत्नानि सन्तीह नित्यं ततः शोभमानोऽस्ति नेपालदेशः ।१।
कलिङ्गाऽङ्गबङ्गान्ध्रमद्रादिदेशाः अनेके मता भारते निर्विशेषा ।
परं धर्मसापेक्षतामञ्जुवेशो महेन्द्राऽनुशिष्टोऽस्ति नेपालदेशः ।२।
जना अत्र भव्याऽन्विता धर्मनिष्ठा विरोधं विना सन्नयेन प्रकृष्टाः ।
इहैव ध्वजश्चन्द्रसूर्याऽङ्ककान्तो भुवि ख्यातनामाऽस्ति नेपालदेशः ।३।
सदार्यैर्मता संस्कृतिर्नः सुरूपा प्रकृत्या च नानाविधा कान्तिरत्र ।
विपन्नाश्च यत्राश्रयं प्राप्नुवन्ति विराजत्यजस्रं स नेपालदेशः ।४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा० खेमराज उपाध्याय: 'केशवशरण:'

उपनिषत्सु मानवजीवनादर्शः

अस्माकं नेपालवासिनां कृतेऽयं परमप्रमोदविषयो यदस्मिन्नेव नेपालदेशे जनकपुरे विभिन्नाना-मुपनिषत्संबद्धानामाध्यात्मिकप्रसङ्गानां चर्चा नैरन्तर्येण प्रचलति स्म। उपनिषद्विद्यायाः आधार-स्तम्भायितः कर्मयोगपथस्य परमादर्शभूतो राजर्षिर्जनकोऽनन्तमहिममण्डितेन स्वजन्मनेममेव आर्यावर्तमुकुटायितं हिमवत्खण्डहृदयीभूतं नेपालं समलञ्चकार। इत्थं सर्वदर्शनशिरोमणे औपनि-षददर्शनस्य प्रवर्तनं प्रवहणञ्च अस्मादेव हिमवत्खण्डात् समजनि येन शिवशक्त्योरखण्डधामभूतस्य शान्तिसम्राज्याः सनातनकुटीरायितस्य अस्य हिमवत्खण्डस्य समस्ता संस्कृतिः सर्वात्मना औ।निषदं वर्त्म अनुसरन्ती गिरिराजप्रवाहिणीनां नदीनामिव अविरलं प्रवाहं बिभ्रती अद्यापि भुवनं विभूषयति। औपनिषददर्शनसारभूतस्य विश्वात्मवादस्य अस्यां नेपालीयायां संस्कृतौ व्यापकः प्रभाव एव न विद्यते प्रत्युत इयं सर्वात्मना विश्वात्मवादेनैव शश्वन्निति। 'यथानद्यः स्यन्दमानाः समुद्र अस्तं गच्छन्ति नामरूपे विहाय' इत्युक्तदिशा सर्वोऽपि मानवसमाजः विभिन्नैः पथिभिः एकमेव परमानन्दरूपं ब्रह्म अनुसन्दधाति इत्येष औपनिषदः सार्वभौम उद्घोषः। इममेव सुदृढं विश्वात्मवादपथमनुयान्ती नेपलीया संस्कृतिः सनातनहिन्दुधर्मानतिरिक्तत्वेन बौद्धधर्ममपि अङ्गी कुरुते इत्यत्र नास्ति किमपि आश्चर्यस्थानम्। नैतावदेव अपितु भगवान् बुद्धः औपनिषदप-थस्यैव व्याख्यातृरूपेण 'मा हिंस्यात् सर्वा भूतानि' इत्येतस्य वैदिकोद्घोषस्य व्यवहारविषयी करणाय अवतीर्ण इति अस्माकं नेपालीयानां विद्यते सांस्कृतिको विचारः। अत एव यथा अ-स्माकं दैनन्दिनसंकल्पे'बौद्धावतारे' इति समुच्चारणपरिपाटी अनवच्छिन्नं 'प्रचलति यथा पुराणे भगवतः बुद्धस्य नवमावतारत्वं प्रतिपाद्यते तथैव व्यवहारेऽप्यभिन्नभावः यदिक्वचिदास्ते तर्हि तत्र अस्माकं नेपालः प्राथम्यमेव बिभर्ति। निगमकल्पतरोर्गलितफलरूपस्य श्रीमद्भागवतस्य 'देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः। लोकान् घ्नतां मति विमोहमतिप्रलोभं वेषं विधाय बहुभाष्यत औपधर्म्यम्' इत्येतद् वचनमपि तु बौद्धधर्मम् सनातनधर्मा-भिन्नमेव समर्थयते। अतः उपनिषन्निर्णीतः पुराणप्रथितश्च पन्थाः एव अस्माकं जीवनादर्शः संस्कृतिसारश्च आस्ते इति नात्र विवाद आस्ताम्। इदानीं प्रकृतमनुसरता मया औपनिषदेन पथा मानवजीवनादर्शः संक्षेपेण निवेदयिष्यते। प्रथमं तावदस्माभिरिदं स्मर-णीयं यत् ण्यर्थस्य गर्भीकरणद्वारा परब्रह्मण 'उप-समीपे निषीदति निषादयति इति वा 'उप-निषद्' इत्येवंरीत्या स्वयमपि परब्रह्मणःसमीपवर्तिनी अनुसन्धित्सूंश्च परब्रह्मणः समीपं नयन्ती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या पारमार्थिकी विद्या आस्ते सैव उपनिषच्छब्दव्यवहार्या भवति अतः ब्रह्मसाक्षात्कारकारिणी विद्या उपनिषद् इति पर्यवसन्नम् ।

तस्याश्च विद्यायाः 'विद्ययाऽमृतमश्नुते' इत्युक्तदिशः अमृतत्वसम्पादनमेव परमं फलमित्यत्र नास्ति विप्रतिपत्तिः । मृत्यो र्मा अमृतं गमय,—इति वचनानुसारेण नश्वरस्य जगद्-वैभवस्य अर्जनेन आत्मनिष्ठममृतत्वं न अपगम्यताम् इत्येष औपनिषदो जीवनादर्शः । अस्मिन् प्रसङ्गे यदि किं नाम जीवनम् ? इत्यपि विविच्येत तद् वरमेव स्यादिति तर्कयामि । उपनिषद्दृष्ट्या तदेव जीवनं याथार्थ्येन जीवनं भवति यत् खलु विविधानां माङ्गलिककर्मणा-मखण्डस्रोतःस्वरूपेण विराजेत । स एव जिजीविषाधिकारी भवति यः लोककल्याणकारीणि कर्माणि कुर्वन्नेव स्वीयमायुः क्षपयति । तदुच्यते–'कुर्वन्नेवेह कर्माणि जिजीविषेत्'-इति तत्रैव च मानवजीवनस्य विशेषादर्शः प्रस्तूयते–'न कर्म लिप्यते' नरे'–इति । अनेन इदं साधयितुं प्रभवामः यत् स एव वस्तुतः मानवो भवति यत्कृतानि कर्माणि कर्तुरात्मनि न लिप्येरन् कर्मवासनानां स्थाने निःस्वार्थसेवामूलः सकलबन्धनतिमिरं निरस्यन् भास्वान् मोक्षप्रकाशः विद्योतेत । त्रासनात्मकस्य मोहमयस्य मिथ्याकर्तृ–त्वाभिमानरूपस्य कर्मलेपस्य स्पर्श एव न स्यात् । अहो गरीयस्त्वमस्य जीवनदर्शनस्य । एतदनुसारेण तदेव यथार्थतः कर्म भवति यस्य संस्कारः बन्धनोन्मूलकः स्यात् । एतादृशेनैव कर्मणा मानवः अमृतत्वं साधयितुं समर्थो भवति । अन्यथा मिथ्याकर्तृत्वारोपरूपेण मोहेन क्रियमाणं कर्म अमृतत्वरूपस्य मोक्षस्य स्थाने महति कर्मबन्धे पातयति । कर्मबन्धनिरासश्च–'यस्तु सर्वाणि भूतानि आत्मन्येवानु-पश्यति–'इत्युक्तदिशा विश्वात्मभावनाप्रेरितेन अनासक्तिमहितेन मनसा सेवामात्रैकलक्ष्यतया क्रियमाणेन कर्मणैव सम्भवति इति प्रागेव निरदेशि । अतः सिद्धान्तरूपेण जीवनसबन्ध एत-न्निगदितुं पार्यते यत् उपनिषद्दर्शनानुसारेण केवलं भावे विहितं ल्युट्प्रत्ययमुररीकृत्य श्वसनं प्राणनमात्रं वा न जीवनम् अपितु 'जीवयति अन्यान् अनेन इतिव्युत्पत्तिद्वारा लोककल्या–णैकप्रयोजनसाधकमितरेषां जीवनसहायकञ्च जीवनमेव परमार्थतः जीवनं भवति । अतः स्वयं जीवित्वा इतरानपि जीवय' इत्येष जीवनादर्शः प्रतिफलति ।

अन्यच्च उपनिषत्प्रतिपादितेन पथा मानवजीवनस्य साफल्यं साध्यसाधनविवेकोपरि निर्भरी-भवति । इहेदं विवेचनीयम् भवति यत्, मानवः 'जीवितुं भुङ्क्ते उत वा भोक्तुं जीवति ? यदि भोक्तुं जीवति तर्हि भोगा साध्यकोटौ पतन्ति जीवनं साधनतां प्रतिपद्यते । एतदनुसारेण जीवनस्य फलम्–'येन केनाप्युपायेन भोगं संसाधयेन्नरः' इति निष्कर्षः समायाति । ततश्च सदाचारः कदाचारो वास्तु भोगे समुपलब्धे सर्वं सिद्धमिति एष प्रत्ययो भवति । इत्थं यदि भोग एव साध्यभूतः जीवनन्तु साधनकोटौ पतितं तर्हि पाशवाज्जीवनान्मानवजीवनस्य नास्ति किमपि वैशिष्ट्यम् । यदि तु मानवो जीवितुं भुङ्क्ते तर्हि जीवनं साध्यम् भोग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातञ्च साधनकोटौ समायाति । इत्यञ्च यदा जीवनं साध्यकोटौ समायातं तदा इदं निश्चप्रचं सिध्यति–जीवनस्य कोऽपि गरीयानर्थः भवेत्, जीवनस्य परिष्कारः विकासो वा परमावश्यकः स्यात् । एतदर्थे च सदाचार एव अनुष्ठीयेत कदाचारः हीयेत इति एतत् अनिवार्यम् भवति । तर्हि कस्तावदसौ जीवनस्य गरीयानर्थः ? यस्योपलब्धये सदाचारस्य मर्यादापथस्य चावश्यकता भवति इति चेत् वयं वक्तुं पारयामः— 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियम् भवति' इति नयेन सकलजीवजगत्प्रवृत्तेः केन्द्रबिन्दुभूतस्य आत्मनः साक्षात्कार एव जीवनस्य गरीयानर्थः । अतः यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवति' इत्युपनिषद्वचनानुरोधेन आत्मज्ञानमेव जीवनस्य चरमं साध्यम् अन्यत् सर्वमपि साधनमिति सिद्धान्तयितुं शक्यते । आत्मज्ञानस्य सर्वातिशायिना महसा यदा सर्वमपि कामनाजातं शान्तिमेष्यति तदैव मानवो भौतिकदृष्टचा मर्त्यधर्मा सन्नपि अमृतत्वं भजत इति सडिण्डिमघोषं गर्जति कठोपनिषद्—

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिस्थिता ।

अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते' इति । एतदेव अधिकृत्य मानवजीवनस्य इतरजीवनातिशायित्वं सकलशास्त्रप्रतिपादितं समुपपन्नं भवति । अतएवोक्तं श्रीमद्भागवते—

'सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या,
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान् ।
तैस्तैरतुष्टहृदयः पुरुषं विधाय,
ब्रह्मावलोकधिषणं मुदमाप देवः । इति ।

एषा ब्रह्मावलोकधिषणा एव मानवममरीकरोति । एषैव क्वचिच्चिच्छक्तिशब्देन क्वचिच्चचेतनाशब्देन शास्त्रेषु चर्च्यते । एतस्या एव प्रभावेण मानवः जीवनस्य साध्यं साधनञ्च विविनक्ति । 'नकर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इत्युपनिषद्वाक्यमनुसृत्य धनं बलं विद्या बुद्धिरित्यादिशरीरपर्यन्तं कृत्स्नमपि वस्तुजातं साधनं मन्वान. श्रेयःपथस्याङ्गीकारेण प्रेयःपथस्य च त्यागेन परसेवैकसमर्पितजीवनः अमरपदवीं सानन्दमारोहति । ये केचनापि सिद्धाः साधवो राजर्षयो ब्रह्मर्षयो महापुरुषा नेतारो वा अद्यावधि जगतीतले कीर्त्यन्ते प्रातः स्मर्यन्ते प्रणतशिरोभिर्जनैः श्रद्धास्पदीक्रियन्ते, ते सर्वेऽपि अनेनैव श्रेयःपथेन अमरतामासादयाम्बभूवुः । एष एव मानवजीवनस्य सर्वजीवनातिशायी परमादर्शो यदनुसारेण तदेव धनं धनं भवति तदेव बलं बल भवति सैव विद्या विद्या भवति तदेव साधनं सत्साधनं भवति येन जीवनसर्वस्वीभूतोऽयमात्मज्ञानालोकः सुलभः सुकरश्च स्यात् येन च मानवः स्वयमपि आलोकितः स्यादन्यानपि च आलोकयेत्, स्वयमपि जीवेत् अन्यानपि जीवयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि च उपनिषद्दृष्ट्या अन्यदपि अनन्यसाधारणं वैशिष्ट्यं मानवजीवनस्य सञ्चकास्ति। यथा तैत्तिरीयोपनिषदभिदधाति ब्रह्म विजिज्ञासमानः वरुणात्मजो भृगुः ब्रह्मविचिकित्साप्रसङ्ग पञ्च कल्पान्, विजानीते प्रथमे अन्नं ब्रह्म इति, द्वितीये प्राणो ब्रह्म इति, तृतीये मनो ब्रह्म इति, चतुर्थे विज्ञानं ब्रह्म इति, पञ्चमे च आनन्दो ब्रह्म इति। एते पञ्चापि कल्पा मानवजीवनस्थैः पञ्चभिः कोशैः प्रतिनिधीयन्ते।

पूर्वान् चतुरः कोषान् अतिशयानः आनन्दमयः कोषः आद्यैश्चतुर्भिः कोषैः साकं मानवजीवन विभूषयति येन मानवजीवनं सकलजीवनशेखरायते। आनन्दमयकोषस्य महिम्ना मानवस्यैव मुखे हास्यरेखा विकसति नेतरेषाम्। मानव एव प्रमोदप्रफुल्लहृदयः स्मेरवदनश्च द्रष्टुं शक्यते। अयमानन्दोल्लासः मानवजीवनमन्तरेण नैव सम्भवति। अतः 'रसो वै सः' 'आनन्दं ब्रह्म' इत्यादिभिः प्रकारैः प्रतिपादितस्य परमानन्दरूपस्य ब्रह्मणः अतीव सर्मापस्थम् मानवजीवनम् अतएव ब्रह्मसाक्षात्कारेण आत्मसाक्षात्कारेण एव वा अस्य साफल्यं सम्भवति नान्यथा। यदितु अनवधानो मानवः इममात्मनश्चरमं साध्यमुपेक्षते तर्हि स एव आत्महा भवति तस्य कृते असुर्या नाम अन्धेन तमसावृता लोका एव आस्पदीभविष्यन्ति अमरतायाः पदवी च मुष्टा भवतिइति त्यागैकप्रधानेन वर्त्मना श्रेयःपदव्याः अनुसरणद्वारा अमरताप्राप्ति रेव साधयितव्या इत्येष औपनिषदः मानवजीवनादर्शः। एतत् परीयः जीवनदर्शनं नास्माभिर्विस्मर्यतामिति परमात्मानं प्रार्थयमानो विरिरंसामि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. रामेश्वरशर्मा पोखरेलः

न्यायदर्शनस्य न्यायः

व्यवहारपक्षः

तमसाऽन्धीकृता लोका आलोकं समीहन्ते । ऊष्मणा म्लानाः शीतम् । शीतेन च श्यानाः सन्तापम् । अज्ञानेन विकला ज्ञानं लिप्सन्ति । यतमाना लभन्ते । लब्ध्वा प्रसीदन्ति च । एवमन्यायेन पीडिता लोका न्यायं समीहमानाः पञ्चायतं न्यायालयं वा धावन्ति । न्यायं प्राप्य सन्तुष्यन्ति च । अतः प्रतिगृहं प्रतिराष्ट्रं च व्याप्य न्यायस्य महती चर्चाऽस्ति । व्यक्तिगतां सामाजिकीं वा स्थितिं सुधारयितुं न्यायः समेषां कृते सुलभः कार्यः सर्वेषामिति राष्ट्राणामेको निर्घोषः तदनुसारं जनहिताय प्रतिजनपदं न्यायालयाः स्थापिताः न्यायाधीशाः वाक्कीलाश्च नियुक्ताः सन्ति राष्ट्रेषु । मा कार्षीद्बलवान् दुर्बलस्य निगिलनम् मा च प्रसरेन्मात्स्यन्यायो वस्तुतोऽन्याय इति राष्ट्रसंघीय महान्यायालयो स्थापितो विश्वस्मिन् शान्तेः सुरक्षायाः सहास्तित्वस्य च पाठं प्रत्यहं प्रसारयति च । पौरजानपदाः स्वदेशीयात्, राष्ट्राणि चान्ताराष्ट्रियान्न्यायालयादन्यायं निराकृत्य जीवन्ति, जीवयन्ति च लोकान् । अतः संसारस्यैव जीवनौषधं न्यायः । यतो न्यायस्य सत्येन, अन्यायस्यचाऽसत्येन सह संबन्धः । न्यायप्रिया लोकाः सत्यं स्थिरीकर्तुं यतन्ते । अन्यायिनश्चासत्यपि स्थिरीकर्तुं वाग्जालैर्विवदमानाः सत्यासत्ये नीरक्षीरन्यायेन मिलिते कुर्वन्ति । अतः सत्यासत्यविवेचनमपि नीरक्षीरविवेचनमिति रूढं लोकेषु । अतएव पण्डितराजेन जगन्नाथेनोक्तम्—

"नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् । विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः" इति ।

सोऽयंविषयो लौकिकन्यायस्य । लोकजीवनस्य च शंसनानि शासनानि वा शास्त्राणि । शास्त्रालोकाश्च ननु लोकाः । यतः सर्वस्य लोचनं शास्त्रमिति तथा च लौकिकन्याय एव तादृशस्य शास्त्रीयन्यायस्य सोऽयं च लौकिकन्यायस्य मूलम् यतः प्रमाणैरर्थपरीक्षणं शास्त्रीयन्यायस्य लक्षणं लोकानुकूलमिति लोकशास्त्रीयन्याययोरन्योन्यमनादिःकार्यकारणभावोऽस्ति इति अनादिवस्तुनो न्यायस्य अनादिवेवमूलकत्वेन भवितव्यमिति जिज्ञासयासर्वतः समीक्ष्यमाणे आत्मतत्त्वज्ञानाय तर्कानुकूलमननस्य, श्रौतनियमापतितविरोधपरिहाराय तर्कदृष्टेरावश्यकमिति श्रुतौ प्रतिपादितम् । उपनिषत्कालेऽजातशत्रोर्जनकस्य च सभायां तार्किका आसन् इति श्रूयते, मनुना धर्मानुसन्धानाय तर्कस्य प्राधान्यं प्रतिपादितम् । तर्कः प्रमाणानामनुग्राहकः स्वानुग्राह्यप्रमाणसमुदायरूपन्यायपरः तस्य स्वतन्त्रस्यास्तित्वाभावात् । अतएव वात्स्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यनेन सकलविद्याविषयकसंशयतमसोनिराकणात् न्यायः प्रदीपः इत्याद्युक्तम्। अतो न्याय श्रुति-स्मृतिमूलकः सर्वविद्याधर्मकर्मसंस्कृतिसंरक्षणसाधनम्, पूर्वोक्तरीत्या सदाचारव्यवहारपरम्परागतो लोकप्रियश्चेति सिद्धयति, ततो न्यायादेव सकललोकदर्शनैकमत आत्मा, लोकायतातिरिक्तदृशां शरीरातिरिक्तः, आस्तिकदृशां नित्यो व्यापकश्च साध्यः अन्यथा देहात्मवादिनि संसारे संसरत आत्मनोऽनित्यतया धर्माऽधर्मसुखदुःखानां रागविरागभोगापवर्गाणामिह परलोके च कार्यकारणभावविलोपेन अदृष्टनित्यात्मवादसापेक्षा सकला वैदिकी संस्कृतिरेव समाप्ता स्यादितिहेतोः सांख्ययोगवेदान्तादिभिर्नित्यात्मतत्वज्ञानं यथास्वन्यायं प्रतिपादितम्। तथापि बौद्धदर्शनस्यारुणोदयवेलायाम् इह पुनर्जन्ममुक्तिप्रभृत्यनुपपत्तिनिराकरणपूर्वकम् क्षणिकविज्ञानाद्वैतवादेन, शून्यवादेन च प्रत्यवतिष्ठमानां बौद्धानांकुतर्कप्रमाणन्यायजालं स्वप्रमेयमात्रवर्णनैः सांख्यादिदर्शनैःप्रसङ्गात् प्रतिपादितेन गाढ़े तमसि खद्योतप्रकाशेनेव न्यायकेन न निराकर्तुं शक्यमिति तन्निराकरणपूर्वकं स्वपक्षस्थापनाय न्याया विशेषतः प्रयोक्तव्या इति न्यायदर्शनं भगवानक्षपादः प्रत्यपीपदत् येन प्रथमद्वितीयसूत्राभ्यामेकमुखेन लोकशास्त्रीयतत्त्वज्ञाने, तादृशंनिःश्रेयसहेतू इति प्रतिपादिते मुनिना, तथाहि यथा लोके सदिग्धानां प्रमेयाणां संशयप्रयोजनादिस्वरूपज्ञानपूर्वकं परस्परमविरुद्धैः प्रमाणैरेव तत्वज्ञानं वस्तुस्थिति-यथार्थज्ञानं निःश्रेयसहेतुः सर्वोत्कृष्टस्य सुखस्य दुःखनिवृत्तेर्वा साधनं भवति तथा शास्त्रीयाणामपि शरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिफलदुःखानामन्त्यस्य साक्षादन्येषां च दुःखहेतुत्वेन परम्परया दुःखरूपतया च "हेयानि, इमानि" इति वर्जनीयतया, आत्मापवर्गयोश्च दुःखनिवृत्तेरधिकरणतया स्वरूपतयापादेयत्वेन, "उपादेयाविमा" विति तत्त्वज्ञानं निःश्रेयसहेतुरिति सकललोकशास्त्रीयतत्त्वज्ञानान्येव न्यायसाध्यानीति न्यायस्वरूपं वैशद्येन व्याख्येयं भवति, किन्तावत् प्रमाणैरर्थपरीक्षणं न्याय इति।

तथाहि गौरिति शब्दः गौरिति अर्थः गौरिति ज्ञानम् इति भाष्यकारवचनानुसारेण शब्दार्थज्ञानानामत्यन्ताभेदपक्षमादाय विवादो भवतु परं शब्दार्थयोरिव ज्ञानार्थयोरपि घनिष्ठः संबन्ध इत्यत्र न कोऽपि विवादः,अतएव सर्वव्यवहार-हेतुर्गुणो बुद्धिर्ज्ञानमिति अन्नंभट्टः। सेयंबुद्धिः श्रवणमननादिभिः परिमार्जितैव सफलप्रवृत्तिजननीभवति, यथाहि, १ 'आप्तोपदेशात्'-अग्निः, इति प्रतीयन् धूमदर्शनेन पुनरनुमिन्वन्, अन्ततः चक्षुर्विषयतां नीत्वैव सन्तुष्यति। तादृशं तदग्निज्ञानं तस्य परिमार्जितं भवति, ततो ऽग्नेरादाने प्रवृत्तः सफलश्च भवति, इति बहुषु व्यक्तिगतव्युत्पन्नबुद्धिक्षेत्रेष्वपि-बहूनां प्रमाणानामेकत्र संप्लवः सहावस्थानं दृष्टम् चेदव्युत्पन्नादिबोधस्तु सुतरां बहुप्रमाणसापेक्षः। विशेषस्त्वत्र परोद्देश्यता, अर्थात् व्युत्पन्नेनापरेण अव्युत्पन्नः, परः सन्दिग्धार्थः प्रतिपाद्यते इति परार्थाऽनुमानं यत्तदेव प्रमाणैरर्थपरीक्षणं नाम, तद्यथा कश्चित् पर्वतं गतः धूमंपश्यति परं यत्र धूमस्तत्रवह्निरितिव्याप्तिं न जानाति, वह्निं चक्षुषा न पश्यति परमावश्यकतयोपादातुमिच्छति परेण वह्निरस्तीति शब्देन प्रोक्तोऽपि नविश्वसिति, अपितु नन्वस्ति किमु वह्निसाधनम् इति

(१) न्यायसूत्र १ अ. १ सू. भूमिका,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संदिग्धे । एतस्यां स्थितौ तं बोधयितुमपरो धूमाद्वह्निमनुमितवान् व्युत्पन्नः परार्थानुमानं न्यायं निम्न-रीत्या प्रयुङ्क्ते, ततश्च संदिग्धः परः, धूमो वह्निव्याप्यो वह्निलिङ्गमिति निश्चिन्वन् धूमपरामर्शं विधाय वह्निमनुमिनोति ।

न्यायप्रयोगस्वरूपम्

तद्यथा न्यायः १ पर्वतो वह्निमान् २ धूमात् ३ यो यो धूमवान् स स वह्निमान् यथा महानसम्, ४ तथाचायम् ५ तस्मात्तथा, इत्येवं पञ्चावयववाक्यानि प्रयुङ्क्ते, एतेषां क्रमेण न्यायदर्शने प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि संज्ञाः, वैशेषिके च क्रमशः प्रतिज्ञापदेश निदर्शनाऽनुसंधानप्रत्याम्नायसंज्ञाः। न्याये प्रतिज्ञादिचतुर्णां च शब्दानुमानप्रत्यक्षोपमानप्रमाणरूपता च तथा च न्याये प्रतिज्ञावाक्येन लक्षणयाऽऽगमरूपेण तदविरोधिना ऽनुमानरूपेणहेतुवाक्येन तत्समर्थकाभ्यां प्रत्यक्षोपमानरूपाभ्यांचोदाहरणोपनयवाक्याभ्यां च निगमन काले पूर्वपूर्ववर्णानुभवजन्यसंस्कारविशिष्टेन अन्तिमपदप्रत्ययेन, सकलवाक्यार्थानामुपस्थानात् तत्रैकवाक्यतामापन्नेन न्यायवाक्येन फलतः एकत्र समुदितेन प्रमाणचतुष्केण वह्निलिङ्गं परीक्षितवता लिङ्गपरामर्शं कृत्वा वह्निरनुमीयते ।

अतएव प्रमाणैरर्थपरीक्षणं न्याय इति संगच्छते अर्थपरीक्षकाणि प्रमाणानि न्याय इति पर्यवस्यति, कृदमिहितो भावो द्रव्यवत् प्रकाशते इति नियमात् तदतेनैव प्रमाणसमुदायरूपेण न्याये सकलप्रमाणणानां संदेहास्पदं स्वरूपं संख्या च निर्धार्यंते ।

अदृष्टपक्षे न्यायः

वस्तुतो दृष्टपक्षस्य लोकसिद्धतया नात्यावश्यकेऽपि अदृष्टपक्षसंशयनिराकरणार्थं एव न्यायः। यथ पुरुषाश्चतुर्विधा भवन्ति, ज्ञानी, अज्ञानी, मिथ्याज्ञानी, संदिग्धज्ञानी च । तत्र ज्ञानी व्युत्पन्नो भवति । स इतरान् प्रतिपादयति । परं यः अज्ञानी स खादति पिबति गच्छति । परं शरीरमेवात्मा, शरीरातिरिक्तो वात्मा इत्यादि किमपि नपिजानाति । परं यश्च मिथ्याज्ञानी स जानाति किन्तु शरीरमात्मा, इति मिथ्या जानाति । तत्रैव तर्कं प्रमाणानि न्यार्थं वा प्रयुङ्क्ते । तावेतौ शरीरातिरिक्ततत्त्वज्ञानाय न चेष्टेते । यथा कश्चित् रज्जुं सर्प इति जानाति, कश्चिच्च रज्जुः सर्पो वा कः पदार्थ इति किमपि न जानाति । उभावेव रज्जुतत्त्वज्ञाना यस्वयमेवनप्रवर्तेते तावेताज्ञानिमिथ्याज्ञानिनौ दयमानः प्रथमो ज्ञानी चिरनिद्रास्वप्नयोरिव शयानौ तौ तत्त्वज्ञानवातावरणानयनेन संदेहदशामानयति । इति त्रय एव संदिग्धश्रेण्यामागता स्तत्त्वं बुभुत्सन्ते । किन्तु शरीरातिरिक्तः शरीरमेव वाऽऽत्मा स्यादिति, यथा स्थाणुपुरुषयोः संदिहानः अन्यतरतत्त्वं बुभुत्सन्ते, स्मरणसौविध्याय तेषामुपलक्षणरूपेण परिचयो दीयते । यथा अज्ञानिकक्षाथामुदरभरणमा-

(१, न्याय वार्तिक १ अ. १ आ. सू. १. सू.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रचिन्तया इह परलोकविषयेऽकिञ्चिज्ज्ञा व्यवहारलम्पटाः ये कथापुराणादिश्रावणेन सन्देहदशामानीयन्ते, मिथ्याज्ञानिकक्षायां च कुतर्कप्रमाणन्यायाभासविलुप्तमतयो विपर्यस्ताश्चार्वाकबौद्धादयः, सन्दिग्धश्रेण्यां चाल्पज्ञा बहुविशुद्धज्ञानार्थिनो विद्यार्थिन आयान्ति, त एते शरीरातिरिक्त आत्मा इति पुनः पुनराप्तोपदेशात्प्रतिपाद्यमाना अपि अनुकूलतर्कं प्रमाणान्तरमनवलोक्य आत्मन शरीरातिरिक्तनित्यत्वे सन्दिहानाः 'दर्शनस्पर्शाभ्यामेकार्थग्रहणात्' इत्यादिन्यायै प्रतिपाद्यन्ते । तत्रदर्शनस्पर्शनाभ्यामेकार्थग्रहणतिति शरीरेन्द्रियात्मवादयोर्द्वयोरेव निराकरणम्, यथा प्रातर्घटं दृष्टवान् पुरुषः रात्रौ प्रतिसंदधाति, यथा यमर्थमद्राक्षं तमधुना स्पृशामि इति, यदि शरीरमेवात्मास्यात्तर्हि प्रातर्घटंपश्यच्छरीरं कर्तृ प्रतिक्षणमाहारविहारादिभिरुपचीयमानमपचीयमानं वा रात्रौ नास्ति इति अनुभवप्रतिसंधानयोरेककर्तृकत्वं न स्यात् एवं बालवृद्धयुवशरीरेषु विभिन्नसन्तानेषु अनुभवस्मरणयोःसामानाधिकरण्यं नोपपद्येत इति न शरीरमात्मा ।

एवमिन्द्रियात्मवादेऽपि पूर्वं कस्येन्द्रियस्यात्मत्वमिति विनिगमनाविरहः। सर्वेषामात्मत्वेऽनैकमत्यम्, प्रधानत्वाच्चक्षुषआत्मत्वे प्रातश्चक्षुषा दृष्टस्य सायं त्वचा प्रतिसंधानाभावः। तस्य व्यापकनित्यत्वे त्वाचप्रत्यक्षविषयेऽपि त्वच इव त्वग्व्यापकस्य चक्षुषोऽपि संनिकर्षोऽस्ति इति त्वाचमिव त्वग्विषयस्य रूपस्यापि चाक्षुषत्वमन्धस्य स्यात् एवं कदाचिच्छ्रोत्रस्याप्यात्मत्वे बधिरस्यापि शब्दज्ञानमित्यादयोऽव्यवस्थाः स्युः ।

एवं नवजातस्य स्तन्यपानप्रवृत्तिरुदितहसितैःसुखदुःखसाधनतास्मृतिः संस्कारः पूर्वानुभवः पूर्वशरीरम् पूर्वजन्म तद्वदात्मा, एवंक्रमेण तत्तत्पूर्वजन्मवदात्मा यः पुष्पमालासु सूत्रमेकमिव सिद्धयति ।

एवं भावानां क्षणिकत्ववादे प्रत्यभिज्ञानात् क्षणिकविज्ञानात्मवादे च पूर्ववदनुभवस्मृत्योः तत्सामानाधिकरण्यानुपपत्तेःशून्यवादे च रसरंगमयस्य दुःखमयस्य वा संसारस्यसत्वेन प्रतीयमानत्वात् दूरमपसारितेषु आत्मा प्रतिशरीरमेको जन्मजन्मान्तरबालवृद्धयुवशरीरानुगामी, आगमापायिघटादिज्ञानवान् अनुभवस्मरणयोःसामानाधिकरण्यनिर्वाहको नित्योविभुरेकश्च सिद्धयति, ततश्च सुखदुःखबन्धमोक्षव्यवस्थाया निर्वाहाय प्रतिशरीरमात्मनानात्वेऽपि सिद्धे तदुपभोगायैव अदृष्टसिद्धिः ।

अदृष्टसिद्धिः

जायमानानां कार्याणां न सवदाभवनस्य, सर्वतोविश्वं दृश्यमानस्य वैचित्र्यस्य, अनादिकालतो लोकसेवादानधर्मादिषु विश्वस्य प्रवृत्तः रूपादिविषयभोगस्य च प्रत्यात्मनियतस्य सिद्धयेऽदृष्टमेव नियामकं कल्प्यते तथा च न्यायाः—

सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः ।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरसिद्धिः

एवमदृष्टानुसारिभोगसिद्धये भूतसर्ग आवश्यक इति तस्य कर्ता सर्गादौ परमाणूनां क्रियाजनकः निरावरणे गगने ब्रह्माण्डस्य धारकः घटपटादिनिर्माणकार्यम्यादिप्रवर्तकः सकलवेदार्थयथार्थज्ञः ज्ञानरूपस्य वाक्यरूपस्य वा वेदस्य कर्ता, सर्गादौ द्व्यणुकपरिमाणारम्भिकायाः द्वित्वसङ्ख्याया जनन्याः परमाणुद्वयविषयकाऽपेक्षाबुद्धेर्जनक एको नित्यो व्यापकः सर्वज्ञः सर्वशक्तिमांश्चेश्वरः सिद्ध्यति, तथा च न्यायाः —

"कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः। वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥"
तथाच न्यायसिद्धान्तसमर्थकेषूक्तप्रकारेषु सहस्रशो न्यायेषु विशेषतः स्थैर्यवादन्यायात्क्षणिकत्ववादः नित्यात्मवादात् क्षणिकविज्ञानात्मवादः क्षणिक(तृतीयक्षणनाशि)ज्ञानाधिकरणत्ववादात्, क्षणिकत्व(द्वितीयक्षणनाशित्व)नित्यविज्ञानशून्याद्वैतवादाः, अदृष्टवादादकार्यकारणमात्रवादः सेश्वरवादान्निरीश्वरवादः, असदारम्भवादात्, परमाणुपुञ्ज–सत्कार्य–विवर्तवादाः, एवं सामान्यवादात्, अपोहवादः निर्विकल्पसविकल्पोभयप्रत्यक्षवादात् स्वलक्षणमात्रप्रत्यक्षवादश्चेत्यादयो विपक्षिसिद्धान्ता निराकृता भवन्तीति न्यायसिद्धान्तोऽव्याहतः सिध्यति । तदिदं न्यायदर्शने प्रतिपादितस्य परार्थानुमानस्य न्यायस्य फलम् । सोऽयमेव परमो न्याय इत्युच्यते । विप्रतिपन्नपुरुषप्रतिपादकत्वमेव परमत्वमित्युक्तम्,[1] अयमर्थः एकैकशः प्रमाणैः कश्चित्स्वयं प्रतिपद्यतां नाम, परं विप्रतिपन्नो यावत् परस्परमविरुद्धैः सर्वैः प्रमाणैर्न प्रतिपाद्यते तर्हि स हृदयेन न प्रतिपद्यते । सकलप्रमाणसमुदायेन न्यायेन प्रतिपादितस्तु प्रतिपद्यते । अतएव वैशेषिकदर्शनेऽपि "पञ्चावयवेनैव वाक्येन संशयित-विपर्यस्ताव्युत्पन्नानां परेषां स्वनिश्चितार्थप्रतिपादनं परार्थानुमानं विज्ञेयम्" इति प्रतिपादितम् ।

न्यायपरमन्याययोः क्षेत्रं भेदश्च

न च यथा प्रमाणसमुदायरूपस्य, विप्रतिपन्नविप्रतिपत्तिनिराकरणक्षमस्य, पञ्चावयववाक्यस्य परमन्यायत्वम्, समुदितानां प्रत्येकं प्रमाणानाञ्चैकैकं न्यायत्वमुचितमितिवाच्यम् परार्थानुमानमात्रस्यैव न्यायशब्दवाच्यत्वात्, अयमर्थः, सर्वत्र प्रमाणसंप्लवस्य नियमो नास्ति प्रत्यक्षतो दृश्यमाने पाणौ, चक्षुराद्येकैकेन्द्रियनियतेषु रूपादिपञ्चविशेषगुणेषु, प्रमाणसंप्लवाभावात् एकैकमपि प्रत्यक्षागमोपमानानां स्वविषयपरिच्छेदसामर्थ्यात्, तत्र प्रमेयेषु बहुप्रमाणयोगेन परीक्षणम्, अर्थात् सन्दिग्धपर्यालोचम् नास्ति अतएव नैकैकं न्यायलक्षणयोगः, किन्तु एकत्र मिलितानां परस्परमविरुद्धानां सन्दिग्धार्थपरीक्षकप्रमाणानामेव । एकैकमपि न्यायावयवत्वान्न्यायत्वमौपचारिकं तु भवति ।

---

१. न्याय वार्तिके, अ. १ आ. १, सू. १. कः पुनः परमार्थं इत्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु तर्हि स्वार्थानुमानं तु न्यायः स्यात् यतः तस्य यथास्थानं प्रत्यक्षानुमानोपमानपूर्वकत्वात् माध्यवतरक्षहेतुदृष्टान्तबोधकवाक्यानां प्रतिज्ञाहेतूदाहरणवाक्यसदृशत्वेन आगमानुमानप्रत्यक्षेषु लक्षणायाः संभवात् इति चेन्न, परार्थानुमानस्यैव प्रमाणचतुष्करूपत्वात् । स्वार्थानुमानस्य प्रत्यक्षपूर्वकत्वेन प्रत्यक्षपूर्वकानुमानादिपूर्वकत्वेन च परम्परया यथास्थानमेकद्वित्रप्रमाणपूर्वकत्वेऽपि प्रत्यक्षादिप्रमाणरूपत्वानङ्गीकारात्, परार्थस्य च प्रमाणरूपताङ्गीकारात् । स्वमनस्येव जायमानस्य, मननात्मकस्य स्वार्थानुमानस्य वाक्यरूपत्वाभावेन, तस्य प्रत्यक्षादिषु लक्षणाभावात् पञ्चावयववाक्यलक्ष्यप्रमाणसमुदायरूपन्यायशब्दवाच्यतायास्तत्राभावात । भाष्यकारोक्त[1] न्यायपदाभिप्रेतार्थपर्यालोचनेन, तत्र तत्र शास्त्रे पञ्चावयववाक्यस्यैव न्यायशब्देनाभिधानात्[2]। परार्थानुमानेन प्रत्यक्षाऽऽगमाश्रितकलेवरेण सन्दिग्धस्य, लिङ्गस्यैव परीक्षणात् स्वार्थानुमानेन मिषाधयिषायामसन्दिग्धस्यापि अन्यत्र सन्दिग्धस्य साध्यस्यैव प्रत्यक्षादिपूर्वकत्वेऽपि तद्भिन्नकलेवरेण ज्ञापनात् , त्रिभिन्नप्रमाणैः संशयितार्थनिर्णयस्यैव परीक्षाशब्दाभिधानात् परार्थानुमानस्यैव न्यायशब्दवाच्यत्वात् ।

यथा गुरुचिकित्सकोपदेशवाक्यैः परीक्षितनिदानः शिष्यो रोगं स्वयमेव परिचिनोति तथा अनेन (परार्थानुमानेन) प्रतिपादितालिङ्गात् परोऽप्यग्निं प्रतिपद्यते इति, अतएव न्यायप्रवृत्तिस्तु संशयादेव भवति, यथा नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवतते, किन्तु संशयितेऽर्थे (न्यायभाष्यम्, अ. १ सू. १) ।

यदि प्रत्यक्षविषयस्यानुमानं सूर्यालोकेनाऽऽलोकितस्य दीपेन दर्शनमिव निष्प्रयोजनम्, अतस्तत्रापि मूले फलबलकल्प्यः संशय इति चेदस्तु कल्प्यताम्, स्वार्थानुमाने साध्यसंदेहः परार्थानुमाने तु लिङ्गसन्देहोऽस्ति पूर्वत्र साध्यस्य ज्ञापनम् अत्र लिङ्गस्य परीक्षणमिति लक्ष्यभेदान्न स्वार्थानुमानं न्यायः ।

तथा च प्रत्यक्षाद्येकैकप्रमाणानामुदयनानुसारान्मननात्मकस्य स्वार्थानुमानस्यैव[3] वा न्यायावयवत्वेनोपचारान्न्यायत्वम्, विप्रतिपन्नपरप्रतिपत्तिहेतोः प्रमाणसमुदायस्य तु परमन्यायत्वम् परप्रतिपादकस्य परस्परविरुद्धप्रमाणसमुदायस्य न्यायाभासस्याऽन्यायत्वम् तथा च एकैकप्रमाणनिर्णयविषयःक्षेत्रमौपचारिकन्यायस्य, सकलप्रमाणरूपपञ्चावयववाक्यतः सन्दिग्धार्थनिर्णयस्य विषयःक्षेत्रं वास्तवन्यायस्य परमन्यायाभिधानस्य ।

१. प्रत्यक्षाऽऽगमाश्रितमनुमनम्, सान्वीक्षा तया प्रवर्तते इति आन्वीक्षिकी न्यायविद्या न्यायदर्शनस्य भाष्यम् । १ अ. २ सू.

२. वाक्यभावापन्नानि पुनर्निप्रतिपन्नम्, न्यायसूत्रवार्तिके, अ. १ आ. १. सू. १.

३. न्यायचर्चेयमीशस्य मननव्यपदेशभाक् । न्या. कुसुमाञ्जलिः, स्तवक १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलतः तादृशन्यायाभासस्य न्यायश्रेण्यां नगणना।

न्यायपञ्चायतम् पञ्चायतान्तराणि च

पञ्चवयवाः प्रतिज्ञादयः न्यायपञ्चायतम्। ब्रह्मपञ्चायतम्, शिवपञ्चायनादिसंज्ञितञ्च पञ्चायतशासनस्य मूलमिति कथयन्ति। परंब्रह्म (शिव)पञ्चायतसहितानांसकलपञ्चायतानां मूलं न्यायपञ्चायतमेव, यतो ब्रह्मन्यायः(ब्रह्मइन्साफ) कर्तव्यः, इत्यादौ ब्रह्मशब्दो न्यायस्य(सत्यस्य) निकटसंबन्धी अस्ति। सत्यंज्ञानमनन्तं ब्रह्मेतिश्रुतिवाक्यतात्पर्यात्, ब्रह्मशब्दो व्यापकब्रह्मपरःव्यापकं ब्रह्म परमात्मा च विश्वं वष्णुर्वषट्कार इत्यादिसंज्ञित तस्यैव विष्णोः सहस्रनाम्नो "न्यायो नेता समीरण" इति न्यायसंज्ञा। तथा च न्यायो विष्णुर्ब्रह्म चाभिन्ना आगमात् प्रतिपाद्यन्ते। अतो ब्रह्मपञ्चायतस्यापि न्यायपञ्चायतं मूलमिति कथनमौचित्यं स्पृशतीति वक्तुं शक्यते।

अवयवानां पञ्चत्वेऽभिप्रायो लोकादपि

तथा च तत्रतत्र पञ्च महाभूतानि, पञ्च ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेत्यादिबहूना पञ्चभावापनान्तामेव विशेषकार्यनिष्पादकत्वकथनात् न्यायावयवानामपि पञ्चानामेव विशेषप्रतिपत्तिहेतुत्वम् संदिग्धलिङ्गनिश्चयहेतुत्वम्। अतएव दर्शनान्तर्गेक्तद्वित्रिदशावयववादा अपि निरस्ता भवति। यतो यथा द्वाभ्याम् तिसृभिरङ्गुलिभिर्वा वस्तु ग्रहीतुं न शक्यते अपितु पञ्चाङ्गुले समस्तहस्तस्यैव वस्तुनो गुरुभारोच्चालने सामर्थ्यं विनियोगोऽपि हस्तान्तरस्यतु कर्मठपञ्चाङ्गुल्यपरहस्तसहयोग एव विनियोगो दृश्यते। न दशाङ्गुल्योर्हस्तयोरेव (दशाङ्गुलीनान्) समानो विनियोगः कर्मसु। एवं संदिग्धार्थनिर्णये, न द्वित्रिदशावयववाक्यानामपि युक्तियुक्तता पञ्चाङ्गुलिहस्तस्य वस्तुग्राहकत्वमिव पञ्चावयवन्यायस्यैव संदिग्धार्थनिर्णायकत्वमुच्यते। तथा च पञ्चायवन्यायेन सिद्धेषु आत्मादृष्टपरमेश्वरेषु दृष्टादृष्टोभयसुखदुःखनिवृत्तिपर्यवसानानां दानदयादेश-राष्ट्रलोकसेवादिधर्म-कर्मणां फलनः सनातन-मानवसंस्कृतेः संरक्षणेन परहिंसापीडनलक्षणस्वार्थशोषणपर्यवसायिनोऽपराधा जगति सुनियन्तुं शक्यन्ते। न्यायिषु परोपकारिषु श्रद्धा अन्यायिषु परपीडकेषु दुराचारेषु निन्दा च परम्परागते लोकान् सुखाभिलाषिणोऽन्यायपथ न्निवर्तयतः। न्यायोपकारसदाचारेषु च प्रवर्तयतः। यद्विश्वशान्तेर्मूलमिति वक्तुं शक्यते। सेयमध्यात्मवादपक्षस्य विशेषता, यत्र जगत उच्छृङ्खलताया निरोधे न केवलं दृष्टपक्ष एव साधनम् किन्तु अदृष्टपक्षोऽपि नित्यात्मपरलोकजन्मनाभहानिदर्शनादिकमपि। तदिदं न्यायस्यैवादृष्टपक्षसाधनस्य विलसितम्। तथा च यथा लोकेऽपि वादिप्रतिवादिनौ परस्परं विप्रतिपद्य न्यायालयमुपेतौ न्यायप्रतिन्यायाभ्यां प्रतिस्वपक्षप्रतिपन्नसाधनान्न अन्योन्यं समर्थयेते निराकुरुतश्च, तदेकतरसाधनानि यानि परस्परमविरुद्धानि न्यायाधीशानुमतानि न्यायः। यथा दृष्टसाक्षिवचनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षप्रतिपादकत्वात् प्रत्यक्षम् तेषां प्रमाणितपत्रान्तराणि वादविवादपत्रान्तराणि च शब्दानुमापकानि शब्दः तत्रानुकूलतर्कसहिता अदृष्टसाधनदृष्टहेतूपलब्धिरनुमानम् तादृशस्थलान्तरेण विवादास्पदस्य सादृश्यमुपमानं चेत्यादिसकलसम्मिलित (मिसील) समीक्षामूलं न्यायाधीशस्य स्वसिद्धान्तानुकूलमन्यतरपक्षसाधनं विप्रतिपन्नोभयपक्षबोधैकलक्ष्यं प्रमाणसमुदायरूपं प्रतिज्ञादिवाक्यं न्यायस्तत्फलं निर्णयोऽन्यतरपक्षपर्यवसानं सफलपत्रमपि (फैसला) लोके न्यायशब्देन व्यवह्रियते, औपचारिकस्तत्र न्यायव्यवहारः। एवं शास्त्रेऽपि वादिप्रतिवादिषु परस्परं विप्रतिपद्य समुपस्थितेषु तदीयसंगतासंगतसिद्धान्तसमीक्षामूलमन्यतरपक्षसाधनानुकूलं परार्थं प्रमाणसमुदायरूपं पञ्चावयववाक्यं न्यायः, तत्फलं शरीरातिरिक्तात्मसाधनसाध्यतादृशात्मनिश्चयादिकमप्युपचारान्न्याय उच्यते इति लोके शास्त्रेऽपि परकीयसंदिग्धार्थपरीक्षकाणि प्रमाणानि प्रमाणैः संदिग्धार्थपरीक्षणं वा न्याय इत्यत्र न वैमत्यम् । फलतः, अन्यायदलितोऽस्मि, इति स्वस्य न्यायः स्वतो न भवति किन्तु परतः, इति परेण परार्थमनुमानं न्यायः । सोऽयमेव हि असत्यवाग्जालयन्त्रात् पृथक्करणयन्त्रम्, यद्वस्तु सत्यं भवति तदेव न्यायसंगतैः प्रमाणैः परीक्षितं सिद्धयति । नीरेण क्षीरं कतिमिलितमिति यन्त्रप्रयोगादिव, असत्यवाग्जालतिरोहितं सत्यमपि न्याययन्त्रप्रयोगात् सुज्ञेयं भवति, अतो न्यायस्य सत्येन अन्यायस्य चासत्येन सह संबन्धात् लोके न्यायस्य समादरः, अन्यायस्यानादरश्च जायमानौ न्यायस्य लोकप्रियं गरिमाणं सूचयतः ।

अतएव हि उपरिपीठिकोक्तम् लौकिकन्यायस्य शास्त्रीयन्यायः शास्त्रीयन्यायस्य च लौकिकः न्यायोऽन्योन्यं मूलं स्रोतः इति संगतं भवति । यतो न्यायेन सृष्टिः सृष्टिस्थितये च न्यायः ।

इदं तु बोध्यम्, लौकिकन्यायो दृष्टसंसारस्यैव, शास्त्रीयन्यायस्तु दृष्टादृष्टोभयसंसारव्यवस्थापने हेतुर्भवति । किन्तु लोके लौकिकव्यवहारभेदात् शास्त्रे च शास्त्रकर्तृदर्शनभेदात् न्यायभेदः । यस्मिन्देशे शास्त्रे वा यो न्यायः फलतः यानि प्रमाणानि, तदनुसारं तत्रार्थपरीक्षा, अतोऽत्र न्यायोऽपि देशान्तरे स एवाऽन्यायो भवति, देशान्तरे न्यायोऽपि अत्रान्यायो भवति । यथा पञ्चविंशतिबीजहरात् (२५ विगाहा) अष्टाविंशतिबीजहराद्वाऽधिकक्षेत्रोपभोगसाधनानि नेपाले न्यायविरुद्धान्यपि भारते न तादृशानि, न्यायसंगतानि भवन्त्येव । एवं शास्त्रे सांख्ये न्यायोऽपि सत्कार्यवादसाधनमसदकरणं न्यायेऽन्यायो भवति, तत्रासदारम्भात् । एवमन्यत्रापि । तदिदं परार्थानुमानं परस्य जिज्ञासोरदृष्टे विषये साधनपरिज्ञानात् स्वार्थानुमानाय भवति स्वार्थानुमाननिष्णातश्च पुनः परार्थानुमानं परस्य कृते करोति, अर्थात् यः पूर्वमज्ञ आसीत् स इदानीं परार्थानुमानेन व्युत्पन्नः स्वार्थानुमायी पुनः परस्यकृते परार्थानुमानेन व्यवहारचक्रचालने हेतुर्भवति । अर्थात् परार्थानुमानान्न्यायात् स्वार्थानुमानम्, तस्माच्च परार्थानुमानम् । ततः पुनः स्वार्थानुमानमित्येवं स्वपरार्थानुमानचक्रमनादिकालतश्चलति । तदिदं दृष्टविषयेऽपि दृष्टमदृष्टविषयेऽपि कल्पयितुं शक्यते । यथा आत्मज्ञानी प्रवुद्धः परार्थानुमानं शरीरातिरिक्तात्मविषयं प्रयुङ्क्ते,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिज्ञासुः परस्ततस्तादृशात्मसाधनविषयकं ज्ञानं पूर्वं यत् प्रतिपद्यते तदिदं श्रवणं नाम प्रथमम्, ततश्च स्वार्थानुमानमुत्तरोत्तरमभ्यासपरिपक्वं मननं भवति द्वितीयम्, तदेव कालान्तरे निदिध्यासनरूपमात्मतत्त्वज्ञानं तृतीयं भवति। ततश्च तुरीयं तत्त्वज्ञानं सकलवासनाजालशून्यं भवति तस्माच्च शरीरात्ममिथ्याज्ञाननाशः ततो दोषः प्रवृत्तिश्च नश्यतः किंतु शरीरं न नश्यति प्रारब्धकर्मणामवशेषात् । एवं च तादृशतुरीयतत्त्वज्ञानान्मिथ्याज्ञानदोष–प्रवृत्तिनाश-द्वारा जीवन्मुक्तिलक्षणमपरनिःश्रेयसं ततःप्रारब्धकर्मभोगपरिसमाप्त्या विदेहमुक्तिलक्षणं परनिः-श्रेयसमवाप्यते। तथा च स्वार्थानुमानेन निरन्तराभ्यासपरिपाकलब्धनिदिध्यासनतुरी-यावस्थेन जीवन्मुक्तिलक्षणमपरनिःश्रेयसं प्राप्तो योगी वीतरागो लब्धयुक्तयुञ्जानाद्यवस्थ एतस्यामेव दशायां शास्त्रसंप्रदायरक्षार्थं परार्थानुमानस्य प्रतीकभूतं दर्शनं ददाति। एतस्यां जीवनन्मुक्तिदशायामेव कपिलकणादाक्षपाददादयः प्रतिस्वदर्शनसूत्राण्यदुः। ततो व्युत्पन्नाः पूर्वे आचार्याश्च पुनरर्वाचीनेभ्यः परार्थानुमानप्रतीकानि वृत्तिभाष्यवार्तिकटीकादीनि सूत्रदिशाऽशासन् यतोऽर्वाचीनैः पुनः स्वार्थानुमानात् परार्थानुमानमित्येवं क्रमेण ग्रन्थनिर्माणपठनपाठनादिधारा-प्रवाहवाहि स्वपरार्थानुमानचक्रमदृष्टपरस्याध्यात्मवादस्य परम्परां रक्षयदास्ते। तदिदं परार्था-नुमानं न्यायः युक्तितर्कप्रमाणाविरुद्धान्येव साधयन् स्वीकारयंश्च, 'प्राच्यशास्त्रे बलादेवात्म-परमात्मादृष्टानि साध्यन्ते' इति कलङ्कं प्रक्षालयंश्च जगति ज्ञानप्रवृत्तिधारां प्रवर्तयन् स्वस्य महद्वैशिष्ट्यं सूचयतीत्यलम् ॥

□★□

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. हरिप्रसादशर्मा आचार्यः

मूलशब्द-खोजनम्

ॐनमः श्रीजगदम्बायै

जन्माद्यस्य यत इत्यादिवेदान्तवाक्यबोध्यमानं ब्रह्म वैयाकरणाः परारूपमखण्डं शब्दतत्त्वं मन्यन्ते । एवमेव प्रतिपादितं देवीभागवतमङ्गलेऽपिः—

सृष्टौ या सृष्टिरूपा जगदवनविधौ पालनी या च रौद्री
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।।
पश्यन्ती मध्यमाथो तदनु भगवती वैखरी वर्णरूपा
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ।।इति।।

चतसृष्वमूषु आद्ये द्वे योगिनां निर्विकल्पकसविकल्पकज्ञानगम्ये, तृतीया जपाद्युपयोगिनी परं श्रव्या तु वैखरीरूपा । स्फोटरूपञ्चैतज्जगत् तस्यैव परारूपाखण्डशब्दतत्त्वस्य विवर्तरूपम् । तत्राऽष्टविधस्फोटेषु मुख्यो वाक्यस्फोटः, ततएव लोकेऽर्थावगतेः। एतेनेदमप्युक्तं भवति, यत् आदौ सर्वस्यापि जगतो मूलभाषा अव्याकृता पदविभागरहिताऽऽसीत्, कालक्रमेण च शनैः शनैः पदानि कल्पितानीति । पदानामनन्तत्वेन व्याकरणस्थानीयाः पदानुशासनग्रन्था अपि दुरूहा दुःसमाः पाश्चाऽभूवन्, यथोद्धृतं न्यायमञ्जर्याम्:— तथा च बृहस्पतिः प्रतिपदमशक्यत्वाल्लक्षणस्याऽप्यव्यवस्थानात् तत्रापि स्खलितदर्शनादनवस्थाप्रसङ्गाच्च मरणान्तो व्याधिर्व्याकरणमित्यौशनसा इति । महाभाष्येऽपिः— एवंहि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगामेति । तत इन्द्रो लघुनोपायेन शब्दराशिं लोकान् बुबोधयिषुर्व्याकरणं निर्माय प्रकृति-प्रत्ययादिकल्पनया पदान्यपि विभज्य तां वाचं समस्कार्षीत् । तथोक्तं तैत्तिरीयसंहितायाम्— तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोदिति । एवमिन्द्रेण संस्कृतत्वात् आद्या भाषा संस्कृतभाषेति नाम्ना, सत्या भामा इतिवत् 'संस्कृतम्' इत्येतावतैव नाम्नापि विश्वस्मिन् प्रथिता । ऐन्द्रव्याकरणमपि विशालकायमासीत् तथाहि श्रूयतेः—

समुद्रवद् व्याकरणं महेशे तदम्बुकुम्भाद्धरणं बृहस्पतौ ।
तद्भागभागाच्च शतं पुरन्दरे तृणाग्रबिन्दुर्गदितं हि पाणिनौ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात् । पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे इति ।। ततोऽपि समये समये, आचार्यैः संक्षिप्य व्याकरणान्तराणि निर्मितानि। तेषु च लघुकायमपि विश्वतोमुखं व्याकरणमिदानीं पाणिनीयमेव जागर्ति जगति ।

अनन्तेषु शब्देषु जगति व्यवह्रियमाणाः परन्तु साधारणलोकैर्दुर्बोधा एव शब्दाः प्रायः कोश-व्याकरणैरन्वाख्यायन्ते। तथाचाऽमरः– परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगत इति । पाणिनिरपि प्राचीनवैयाकरणाननुसृत्य स्वयं पठितमपि 'लुपि युक्तवद् व्यक्तिवचने' इति सूत्रं 'तदशिष्यं संज्ञाप्रमाणत्वात्' इति सूत्रान्तरेण स्वयमेव प्रत्याख्यातवान्; पञ्चालाः कुरव इत्यादयः शब्दाः बहुवचनान्ताः प्रयुज्यन्त इति लोका अन्तरेणाप्युपदेशं व्यवहारत एव जानन्तीति तदाशयः। एवम्, कालोपसर्जने च तुल्यमितिसूत्रेण तथोरशिष्यत्वं बोधितवान्। साहित्यादिष्वपि साधारणलोकैर्व्यवह्रियमाणाः शब्दाः स्थानं न लब्धवन्तः, तथाचोक्तं चन्द्रालोकेः– 'मस्तपिष्टकटीलोष्ठगल्लादि ग्राम्यमुच्यते' इति। एतावतेदं स्पष्टं भवति यद्, बहवः प्रचलितशब्दराशयो बोल्लचालव्यवहारमात्राधारा इति। प्राकृतिक-भूगोल-प्रभृतिकारणैश्च समाना एव शब्दा देशभेदेन वाच्यभेदे, तथैकस्मिन्नेव वाच्येऽपि-भिन्न-भिन्न–शब्दाः प्रयुक्ताः। तथाचोक्तं भाष्येः– महान् शब्दस्य प्रयोगविषयः सप्तद्वीपा वसुमती त्रयो लोकाः·········शवतिर्गतिकर्मा कम्बोजेषु विकारे चैनमार्या भाषन्ते········· हम्मतिः सौराष्ट्रेषु रंहतिः प्राच्यमध्येषु गमिमेव त्वार्याः प्रयुञ्जते, इति।

परन्तु सँस्कृतभाषायाः साम्प्रतं व्यवहारातीततया व्यवहारमात्राधारान् प्राकृतादि-पथेनाऽऽगतान् सँस्कृतभाषाशब्दानेव लोकभाषासूपयुञ्जाना अपि अनधीतसँस्कृतव्याकरणादयः कोशव्याकरणैकचक्षुषश्च दर्विः पाकरसं यथेतिवत् "नाऽहं सँस्कृतं जानामि" 'नेमे संस्कृतशब्दा' इति च मन्यामहे ।

सँस्कृतेऽदन्तशब्दा अकारे वर्गतृतीयचतुर्थपञ्चमवर्णेषु हयवरलेषु च परेषु सन्धौ, ओकारान्ता भवन्तीति कालक्रमेण शब्देषु परिवर्तमानेषु प्राकृते पृथक् पदान्यपि सन्धिविशिष्टान्येवाऽनुकृतानि। तथा च वररुचिकृतप्राकृतव्याकरणसूत्रम्— अत ओत् सोरिति। अतः सँस्कृतस्याऽदन्तशब्दा नेपालीभाषायामपि प्राय ओकारान्ता जाताः शाके, गते, इत्यादि विभक्तिविशिष्टशब्दवत् ।

अद्यत्वे सँस्कृतभाषा दुर्बोधेति प्रायोवादः प्रचलति, स तु वक्तृणां साहसमात्रम्। वस्तुतो हिमालखण्डे, याहि (ह्याइ) इत्युच्यमाना महिषी बुद्ध्वा हिण्डते, ईष, ईष= पश्य, पश्य (ईष दर्शने) इत्युच्यमानः श्वा समीपमागत्य पश्यति, गोपालैः खोर, खोरेत्युच्यमाना वर्कराः खोरं= (खोॠ गतिप्रतिघाते) स्ववासस्थानं प्रविशन्तीति सँस्कृतभाषा पशुभिरपि सुबोधैव किं पुनर्मानवैः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवहाराधाराः संस्कृतशब्दा लोकभाषाशब्दैरनुसन्धीयन्ते संस्कृतशब्दैश्च लोकभाषाः पुष्यन्तीति नेपालीराष्ट्रभाषाशब्दानां संस्कृतभाषाशब्दैः सारूप्यं सादृश्यञ्चात्र प्रस्तूयते, यत्रादौ नेपालराष्ट्रभाषाशब्दा अन्ते च संस्कृतभाषाशब्दा विन्यस्यन्ते:—

नेपालराष्ट्र-भाषा **संस्कृतम्**

अनन्त=अनन्तः

अन्धो=अन्धोः (अन्धः स्यात्तिमिरे क्लीवं चक्षुर्हीनेऽभिधेयवत्, इति मेदिनी)

अवधि=अवधिः

अभिमान=अभिमानः (अभिमानः पुमान् गर्वे, इति विश्वलोचनः,

अधम्=अधमः (अधमः स्याद् गर्ह्यजने, इति मेदिनी)

अस्त्र=अस्त्रम् (अस्त्रं प्रहरणे चापे करवाले नपुंसकम्, इति मेदिनी)

अलङ्कार=अलङ्कारः (अलङ्कारस्तु हारादावुपमादावलङ्कृतौ, इति मेदिनी)

अमिलो=अम्लः (अम्लो रसस्य भेदे स्यात्, इति मेदिनी)

अट्टो=अट्टम् (अट्टं गृहान्तरे क्षौमे गृहे चात्यल्पभक्तयोरिति विश्वलोचनः)

अहङ्कार=अहङ्कारः (दर्पोऽभिमानोऽहङ्कार इत्यमरः)

अध्यक्ष=अध्यक्षः (अध्यक्षः स्यादधिकृते, इति विश्वलोचनः)

अवेला=अवेला (वेलाशब्देन नञ् समासः)

अघोर=अघोरः (घोरस्तु हरे भीमेऽभिधेयवत् इति विश्वलोचनः, नविद्यते घोरो यस्मादिति बहुव्रीहिसमासः)

अदालत=अड्डालयः (यद्यपि अदालत शब्द ऊर्दू भाषाया आगतस्तथापि मूलरूपमड्डालय आसीत् अड्डा (अड्ड अभियोगे) = अभियोगः तदालयो वादिप्रतिवादिनिर्णय-भवनं धर्माधिष्ठानमित्यर्थः)

अण्डवण्डकुरा=अण्डवण्डकुरा (वडि विभाजने, घञ्, कुर शब्दे, इगुपधः कः टाप्. अण्डे विभक्ते यथा पोतो न भवति तथैवाऽसंभाविनीयं वार्तेत्यर्थः)

आवेश=आवेशः (आवेशनं शिल्पिगृहे भूतावेशे प्रवेशने, इति विश्वलोचनः अत्र केवलं प्रत्ययभेदः)

आँगन=अङ्गनम् (अङ्गनं प्राङ्गणे, इति विश्वलोचनः)

आटो=अट्टम् (अट्टं... चात्यल्पभक्तयोरिति विश्वलोचनः)

आक्षेप=आक्षेपः (आक्षेपो भर्त्सनाकृष्टिकाव्यालङ्कृतिषु स्मृतः, इति मेदिनी)

आश्रम=आश्रमः (आश्रमो ब्रह्मचर्यादौ वानप्रस्थे मठे वने, इति मेदिनी)

आशय=आशयः (आशयः स्यादभिप्राये, इति मेदिनी।

आरा=आरा (आरा चर्मप्रभेदिन्याम्, इति मेदिनी)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र संस्कृतम्
भाषा

आरु=आरुः (आरुः पुंसि तर्रोभेदे, इति मेदिनी)
आशीर्वाद=आशीर्वादः [आशीः स्त्री सर्पदंष्ट्रायां तथा स्त्री शुभशंसने, इति विश्वलोचनः)
आडम्बर=आडम्बरः (आडम्बरः करीन्द्राणां गर्जिते तूर्यनिःस्वने, सभारम्भे प्रपञ्चेच, इति विश्वलोचनः)
ऊँबी=(प्यूठानमा बोलिने) उम्बी (मञ्जरी त्वर्धपक्वा या यवगोधूमयोर्भवेत् । तृणानलेन संप्लुष्टा बुधैरुम्बीति सा स्मृता, इति भावप्रकाशः)
उत्कट=उत्कटः (उत्कटस्तीव्रमत्तयोः, इति मेदिनी)
उन्मत्त=उन्मत्तः (उन्मत्त उन्मादवति, इति मेदनी)
उत्तानो=उत्तानः (उत्तानमुन्मुखे सुप्तेऽप्यगम्भीरेऽपि वाच्यवत्, इति विश्वलोचनः)
उग्र=उग्रः (उग्रः शूद्रासुते क्षत्राद् रुद्रे पुंसि त्रिषूत्कटे)
उपकार=उपकारः (उपकारश्चोपकृतौ, इति मेदिनी)
उत्तौलो=उत्तालः (उत्ताल उत्कटे, इति मेदिनी)
उत्साह=उत्साहः (उत्साहस्तूद्यमे, इति विश्वलोचनः)
ऊँचो=उच्चः (उच्चो महति चोन्नते, इति विश्वलोचनः)
उपहार=उपहारः (उपहारो वलिः स्मृतः, इति हलायुधः)
उँभ=उम्भः (उम्भ पूरणे पचाद्यच्)
उंध=अधः (उम्भप्रतिकूलनया, अकारोऽनुनासिकउकारो जतः)
उत्तर=उत्तरम् प्रतिवाक्योत्तरे, इत्यमरः)
उम्लनु=उन्म्लुञ्चनम् (म्लुञ्चु‥‥गत्यर्था. उदुपसर्गाद् भावे ल्युट्)
उज्यालो=उज्ज्वालः (ज्वल दीप्तौ उदुपसर्गात् कर्तरि णः)
ऋण=ऋणम् (ऋणमाधमर्ण्ये)
ओण्नु=ओणनम् (ओण्ट अपनयने, प्रकृते शीताद्यपनयनमर्थः, नन्द्यादित्वाल्ल्युः ओणना
ओवानो=ओवानः (ओवै शो एे नन्द्यादित्वाल्ल्युः, अत्र यद्यपि तत्त्वबोधिन्यां-वायति, ओदितश्चेति निष्ठानत्वम् । वानम् इत्युदाहृत्य ओकारस्याऽनुबन्धत्वमेवेति प्रमाणयितुं शुष्के वानमुभे त्रिष्वित्यमरकोशपद्यमप्युद्धृतमस्ति क्षीरतरङ्गिण्यामपि तथैव व्याख्यातमस्ति तथापि ओवाउँछ, ओवानो, इत्यादि संस्कृतमूलक – नेपालीराष्ट्रभाषायामोकारघटित-प्रयोगानुभवेन तु अननुबन्धकोऽपि प्रतीयते नवेति सुधियः स्वयमेव विविञ्चन्तु)।
कम्मल=कम्बलः (कम्बलो नागराजे स्यात् सास्नाप्रावरयोरपि, इति मेदनी)
कपाल=कपालः (कपालोऽस्त्री शिरोऽस्थिन स्यात्, इति मेदिनी मञ्चा हसन्तीति वद् वालेऽपि प्रयुज्यते)
कहलाउनु=काहलनम् (काहलशब्दाद्धात्वर्थे णिचि भावे ल्युट् काहलश्चरणायुधे ... शब्द-मात्रेऽपि पुंलिङ्गः, इति मेदिनी)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र- संस्कृतम्
भाषा

कुण्डल=कुण्डलम् (कुण्डलं कर्णभूषायाम्, इति मेदिनी)
कोदालो=कुद्दालः (कुद्दालः स्यात् पुमान् भूमिदारणे युगपत्रके, इति मेदिनी)
कोलाहल=कोलाहलः (कालिन्दीजलकल्लोलकोलाहलकुतूहलीति)
कमण्डलु=कमण्डलुः (कमण्डलुजलाक्षेपहृतवीर्यान् हृतौजसः, इति सप्तशती)
कच्छाड=कच्छः (कच्छः शैलादिसीमनि नौकाङ्गे तुन्नकेऽनूपे परिधानाञ्चलान्तरे, इति हेमचन्द्रः)
कुटो=कुटः (कुटो घटे शिलाकुट्टे, इति विश्वलोचनः)
कुटी=कुटी (कुटी वेश्मनि तु द्वयोः, इति विश्वलोचनः)
कुण्टो=कुण्डम् (कुण्डं देवजलाधारे, इति विश्वलोचनः)
कण=कणः। कणिका=कनिका (कणोऽतिसूक्ष्मे धान्यांशे, इति विश्वलोचनः)
कामी=कारन्धमी (धातुवादरते कांस्यकारे कारन्धमी मतः, इति विश्वलोचनः)
कांसो (खोकनु) तथा कांस (घाँसविशेष) =काशः (काशस्तु क्षवथौ तृणे, इविश्वलोचनः)
कराही=कटाही (कटाहो घृततैलादिपाकपात्रे, इति विश्वलोचनः प्रकृते स्त्रीलिङ्गे)
कलह=कलहः (कलहो भण्डने, युद्धे, इति विश्वलोचनः)
कठिन=कठिनः। कठोर=कठोरः (कठोरः कठिनः, इति हलायुधः)
कुट्नी=कुट्टिनी (कुट्टिनी शंभली, इति हलायुधः)
कुकुर=कुकुरः (श्वानौ कुकुर कुक्कुरौ, इत्युणादिकोशः कुक्कुरः कुकुरो मतः, इति च हट्टचन्द्रः)
करेटो=करटः (करटो निन्द्यजीविते, इति विश्वलोचनः)
कडुवा (गण्डकी अञ्चल पहाडी भागमा बोलिने) पाण=कटाहः=कटाहो महिषीशिशौ= इति विश्वलोचनः)
कर्द=कदरः (कदरः श्वेतखदिरे रुग्भेदे क्रकचे सृणौ, इति विश्वलोचनः)
किर्मीर्=किर्मीरः (चित्रं किर्मीर इत्यमरः)
किनार=केनारः (केनारः कुम्भिनरके शिरःकपालसन्धिषु, इति विश्वलोचनः)
कोमल=कोमलः (कोमलं मृदुले, इति विश्वलोचनः, प्रकृते पुंलिङ्गे)
काठ=काष्ठम् (काष्ठं दारुणि इति हेमचन्द्रः)
कोठो=कोठम् (कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् ... त्वचि कोष्ठे च वा दाहं विदधाति पुरो नु वा, इति गरुडपुराणम्। अत्र कोठकोष्ठशब्दयोः— समानार्थे प्रयोगः। यद्यप्यत्र व्रणविशेषवाची तथापि गृहान्तरवाचिनः कोष्ठशब्दस्य तत्रार्थे प्रयोगात् कोठशब्दोऽपि गृहान्तरवाची वर्तत एवेति निश्चीयते तथा च मेदिनीकारोऽपि मण्डलं परिधौ कोठे, इति।
कीलो=कीलः (कीलो लेशे द्वयोःस्तम्भज्वालाकफोणिशङ्कुषु, इति मेदिनी)
कानो=काणः (काणः काकैकचक्षुषोः, इति मेदिनी)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र– संस्कृतम्
भाषा

कातनु = कर्तनम् (कर्तनं न द्वयोश्छेदे नारीणांसूत्रनिर्मितौ, इति मेदिनी)

कुहनु = कुहनम् (कुहना दम्भचर्यायामीर्ष्यालौ कुहनं त्रिषु, इति मेदिनी, यद्यपि दम्भचर्याया- मित्यर्थोऽत्र प्रतिपादितस्तथापि दम्भचर्या = आभ्यन्तरतत्त्वरहितेति कुहित- वस्तूनामपि विकृतमन्तर्भवतीति प्रकृतार्थः पुष्यति)

कन्दरा = कन्दरम् (कन्दरस्त्वङ्कुशे पुंसि गुहायाञ्च नपुंसकम्, इति मेदिनी)

केशर = केशरः (किञ्जल्कः केशरोऽस्त्रियाम्, इत्यमरः)

काँसो (धातुविशेष) = कंसः (कंसो दैत्यान्तरे ... कांस्ये च कांस्यपात्रे चेति विश्वः)

कलम = कलमः (कलमः पुंसि लेखन्यामित मेदिनी)

कर्जा = कर्जा (कर्ज व्यथने ऋणं खलु पीडाकरम् यथोक्तं महाभारते–

दिवसस्याष्टमे भागे शाकं पचति गेहिनी ।
अनृणी चाप्रवासी च स वारिचर मोदते इति)

केटो = केटः (किट त्रासे पचाद्यच् बाला इतरापेक्षया बिभ्यति प्राय इतिप्रकृतार्थः पुष्यति)

कोचनु = कोचनम् (कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेष भावेल्युट्)

खन्नु = खननम् (खनु अवदारणे भावे ल्युट्)

खलो = खल. (प्रसिद्धः खलु न्यायः खले कपोता इति

खोल = खोलः (खोलृ गतिप्रतिघाते पचाद्यच्)

खोजनु = खोजनम् (खुजुस्ते यकरणे स्तेयमन्वेषणम्, नतु चौर्यम्)

खाँद्नु = खादनम् खद स्थैर्ये ण्यन्तात्ल्युट् खाँद = खादय (लोट्)

खेल्नु = खेलनम (माऽस्मिन् खल. खेलतु, श्रीहर्षः) खेल = खेल।

खोर = खोरः (खोर्ऋगतिप्रतिघाते पचाद्यच)

खप्पर् = खर्परः (जीयेय येन यमकैःकविना परेण, तस्मै वहेयमुदकं घटखर्परेण)

खुर् = खुरः (शफं क्लीवे खुरः पुमान्, इत्यमरः)

खेत = खेटः (ग्रामाधानं च खेटकम्, इति हलायुधः, यद्यपि क्षेत्रम्, इत्यस्य क्रमशः परिवर्तनेन खेत, इति जातमिति प्राकृत व्याकरणतःप्रतीयते तथापि सान्निध्यंतु खेटशब्दस्यैव ! खेटः पृथिव्यामिति च काव्यकल्पलतावृत्तिः)

खली = खली (स्थाल्यां वैदूर्यमय्यां पचति तिलखलीं चान्दनैरिन्धनौघैः, इति भर्तृहरि नीतिशतकम्)

खाट = खट्वा । खाटा = खाटिः (खाटिः शवरथे किणे, इति हेमचन्द्रः ।

खडार् = कडारः (अयं कडारः = 'यो खडार्' इति रिषे उत्थिते प्रयुज्यते नीचाय, वाच्यार्थस्तु

दासः दासत्वं हि निन्द्यमेव तथा च लोकभणितिः
मनुष्यजातौ तुल्यायां दासत्वमतिगर्हितम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र- संस्कृतम्
भाषा

प्रथमो यो न तत्रापि स किं जीवत्सु गण्यते, इति
कडारः पिङ्गले दासे, इति मेदिनी)

खानी=खनिः (खनिः स्त्रियामाकरः, इत्यमरः)
खेलखाल=खालखेलः (खलानामयमित्यर्थेऽण् खेलः=क्रीडा
गारो=गारः (न विद्यते मनोज्ञो गारा यस्मादितिव्युत्पन्नो भवनवाची अगारशब्दः प्रसिद्धः
अनुत्तमं द्रव्यमितिवत्)
गाल्नु=गालनम् (पृथक् पृथग् गालयित्वा लोहं पश्चात् समाहरेत्, इति बृहद्विमानशास्त्रम्)
गोठ=गोष्ठम् (गोष्ठं गोस्थानकम्, इत्यमरः)
गुड=गुडः।
गोल=गोलः (पिण्डः ... गोलसिह्लकयोरपि, इति मेदिनी)
गिद्ध=गृध्रः (गृध्रः खगान्तरे पुंसि, इति मेदिनी)
गोत्र=गोत्रम् (गोत्रं कुलाख्ययोः, इति मेदिनी)
गोरो=गौरः (गौरः श्वेतेऽरुणे पीते विशुद्धे चाभिधेयवत्, इति मेदिनी)
गुलीयो=गुलीयः) मधुरवाचिगुलशब्दादीयसुन् गुलः स्यादिक्षवे पुमान्, इति मेदिनी)
गलो=गलः (द्वावम्भसि निवेष्टव्यौ गले बद्ध्वा दृढां शिलाम्। धनवन्तमदातारं दरिद्रं
चातपस्विनम् इति मार्क्सवादऔररामराज्यम्)
गाली=गाली (ददतु ददतु गालीं गालिमन्तो भवन्तो वयमिह तदभावाद् गालिदानेऽप्यशक्ताः,
इति भर्तृहरिनीतिशतकम्)
गायन्=गायनः (ण्युट्चेनिगैधातोर्ण्युट्प्रत्ययः)
गोठाला=गोपालाः(गोपालो गोपभूपयोः, इति विश्वलोचनः)
गीत=गीतम् (गीतं गानमिति प्रोक्तम्, इति हलायुध)
गुच्छो=गुच्छः (गुच्छो हारकलापयोः, इति हेमचन्द्रः)
गुण्डा=गोण्डः (गोण्डःपामरभेदे स्यात्, इति विश्वलोचनः)
गर्=गरः (गरो विषे चोपविषे) (इति विश्वलोचनः)
घर=घरः (हन्तेरन् घश्चेति दशपाद्युणादि सूत्रम्, घरः=गृहमिति ज्ञानेन्द्रसरस्वती)
घोल्नु=घोलनम् (··· मथितं पुनः क्लीबं निर्जलघोले स्यात्, इति मेदिनी)
घाम=घर्मः (घर्मः स्यादातपे, इति विश्वलोचनः)
घन=घन (घनस्तु मेघ मुस्तायां विस्तारे लोहमुद्गरे, इति विश्वलोचनः)
घट्ट=घट्टः (घट्ट चलने पचाद्यच्)
घोणो=घोणः (घुण भ्रमणे यथा घुट परिवर्तने घोटः प्रसिद्धः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र- संस्कृतम्
भाषा

घाँस = घासः (वालतृणं घास इत्यमरः)
चिठी = चिट्टिः (चिट परप्रेष्ये कर्मणि क्तिन्)
चूर्ण = चूर्णः (चूर्णो धूली, इति मेदिनी)
चूक = चुक्रम् (चुक्रं वृक्षाम्ले चाङ्गेर्यां स्त्री पुंस्यम्लेऽम्लवेतसे, इति मेदिनी)
चोर = चोरः (चुर स्तेये पचाद्यच्)
चवँर = चमरम् (चमरं चामरे, इति मेदिनी)
चोखो = चोक्षः (चोक्षो गीते शुचौ दक्षे, इति मेदिनी)
चोलो = चोलः (चोडः प्रावरणान्तरे इति विश्वलोचनः डलयोरभेदः)
चङ्ङ = चङ्गः (चङ्गस्तु शोभने दक्षे, इति विश्वलोचनः)
चिनो = चिह्नम् (चिह्नमङ्के, इति विश्वलोचनः)
चेप्टो = चिपिटः (चिपिटश्चिपिटे पुंसि पिच्चिते विस्तृतेऽन्यवत्, इति विश्वलोचनः)
चाँडो = चण्डम् (चण्डस्तीव्रे, इति विश्वलोचनः प्रकृते क्रियाविशेषणम्)
चुँड्नु = चुण्डनम् (चुडि अल्पीभावे भावेल्युट्)
चुपचाप = चुपचापम् (चुप मन्दायांगतौ, चप सान्त्वने, क्रमेण कः, घञ्, क्रियाविशेषणम्)
चवाउनु = चर्वणम् (चर्व अदने भावे ल्युट्)
चूषनु = चूषणम् (चूष पाने भावे ल्युट्)
छाया = छाया (छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः, इति मेदिनी)
छाता = छत्रम् ।
छिर्को = सृकः (सृको वातोत्पलसरे, इति विश्वलोचनः)
जेठो = ज्येष्ठः । जाति = जातिः । जात = जातम् (जातिर्जातं च सामान्यम्, इत्यमरः)
जार् = जारः (जारी स्यादोषधीभेदे स्त्रियामुपपतौ पुमान्, इति मेदिनी)
जेमीर् = जम्बीरः (जम्बीरः प्रस्थपुष्पे स्यात् तथा दन्तशठद्रुमे, इति मेदिनी)
जङ्गल = जङ्गलम् (जङ्गलं निर्जनस्थाने, इति मेदिनी)
ज्यापू = ज्यापूः (ज्या = क्षितिः क्षोणिर्ज्या काश्यपी क्षितिः, इत्यमरः, तांपुनातीति खलपूवत्)
जल = जलम् । जीविका = जीविका ।
जरा = जटा (पादो मूलं जटाः शिफाः, इति हलायुधः)
ज्यै (दाङ्गमा बोलिने) ज्या (ज्या तु मातरि, इति हेमचन्द्रः)
जण्ड = जण्डः (जनीप्रादुर्भावे, ञमन्ताड्ड इति डप्रत्ययः प्रवीण इत्यर्थः तदुक्तं नीतौ स जातो येन जातेन याति वंशःसमुन्नतिम्, परिवर्तिनि संसारे मृतःको वा न जायते, इति)
जीरा = जीराः (जीरस्तु जीरे, इति विश्वलोचनः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र- संस्कृतम्
भाषा

जीउधन = जीवधनम् (गोमहिष्यादिकं सर्वं बुधैर्जीवधनं स्मृतमिति हलायुधः)
जाल = जालम् (आनायः पुंसि जालमित्यमरः, मत्वर्थीये, इनौ जाली = फटा)
जङ्‌ग्नु = जञ्जनम् (जजि युद्धे भावे ल्युट्)
झ्याल = जालः (उच्चं हर्म्यं संनिरुद्धाश्च जालाः, इत्यविमारनाटकम्)
झारी = पारी (कर्करी पूरयोः पारी, इति विश्वलोचनः)
झिलिमीली = चिलिमीली (कण्ठीविशेषखद्योतविद्युत्सु चिलिमीलिका, इति विश्वलोचनः)
टाँगो = टङ्गः (टङ्गो ऽस्त्री स्यात् खनित्रके, तथैवास्त्रान्तरे ऽप्यस्त्रीजङ्घायां खङ्गभेदके, इति विश्वलोचनः)

टेकनु = टेकनम् (टिक्र गतौ)
ट्वालट्वाल = ट्वालट्वालम् [ट्वालट्वालं पश्यति क्रियाविशेषणम् ट्वल वैक्लव्ये)
ठेको = काष्ठिक । ठेकी = काष्ठिकी [काश्यादिभ्यष्ठञ्ञिठाविति काष्ठशब्दाट्ठञ्]
ठूलो = स्थूलम् [स्थूलंकूटे ऽथ निष्प्रज्ञे पीवरे ऽप्यन्यलिङ्गक इति मेदिनी]
डोको = डोकः [कटिपृष्ठनिबद्धडोकिनीभिः कपिकान्ताकुटिलावलोकिनीभिः, नृप ! राम ! निरन्तरं क्रियन्ते मगरीभिर्नगरीविडम्बनानि, रामसाहसमये गोरक्षायामागतेन रामसाहस्थितिदर्शनसन्तुष्टमानसेन केनचिदागन्तुककविनोक्तम् ।

डाहा = दाहः [दह भस्मीकरणे भावे घञ्]
डिट्ठा = डित्थं [श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः सर्वशास्त्रार्थवक्ता च डित्थ इत्यभिधीयते, इति कल्पतरुपरिमले]
डोंण = द्रोणः [द्रोणी काष्ठाम्बुवाहिनी, इत्यमरः प्रकृते पुंलिङ्गः]
डर = दरः [दरो ऽस्त्री साध्वसे गर्ते इति मेदिनी]
डोला = दोला [कमठ्यां ना मुनौ दोला नील्यां यानान्तरे ऽपि च, इति मेदिनी]
डाँश = दंशः [दंशस्तु वनमक्षिका, इत्यमरः]
ढुँढ्नु = ढुण्ढनम् [अन्वेषणे ढुढिरयं प्रथितो ऽस्ति धातुः सर्वार्थढुण्ढनतया तव ढुण्ढिनामेति स्कन्दपुराणम्]

ढल्नु = ढलनम् [ढल काशकृत्स्नम्, धातवोऽनेकार्थाः भावेल्युट्]
ढोका = ढौका (ढौकृ...गत्यर्थाः कर्मणि घञ्, ओ वा)
तक्या = मस्तक्या [शरीरावयवाद्यत्, इति हितार्थे मस्तकशब्दाद् यत्]
तीर = तीरम् [कूलं रोधश्च तीरं च, इत्यमरः]
ताप = तापः [तप संतापे भावे घञ्]
तुषारो = तुषारः [तुषारस्तु शीतले शीकरे हिमे, इति मेदिनी]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र- संस्कृतम्
भाषा

तारतम्य = तारतम्यम् [अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः, इत्यात्मबोधः]

तवाँलो = तवालः (तवालः पुंसि वात्यायां वाच्यवन्मारुतासहे, इति मेदिनी)
तान्नु = तानन्नम् (तनु विस्तारे ण्यन्ताल्ल्युट्)
तिहुन् = तेमनम् (तेमनं व्यञ्जने, इति विश्वलोचनः)
तल = तलम् (स्वरूपाधारयोस्तलम् , इति विश्वलोचनः)
त्रिवेणी = त्रिवेणी (वेणी नदीनां सङ्गे स्यादिति विश्वलोचनः)
त्यापत्याप् = तेपतेपम् (तेपृ क्षरणे क्रियाविशेषणम्, जलं तेपतेपं क्षरति)
तोप = तोपः (तुप…हिंसार्थाः पचाद्यच्)
तर्नु = तरणम् (तृप्लवनतरणयोः भावे ल्युट्)
थाल = स्थालम् (अमत्रं भाजनं पात्रं स्थालं तुल्यार्थमुच्यते, इति हलायुधः, स्थालं भाजनभेदे स्यात् स्थाली स्यात् पाटलोखयोः इति च विश्वलोचनः)

थप्नु = स्थापनम् (स्थापनं स्यात् पुंसवने समाधावर्पणेऽपि चेति विश्वलोचनः)
थुर्नु (पिट्नु) = थूर्वणम् (थुर्वी…हिंसार्थाः भावे ल्युट्)
दाल = दालः (दल विशरणे कर्मणि घञ्)
दायी = दायी (दायशब्दाद् भूम्नि मत्वर्थीय इनिः अधिकपितृद्रव्यभागित्वाज्ज्येष्ठे भ्रातरि प्रयुज्यते ऽयं शब्दः तथाच मनुः–ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः शेषास्तमुपजीवेयुर्यथैव पितरं तथा ॥

देवर = देवरः स्वामिनो देवृदेवरौ, इत्यमरः)
दाँत = दन्तः । दूबो = दूर्वा । दाउरा = दारु । दैव = दैवम् । दारिम = दाडिमः ।
दशा = दशा (दशा कर्मविपाकेऽपि, इति विश्वलोचनः)
दास = दासः (दासो भृत्येऽपि, इति विश्वलोचनः)
दादुरा = दर्दुरा [दर्दुरा चण्डिकायां स्याद् , इत्युणादिकोषः]
दारा = दाढा [दाढा दंष्ट्राभिलाषयोः, इति हेमचन्द्रः]
दाम्लो = दाम । दहिलो = देहली [गृहावग्रहणी प्रोक्ता देहली च मनीषिभिरिति हलायुधः]
देखनु = धेकनम् [धेक दर्शने, इत्येके]
दहि = दधि
दुध = दुग्धम्
दुहुनु = दोहनम् [दुह प्रपूरणे भावे ल्युट्]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र- सँस्कृतम्
भाषा

धजो=धजः (धज ध्वज गतौ काशकृत्स्नम् पचाद्यच् यथा ध्वजः प्रसिद्धः)
धरो=धरः (धरो गिरौ ... कार्पासतूलके, इति मेदिनी)
धार्=धारः (खड्गादेर्निशितमुखे धारो ग्रावान्तरेप्यृणे, इति मेदिनी)
धुरन्धर्=धुरन्धरः (धुरन्धरो धवद्रौ ना वाच्यलिङ्गस्तु धूर्वहे, इति मेदिनी)
धाई=धात्री (धात्री जनन्यामलकीवसुमत्युपमातृषु, इति मेदिनी)
धारो=धारा (धारा...प्रपाते स्याद्, इति मेदिनी)
धान=धानम् (निकारःस्यात् परिभवे धानस्योत्क्षेपणेऽपि च, इति विश्वलोचनः)
धन=धनम् ।
धाग=ध्राघः (द्राघृ सामर्थ्ये ध्राघृ इत्यपि केचित्, भावे घञ्)
धूप (घाम)=धूपः (धूप संतापे इगुपधःक)
नासो=न्यासः [भगिनिकेति न्यासो निक्षिप्तः, स्वप्नवासवदत्तनाटकम्)
नन्द=ननान्दा (ननान्दा तु स्वसा पत्युः, इत्यमरः)
नीलो=नीलः ।
नीच=नीचः (नीचस्तु पामरे निम्ने, इति विश्वलोचनः)
निखन्नु=न्युक्षणम् (न्युक्षणं कार्त्स्न्ये इति मेदिनी)
नकि=नकि (नकि निषेधोपमयोः, इति मेदिनी यथा—बलवान् भारं वोढुं समर्थो नकि कृश इत्यादि)
निठुर्=निष्ठुरः (निष्ठुरः कठिनेऽपि स्यात्, इति विश्वलोचनः)
निल्नु=निल्लनम्, नीलनम् (णील णिल्ल, ... छदने, काशकृत्स्नम् भावेल्युट)
नील=नील (लोट्)
निमेष=निमेषः (निमेषनिमिषौ कालभेदे नेत्रनिमीलने, इति विश्वलोचनः)
नाग=नागः [नागो मतङ्गजे सर्पे, इति हेमचन्द्रः]
पट्टी=पट्टी (पट्टः पेषणपाषाणे वृणादीनां च बन्धने, इति मेदिनी प्रकृते स्त्रीलिङ्गः)
प्रसूति=प्रसूतिः । प्रसिद्ध=प्रसिद्धः । प्रख्यात=प्रख्यातः । पञ्चगव्य=पञ्चगव्यम् ।
पानी=पानीयम् (पानीयं तु जले क्लीबम्, इति मेदिनी)
पत्थर्=प्रस्तरः [प्रस्तरो ग्राव्णि, इति मेदिनी]
परिवार=परिवारः (परिवारः परिजने, इति मेदिनी)
पुच्छर=पुच्छम् (पुच्छं तु लाङ्गुलम्, इति हलायुधः)
पालुङ्गो=पालङ्कः (पालङ्कः शाकभेदेऽपि, इति विश्वलोचनः)
पछिनु=प्रसेचनम् (प्रपूर्वात् सिचेल्युंड् भावे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र– संस्कृतम्
भाषा

पिन्जण् = पिञ्जः (व्याकुले वाच्यवत् पिञ्जः, इति विश्वलोचनः)

पक्ष = पक्षः (पक्षो मासार्धके पार्ष्णिग्रहे साध्यविरोधयोः, इति विश्वलोचनः)

पातली = पातिली [मृत्पात्रभेदे वामायां वागुरायां च पातिली, इति विश्वलोचनः]

पातलो = पत्रलम् (द्रप्सं पत्रलमित्यपि इत्यभिधानचिन्तामणिः)

पूल, पूलो = पूलः (पूल संघाते इगुपधः कः)

पेलनु = पेलनम् (पेलृ गतौ भावे ल्युट्)

पेल = पेल (लोट्)

पोल = प्लोष (लोट्)

पोल्नु = प्लोषणम् (प्लुषु दाहे भावे ल्युट्)

पेस गर्नु = पेसनम् (पेसृ गतौ ण्यन्ताल्ल्युट्) पेस गर = पेसय (लोट्)

फुल, फुलो = फुलम् (फुल विकसने काशकृत्स्नम्, इगुपधः कः)

फालो = फालः (फालः पुंसि महादेवे...सीरोपकरणे त्रिषु इति मेदिनी)

फटा = फटा (फटा तु फणदम्भयो,ः इति विश्वलोचनः)

फाँणो = फण्डः (फण धातो, नमन्ताड्ड इत्युणादौ डः फाण्टमित्यस्य वा फाँणो इति)

फाल्नु = फालनम् (ञिफला विशरणे, ण्यन्ताल्ल्युट्, पफाल नृपनन्दनेति मार्कण्डेयपुराणम्)

फाल = फालय

बन्दूक = बन्धूकः (पुष्पवाचि-बन्धूकशब्दपर्यायो भुशुण्डी शब्दः स च नालिकायां प्रसिद्धः, अतो बन्धूकशब्दोऽपि नालिकायां व्यवह्रियमाण आसीदिति प्रतीयते)

बन्धन = बन्धनम् (बन्ध बन्धने ल्युट्)

बन्धु = बन्धुः । बाधा = बाधा ।

बल्यो = बल्यः (बल्यं प्रधानधातौ स्यात् क्लीबं बलकरे त्रिषु, इति मेदिनी)

बलीयो = बलीयः (बलवच्छब्दादीयसुन्)

बादल = बार्दलः (बार्दलो दुर्दिने पुंसीति विश्वलोचनः)

बाङ्गो = बङ्कः (भङ्गुरे वाच्यवद् बङ्क इति विश्वलोचनः)

बराठ = बराकः (बराको वाच्यवच्छोच्ये, इति विश्वलोचनः)

बालुवा = बालुका (बालुका सिकतापि स्यादिति विश्वलोचनः)

बन्धक = बन्धकः (बन्धकः स्याद् विनिमये, इति विश्वलोचनः)

बोल्नु = बोल्लनम् (बोल्लनं भाषणमिति कौटिल्यार्थशास्त्रव्याख्याकृत्) बोल = बोल्ल

भित्तो = भित्तिः (भित्तिः स्त्री कुड्यमित्यमरः)

भ्रम = भ्रमः (भ्रमोऽम्बुनिर्गमे भ्रान्तौ, इति मेदिनी)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र– संस्कृतम्
भाषा

भाला = भाला (भलभल्लपरिभाषणहिंसादानेषु यथा भल्लः प्रसिद्धस्तथासहपटितभल॰ धातोर्भालःस्त्रियां भाला)
भात = भक्तम् (अन्धोऽस्त्री भक्तमित्यमरः)
भट्कनु = भटनम् (प्रगमे भटिरिति विश्वलोचनः)
भाँड्नु = भण्डनम् (भण्डनं खलीकारे, इति विश्वलोचनः)
भुक्नु = बुक्कनम् (बुक्क भषणे भावे ल्युट्)
भण्डाफोर् = भण्डास्फोरः (भडि परिभाषणे भावे अः भण्डा, स्फुर स्फुरणे ण्यन्तादेरच्)
भन = भण (भण...शब्दार्थाः लोट्)
मामा = मामा (मामकं ममतायुक्तं मातृभ्रातरि मामक इति विश्वलोचनः प्रकृते कप्रत्ययरहितः)
माया = माया (माया दम्भे कृपायां चेति विश्वलोचनः)
मुसल = मुसलम् (अयोग्रे मुसलं मतमिति विश्वलोचनः)
मन = मनः (मानसं मन इत्यमरः)
मुड = मुण्डः (मुण्डो मुण्डतशीर्षयोरिति हेमचन्द्रः)
मुर्मुरिएको = मुर्मुरः, रिषले मुर्मुरिएको = रिषमुर्मुरः (मुर्मुरस्तुषदाहेस्यान्मम थे, इतिमेदिनीकोश-निर्दिष्टयोर्वाच्ययोरन्तर्दाहवत्त्वेनमुर्मुरशब्दोऽन्तर्दाहवति वर्तत इति प्रतीयते, मदनतुषा-नलयोरन्तर्दाहकरत्वरूपं सादृश्यञ्च प्रथते यथाः–
शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना, अयं क्व च कुकूलाग्निकर्कशो मदनानलः,
कुकूलः = तुषानलः, तथाच विश्वमेदिन्यौ–कुकूलंशङ्कुसंकीर्णे श्वभ्रे ना तु तुषानले, इति)
मात्रा = मात्रा (मात्रा कर्णविभूषायां वित्तमाने, इति मेदिनी)
माष = माषः (माषो व्रीह्यन्तरे माने, इति विश्वलोचनः)
मसूरो = मसूरः (मसूरो मसुरश्चैव व्रीहिभित्पण्ययोषितोरिति विश्वलोचनः)
मूठी = मुष्टिः (मुष्टिर्बद्धकरे पुंसीति विश्वलोचनः)
मिति = मितिः (मितिर्मानेऽप्यवच्छेदे, इति विश्वलोचनः)
मुडनु = मुण्डनम् (मुण्डनं वपने, इति विश्वलोचनः)
माँच = मञ्चः (मचि धारणोच्छ्रायपूजनेषु पचाद्यच्)
मूर्छा = मूर्छा (मुर्छा मोहनसमुच्छ्राययोः भावे अः)
रिङ्नु = रिङ्गणम् (रिगि...गत्यर्थाः)
रिष = रिषः (रुष रिष हिंसार्थाः रिष्धातोर्घञर्थे कविधानम्, रुषेर्घञि रोषवत्)
रमाइलो = रामिलः (रामिलो रमणे कामे, इति मेदिनी)
रोटी = रोटी (आहाराः पञ्चधा प्रोक्ता देहपुष्टिकराश्शुभाः। अन्नकाञ्जिकपिष्टतद्रोटिका-साररूपत इति बृहद्विमानशास्त्रम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र– संस्कृतम्
भाषा

रण्डी=रण्डा (रण्डा तु पांसुलायां स्त्रीती मेदिनी)
रित्तो=रिक्तम् (रिक्तं शून्ये, इति मेदिनी)
रहस्य=रहस्यम् (रहस्या स्त्री नदीभेदे गोपनीयेऽभिधेयवत् इति मेदिनी)
रजस्वला=रजस्वला (रजस्वला पुष्पवत्यामिति मेदिनी)
राम्रो=रामरः (रामं रातीति रा दाने कर्मण्युपपदे कः, रामस्तु ...पशुभेदे सितश्याममनोज्ञेषु तु वाच्यवत्, इति विश्वलोचनः)
राश=राशिः (राशिस्तु पुञ्जे पुंस्येव तथा मेषवृषादिषु, इति विश्वलोचनः)
रक्षा=रक्षा (रक्षा रक्षणलाक्षयोरिति इति विश्वलोचनः)
रूखो=रूक्षः (रूक्षो वृक्षान्तरे प्रेमशून्यकर्कशयोस्त्रिष्विति विश्वलोचनः)
लूतो=लूता (लूताविस्फोटकादय इति वाराहपुराणम्)
लीला= (लीला केलिविलासयोरिति मेदिनी)
लहुरो=लगुडः (दण्डो ऽस्त्रीलगुडेपुमानिति मेदिनी)
लुब्धो=लुब्धः (लुब्ध आकाङ्क्षिणि व्याधाविति मेदिनी)
लोभी=लोभी (लुभ् धातोर्घञि मत्वर्थीय इनिः)
लगन्=लग्नम् (लग्नं राश्युदये क्लीबमिति मेदिनी)
लम्पट=लम्पटः (लम्पको लम्पटे त्रिष्विति विश्वलोचनः)
लाग्नु=लगनम् (लगे सङ्गे भावे ल्युट्)
लाटो=लाटः (वाग्दोषवाचिनो लटशब्दात् प्रज्ञाद्यणि–लटो दोषेऽपि वाग्दोषे इति विश्वलोचनः, लट वाल्ये इत्यतो वा घञि अर्शआद्यच्)
लुटनु=लुण्टनम् (लुटि स्तेये भावे ल्युट्)
लय=लयः (लयो नृत्यादिसाम्ये स्यादिति इति विश्वलोचनः)
लालचा=लालसा (लालसा तु द्वयोस्तृष्णेति विश्वलोचनः)
वर्को=वर्कः, वर्की=वर्की (वृक आच्छादने काशकृत्स्नम्, पचाद्यच्, स्त्रियां वर्की)
विर्को=वृकः (वृक आच्छादने, काशकृत्स्नम् इगुपधःकः)
वासन=वासनम् (वासनं धूपनेचेति मेदिनी)
विलास=विलासः (विलासो हावलीलयोरिति विश्वलोचनः)
वर्षि=वरासिः (वरासिः स्यादसिश्रेष्ठे, इति विश्वलोचनः)
वर=वटः (बहुपाद् वट इत्यमरः)
वर=वरः (देवाद् वृते वरः पुंसि)
वार=वारः (वृधातोर्घञ् क्तिन्नन्तंरूपं चामरकोशे प्रान्ततो वृत्तिरिति)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र– संस्कृतम्
भाषा

वार=वारः (वारः सूर्यादिवासरे ··· वृन्दावसरयोः क्षणे, इति मेदिनी)
वेदना=वेदना (वेदना ज्ञानदुःखयोरिति मेदिनी)
बाघ=व्याघ्रः (व्याघ्रः स्यात् पुंसि शार्दूले, इति मेदिनी)
बाख्रो=वर्करः (वर्करः पुंस्यिच्छागे, इति मेदिनी)
वेला=वेला (वेला काले च सीमायामिति मेदिनी)
बाटो=वाटः (वाटः पथीति हेमचन्द्रः, वाटो मार्गे वृतिस्थाने, इति च मेदिनी)
बारी=वाटी (वाटी वास्तौ गृहोद्याने, इति हेमचन्द्रः, वाटी स्याद् गृहनिष्कूटे, इति च विश्वलोचनः)
बैठाउनु=वण्ठनम् (वठि एकचर्यायाम्, ल्युट्, वण्ठः कुन्तायुधे, इति हेमचन्द्रः)
बालो=वलयः (वलयः कण्ठरोगे ना कटके पुंनपुंसकमिति मेदिनी)
बाँश=वंशः (वंशो वेणौ, इति विश्वलोचनः)
विष=विषम् (विषं तु गरले जले, इति विश्वलोचनः)
बाच्छो=वत्सः (पुत्रादौ तर्णके वर्षे वत्स इति विश्वलोचनः)
बास=वासः (वासो गृहेऽप्यवस्थाने, इति विश्वलोचनः)
बिरालो=बिडालः (ओतुर्विडालो मार्जार इत्यमरः)
वरण्डा=वरण्डः (वरण्डो मुखरोगे स्यादन्तरावेदिवृन्दयोरिति विश्वलोचनः)
आस्था=आस्था (आस्था त्वालम्बनापेक्षेति विश्वलोचनः)
वेश्ये=वेश्या (वेश्या तु गणिकायां स्यादिति विश्वलोचनः)
बेठान=वेष्टनम् (वेष्ट वेष्टने करणे ल्युट्)
वण्डा=वण्डा (वडि विभाजने, भावे अः)
वेल्नु=वेलनम् (वेलृ चलने भावे ल्युट् रोटीवेलनम्)
बसनु=वसनम् (वस निवासे भावे ल्युट्)
बस=वस (वस निवासे लोट्)
बुडनु=बुडनम् (बुड संवरणे काशकृत्स्नम् भावे ल्युट् कुटादित्वाद् गुणाभावः सहपठित ब्रुडधातुस्तु प्रसिद्धः । ब्रुडनं गण्डकि वाञ्छितार्थदमिति गण्डकीगौरवम्)
बुड=बुड (लोट्)
ब्याज=व्याजः (व्याजः साध्यापदेशयोरिति विश्वलोचनः)
बत्ती=वटी (वर्तिकायां वटी मता)
शूरो=शूरः (शूर विक्रान्तौ पचाद्यच्)
शेवँली=शेवालम् (जलनीली तु शेवालमित्यमरः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपालराष्ट्र- संस्कृतम्
भाषा

शीतल = शीतल (तुषारः शीतल इत्यमरः)
शकुन = शकुनम् (शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकमिति मेदिनी)
शांबो = शम्बः (शम्बःस्यान्मुषलाग्रस्थलोहमण्डलके पवौ, इति मेदिनी)
शिखर्नी = शिखरिणी (स्त्रियां शिखरिणी वृत्तभेदे तक्रप्रभेदयोरिति विश्वलोचनः)
शिथिल = शिथिलम् (शिथिलं श्लथमाख्यातामित्युणादिकोशः)
शुल्ल = श्वल्लम्, पानीयं श्वल्लं वहतीत्यादि, (श्वल्ल आशुगमने पचाद्यच् क्रियाविशेषणम्)
शोक = शोकः (मन्युशोकौ तु शुक् स्त्रियामित्यमरः)
शौता = शौटा (शौटृ गर्वे पचाद्यच् टाप्, मिथो हि सपत्न्यौ एवं प्रदर्शयतः)
शेल (रोटी) = शेलः (शेलृ गतौ पचाद्यच्)
शिक्नु = शिक्षणम् (शिक्ष विद्योपादाने भावे ल्युट्)
शान (उत्कर्ष) = शानः (शान तेजने एरच्)
सम्भार = सम्भारः (सम्भारः सम्भृतौ सङ्घे, इति मेदिनी)
साल (रुखविशेष) = सालः पादपमात्रे स्यात् प्राकारे सर्जपादपे, इति मेदिनी)
स्वांठ् = शोठः (शोठो मूर्खेऽलसेपि चेति मेदिनी)
सिंघान = शिङ्घाणम् (नासामलं तु शिङ्घाणमित्यमरः)
समाप्त = समाप्तः ।
सन्तान = सन्तानः (सन्तानः सन्ततौ गोत्रे, इत्यमरः)
सौभाग्य = सौभाग्यम् (सौभाग्यं सुभगत्वे स्यादिति मेदिनी)
सङ्घर्ष = सङ्घर्षः (सङ्घर्षःस्यात् पुमान् घृष्टौ स्पर्धायामपि दृश्यते, इति मेदिनी)
सीमा = सीमा (मर्यादायां स्त्रियां सीमेति विश्वलोचनः)
सिङ् = शृङ्गम् (विषाणं शृङ्गमुच्यते, इति हलायुधः)
साग = शाकः
स्वाद = स्वादः (स्वद आस्वादने घञ्)
सहनु = सहनम् (षह मर्षणे भावे ल्युट्)
सर्प = सर्पः (सर्पः पृदाकुर्भुजग इत्यमरः)
हठ = हठः (हठादाकृष्टानां कतिपयपदानां रचयितेति पण्डितराजो जगन्नाथः)
हग्नु = हदनम् (हद पुरीषोत्सर्गे भावे ल्युट्)
हली = हली (हली रामे च कर्षके, इति मेदिनी)
हेला = हेला (हेला स्त्रियामवज्ञायामिति मेदिनी)
हांस = हंसः (हंसः स्यान्मानसौकसीति मेदिनी)
हिंड्नु = हिण्डनम् (हिडि गतौ)
हुल् = हुल (हुल गतौ क्विप् समूहगमने प्रयुज्यतेऽयंशब्दः)
हिंड = हिण्ड (हिडि गतौ, अनुदात्त्वेलक्षणात्मनेपदाऽनित्यत्वात् परस्मैपदम्, लोट्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. लोकनाथो ढकालः

वैशेषिकदर्शनस्य वैशिष्ट्यम्

ॐ नमः शिवाय ।

लघुकलेवरे लेखेऽस्मिन् वैशेषिकदर्शनस्य वैशिष्ट्यमेव दर्शनान्तरतो दर्शयितुं यतिष्यते । तत्रादौ दर्शनानामुत्पत्तेः प्रयोजनस्य च कीर्तनं नासङ्गतं भवेदिति संक्षेपतस्तदुच्यते ।

'स ऐक्षत एकोऽहं बहु स्याम्'' इति वेदबोधितेक्षणानन्तरं यदा परमेश्वरो नानानामरूपात्मनाऽऽत्मानं व्यभजत्, तदा मायाऽविद्याप्रकृत्यपरपर्यायादघटितघटनापटीयसः प्रवाहरूपेणानादेरदृष्टात् विविधस्वभावा हिरण्यगर्भादिस्थावरपर्यन्ता जीवा अजायन्त । यत्र समानशुभाशुभकर्मजानां मनुजानामपि सन्निवेशः । तेषां चामन्दचेतनानां प्रकृत्यादिव्यवहाराभावाभावात्, यथेच्छव्यवहारे च जगदुच्छेदप्रसंगात् कर्तव्याकर्तव्यविवेक आवश्यक इति भगवांश्चतुर्वदनः स्ववदनचतुष्टयाच्चतुरो वेदांश्चतुर्भिरुपाङ्गैरङ्गैश्च षड्भिरुपेतानजनयत् निःश्वसितन्यायेन । तथा च श्रूयते "महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इत्यादि ।

तत्रवेदा ऋग्यजुःसामार्थवाख्यश्चत्वारः, आयुर्वेदादीनामुपवेदानामत्रैवान्तर्भावः । षडङ्गानि-शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाणि । उपाङ्गानि तु चत्वारि—पुराणन्यायमीमांसाधर्मशास्त्राणि । तत्र पुराणपदेन उपपुराणाष्टादशमहापुराणानां व्यासादिकृतानां सर्वासामपि पुराणसंहितानाम् न्यायपदेन न्यायवैशेषिकयोर्दर्शनयोः मीमांसापदेन च पूर्वोत्तरमीमांसयोः धर्मशास्त्रपदेन च सर्वासां स्मृतीनां सांख्ययोगयोश्च ग्रहणं विवक्षितमिति वदन्ति विद्वांसः । एतान्येव चतुर्दश विद्यानां मानवकर्तव्यभूतस्य धर्मस्य च स्थानानि कथ्यन्ते । तदुक्तं याज्ञवल्क्येन—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानांधर्मस्य च चतुर्दश ॥इति॥

यदा तु, असुराणामाक्रमणाद्वा देशान्तरेष यातायाताभ्यामथवा बाह्यैः सहाभिसंम्बन्धात्, उत बाह्यभाषाध्ययनादुताहो कदन्नपानादिदौर्मनस्यादाहोस्विद् दुःशासनाद्वा कुतश्चित्कारणान्तराद् बाह्यसंस्कृतिसंस्कृतानि मानवमनांस्यभवन् । ततः सहविद्याभिर्धर्मस्य ग्लानिः समजनि । तदा विद्यानां धर्मस्य च रक्षार्थमीश्वर एव तत्तदाचार्यविग्रहं परिगृह्य वेदोपाङ्गतया पूर्वमेवाविर्भूय शृङ्गग्राहवत्सूक्ष्मतयाऽवस्थितानि तत्तद्दर्शनानि शिष्यप्रशिष्यादिद्वारा विस्तारयामास ।

तत्रेदं श्रुतिगव्याः शृङ्गभूतं वैशेषिकं दर्शनं काश्यपगोत्रिणे, औलूक्याय तपस्यते कणादाय मुनये, उलूकरूपधारिणा पिनाकिना समुपदिष्टमिति किंवदन्ती श्रूयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(वायवीये पुराणे तु सप्तविंशे द्वापरे शिवावतारस्य सोमशर्मणः प्रभासवासिनः शिष्यत्वेनोपवर्णितोऽयं कणादः) अत एवेदं काश्यपौलूक्यकाणादौलूकनामभिरपि प्रसिद्धमभवत् ।

वैशेषिकं नाम त्वस्य दर्शनस्य न भौतिकजगन्मूलकारणानां परमाणूनां परस्परं विशेषकस्य विशेषनामकपदार्थस्य प्रकल्पनादेव, किन्तु दर्शनान्तरतो वैशिष्ट्यबोधकानां सद्युक्तियुक्तत्वादीनां बहूनां विशेषाणां सद्भावादपि सञ्जातमिति मन्यामहे वयम् । तथाहि-दर्शनमिदं सद्युक्तियुक्तत्वात् प्रतिवादिभिरपि मुक्तकण्ठं प्रशंसितम् । यथैतद्दर्शनव्यवस्थापितं तेजोऽभावरूपत्वमन्धकारस्य युक्तं मन्यमानस्य श्रीहर्षस्य महाकवेः खण्डनकारस्यापीत्थ मुद्गारः—"ध्वान्तस्य वामोरु ! विचारणायां वैशेषिकं चारु मतं मतं मे । औलूकमाहुः खलुदर्शनं तत् क्षमं तमस्तत्त्व निरूपणाय ॥" इति (नै. म. का.) ।

एवं पाकजरूपादीनामुत्पत्तिप्रकारः, तत्रातिसूक्ष्माणां क्षणगणानां गणनञ्च । द्वित्वस्योत्पादप्रक्रिया । सर्गप्रलयप्रयोजकयोः संयोगविभागयोः संयोगजविभागजत्वादीनां सुनिरूपणम् । यद्विना जगन्निरीहमेव भवति तस्य कर्मणो महता प्रपञ्चेन सुविचारणञ्चेत्यादयो बहवो विशेषा अस्मिन् दर्शने प्रतिपादिता दृश्यन्ते नान्यत्र ।

किञ्चात्र दर्शने यथा पदार्थप्रतिपादनपद्धतिः साधर्म्यवैधर्म्यप्रदर्शनमुखेन प्रदर्शिता न तथान्यत्र दर्शने दृश्यते यया पिष्टपेषणन्यायेन पदार्थानामधिगतिर्भवति ।

अपि च, आत्मतत्त्वसाक्षात्कार एव दुःखात्यन्तनिवृत्तिरूपमोक्षोपाय इति "तमेव विदित्वाऽति मृत्युमेति नान्यः पन्थाविद्यतेऽयनाय" इत्यादिश्रुतिभिरादिश्यते । आत्मतत्त्वसाक्षात्कारश्च श्रवण-मननभावनाभिर्भावनीय इति "आत्मावारे द्रष्टव्यः श्रोतव्यः" इत्यादिवेद एव वेदयति । तत्र मननं नाम श्रुतिश्रुत आत्मनि, अश्रद्धामलक्षालनार्थमितरभेदानुमानम् । तच्च व्याप्तिप्रमाधीनम्, व्याप्तिप्रमा च सकलपदार्थ यथार्थज्ञानसापेक्षा । सर्वपदार्थानां यथार्थज्ञानं विना क्वचिद्व्यभिचारः स्यादिति शङ्कया हेतौ साध्यव्यभिचाराभावरूपव्याप्तिप्रमितेरसम्भवात् । तथा च सकलपदार्थप्रमापकं पदार्थशास्त्रमिदं मुमुक्षुभिः समभ्यसनीयमेव ।

न केवलं कैवल्यलिप्सुभिरेव किन्तु सकलसंसारिमनुजैरपीदं सम्यगध्येतव्यमेव । कथमन्यथा इष्टसाधनत्वाद्यनुमानाधीनः प्रवृत्त्यादिव्यवहारः ? पूर्वोक्तरीत्याऽनुमानस्य व्यभिचारविरहात्मकव्याप्तिप्रमाधीनत्वात् तत्प्रमायाश्च समस्तपदार्थतत्त्वज्ञानसापेक्षत्वात् । अपरिशीलितैतद्दर्शनानां पुरुषाणां प्रवृत्त्यादिव्यवहारस्तु चार्वाकाणामिव सन्देहादेव कथञ्चिदिति सिद्धान्तः ।

एवञ्चानुमानप्रामाण्यमुररीकुर्वद्भिः सर्वैरेव दार्शनिकैः स्वदर्शनोपजीव्यतया पदार्थशास्त्रमिदं सुपरिशीलनीयम् । नहि दार्शनिकैरन्यैर्द्रव्यादयः पदार्थाः प्रपञ्चतः प्रविवेचिताः। न च तेषां तथा प्रविवेकं विना स्वदर्शननगरप्रतिष्ठा संभवति । अत एवास्य दर्शनस्य षड्दर्शनेषु षडङ्गेषु शिरस इवाभ्यर्हिततमं स्थानमस्ति ।

यथा पाणिनीयं व्याकरणं सुपष्कृततया लौकिकवैदिकशब्दानामनुशासनतया च व्याकरणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तरतोविशिष्टं विद्यते, तथैवेदं दर्शनमपि समीचीनयुक्तियुक्ततया लौकिकालौकिकसकलपदार्थ-प्रतिपादकतया च दर्शनान्तरतो वैशिष्ट्यं बिभर्ति ।

पदार्थशास्त्रतया चास्य पदशास्त्रवत् सर्वशास्त्रोपकारकत्वं "प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्" (न्या० भा०) "काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्"।। "शास्त्रान्तराभ्यसनयोग्यतया युनक्ति" (वि० गु० चं०) इत्यादयो विदुषामुक्तयः सङ्गच्छन्ते ।

इत्थं भोगापवर्गप्रदेनानेन दर्शनेन भौतिकानाम् आध्यात्मिकानाञ्च पदार्थानां रहस्यमयं विवरणं विदधत् भौतिकवैज्ञानिकानपि अतिशयानो विकीर्णकणकृतप्राणरक्षः कणभक्षो महामुनिर्न महावैज्ञानिकगणेषु गणनीयतामेवार्हति किन्तु सर्वप्रथमतः परमाणूनां परिचयं कारयन् तेषां परस्परविश्लेषकं सूक्ष्मतमं विशेषनामकं पदार्थं च प्रतिष्ठापयन् प्रथमवैज्ञानिकपदमप्यधितिष्ठति इति शम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. जुननाथः पण्डितः

अभिलेखालयो नेपालस्थः

अयि सुरसरस्वतीरसास्वादनसरसरसना विर्गलिताशनवसनविलसना अनवद्यविद्याभ्यसनव्यसना विद्वांसः, अद्य प्रमोदस्य विषयोऽयं यत्—भारत–साहाय्येन पुरातत्त्वान्वेषणसन्दर्भे नेपालदेशेऽपि एकोऽभिलेखालयः स्थापितः। अत्र प्राधान्येन संस्कृतभाषायां विद्यमाना इतिहास–सामग्री संचीयते। तदर्थंच संस्कृतग्रन्थाः शिलालेखादयश्च संगृह्यन्ते। अतश्चेदं स्थानं प्राधान्येन संस्कृतज्ञविदुषां कर्मक्षेत्रं भवितुमर्हम्।

सृष्टेरारभ्य मानवजीवनं विकसदेव प्रवर्तते। पाषाणयुगं मानवजीवनस्य मूलभूतमित्याहुः। तदा लोकः असभ्यजीवनमधिष्ठितः। निवृत्तिमात्रप्रवणं हि जीवनमसभ्यमिति परिभाषितमद्यतनानाम्। स हि वन्यानां फलानां कन्दमूलानां तृणानां किसलयानां वन्यजन्तूनां वाऽऽहारं वर्तयन् महता कालव्यवधानेन वैदिकयुगमवतीर्णः। तस्मिन् युगे चतुरस्रं सर्वतोदिक्कं वा प्रसरन् मानवः आध्यात्मिकीमाधिदैविकीमाधिभौतिकीञ्च प्रगतिमवाप। मानवो वैदिकयुग एव सुखमयीं जीवनजवनिकामपश्यत्।

मानवः पशुभ्यो भिन्नः। स यथा विषयोपभोगं करोति न तथा पशवः। यथा यथा विज्ञानं विकसितं तथा तथा भोगा अपि विकसिताः पशवो यथा प्राचीनास्तथैव नवीना अपि न भोगार्थं विकसिताः, न वा ते नवीनां रीतिं वस्तुसम्पत्तिं वा लभन्ते। यच्च यावत् सुख–साधनं सुखञ्च जीवानामनुसन्धीयते तदेतत्सर्वमपि मानवमस्तिष्कविलासः। प्रकृतेर्यावन्तो गतिविधयः ते सर्वेऽपि मानवैरन्विष्य यथायथं विमृश्यमाना भोगार्थं विनियुक्ताः। एवं ज्ञानविज्ञानवैचित्र्यं पुराणेतिहासगम्यं सर्वजनीनम्। तत्र मोक्षे धीर्ज्ञानमुच्यते, शिल्पशास्त्रयोश्च बुद्धि–र्विज्ञानमिति तद्विदः। अध्यात्मज्ञानन्तु भारतस्य प्रसिद्धमेव।

तत्र विज्ञानविषयमवलम्ब्य किंचिदुच्यते। जीवस्य क्षुत्पिपासे मातृगर्भादेव प्रादुर्भवतः। मानवः कृषिविज्ञानं पाकशास्त्रं च क्षुन्निवृत्त्यर्थमेवानुसन्दधे। नैतावता तुष्टिरभूत् भोजनपरिभाषायै इति आयुर्वेदविज्ञानं प्रादुर्भूतम्। एतच्च लोकेऽत्यन्तं हितकरं सिद्धम्। गृहरचनाप्रसाधनकर्मादिकर्माधिकृत्य गणितस्य सविशेषं ज्यामितेः प्रयोगः समुद्भासितः शुल्वसूत्रेषु पक्षि–कच्छप–रथचक्र–वृत्त–समत्रिबाहुत्रिभुजादीनां सदृश्यो वेदिका वर्ण्यमाना ज्यामितेःकांचित्प्रकर्षावस्थां बोधयन्ति। कृषिविज्ञानाय वनस्पतिशास्त्रस्य भौतिकविज्ञानस्य रसायनशास्त्रस्य भूतत्त्वविद्यायाश्च आवश्यकमभूत्। कालपरिमाणं खगोलं गृहांश्चाधिकृत्य गणितोपज्ञं महान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समारम्भः प्रादुर्भूतः। एवं विज्ञानानां प्रगतिमापन्ना व्यवहाराश्च प्रयोगरूपेण सिन्धुसभ्यतायां स्पष्टमुपलभ्यन्ते।

दर्शनशास्त्रेषु तु आध्यात्मिकमाधिदैविकमाधिभौतिकञ्च वैज्ञानिकविश्लेषणं नितान्तं हृदयग्राहि विद्वज्जनवेद्यं प्रसिद्धमेव। अतश्च संस्कृतवाङ्मयं सर्वमपि ज्ञानविज्ञानव्याख्यानरूपं सिद्धयति इति वक्तुं नात्युक्तिः स्यात्।

पुराणेषु आकाशवाणी-विमानादीनां वर्णनं किमपि वैचित्र्यं कुर्यात्। परन्तु ऋग्वेद एव विमानस्य वर्णनं श्रूयमानं नितरां चेतश्चमत्काराय स्यात्।

अनश्वो जातो अनभीषुरुक्थो
रथस्त्रिचक्रः परिवर्तते रजः।
महत् तद्वो देव्यस्य प्रवाचनं
द्यामृभवः पृथिवी यच्च पुष्यथ

अत्र सायणभाष्यानुसारम् अश्वरहितस्य त्रिचक्रस्य अन्तरिक्षभ्रमणशीलस्य रथस्य वर्णनं स्पष्टमस्ति। तदेतद् विमानमेवेति केषांचन वेदविदां विदुषां मतम्।

संस्कृतसाहित्ये एवंविधानि परःसहस्रं प्रमाणानि सुलभानि। प्रयोगविषयोऽपि तत्तच्छास्त्रं निपुणतरं मृगयतां सुप्रापाः स्युः विमानरचनाविधिः समराङ्गणसूत्रे भरद्वाजरचिते विमानशास्त्रे च सम्प्रति उपलब्धः। भरद्वाजग्रन्थः मैसूरनगरस्य एकेडमी आफ् संस्कृतरिसर्च-नामकसंस्थायाः संचालकेन प्राप्तस्तत्रैव सुरक्षितो वर्तते भरद्वाजरचितमेव यन्त्रसर्वस्वमपि बडौदाराज्ये हस्तलिखितं खण्डितं सम्प्रति उपलब्धम्। तस्य बोधानन्दकृतवृत्तिसहितम् 'वैमानिकप्रकरणं' मुद्रितमिति चाहुः। एवं नेपालस्याभिलेखालयमनुसन्दधतामपि अपूर्वग्रन्थरत्नानि प्राप्येरन्।

आर्यावर्तभूमिः ज्ञानिनां तपस्विनां कवीनां कलाकाराणां शिल्पिनां वैज्ञानिकानां श्रमिणां वीराणाञ्च देशः। एषां पावनानि यशांसि अद्यापि पृथिव्यां मानवतायाः प्ररणायै प्राणा नाधमन्ति। निसर्गरमणीयास्तदीया अतुला ज्ञानविज्ञानसम्पत्तयो विदेशेषु साक्षात् परंपरया च विकसन्त्यो विद्योतन्ते। अस्माकं प्रमादात् अमूल्यनिधिर्विदेशं प्राप्तः। तदस्य किञ्चिद् विवरणमितिहासलब्धं प्रदर्श्यते।

चीनजापानामेरिकेङ्ग्लेण्डप्रभृतिदेशेषु गतानाममूल्यग्रन्थानां मुद्राणां शिलालेखानां शस्त्राणामस्त्राणां शिल्पकलानाञ्च सम्यगियत्तां वक्तुं नशक्यते। तत्तद्देशीयाभिलेखालयपुस्तकालयेषु भाषया लिपिभिस्ताडपत्राद्याकारैश्च स्पष्टं दृश्यमानानामार्यावर्तीयत्वरूपमभिव्यञ्जयन्तीनामुक्तसम्पदां सुरक्षिता स्थितिरपि नातीव सुखावहा भ्रष्टसम्पदामस्माकम्। धर्मशिक्षाग्रहणमिषेण तीर्थयात्राव्याजेन देशदर्शनच्छद्मना पुरातत्त्वान्वेषणच्छलेन अपरिमितद्रव्यबलेन च सहागतैर्वैदेशिकैर्विदुषां गृहेभ्यो मठमन्दिरेभ्यः भूमिसाद् तेभ्यो वा भग्नावशेषेभ्यो बालुकागर्तेभ्यश्च विविधोपायैरासाद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हन्त ! मारवन्ति पुस्तकानि अन्यान्यपि वस्तुरत्नानि विदेशं नीतानि। प्राचीनेषु मिश्रासीरियावेबिलोनदेशेष्विव आर्यावर्ताख्येऽस्मिन् प्राचीनदेशेऽपि पुस्तकालयानामपूर्वाऽर्भख्या आसीत्। तक्षशिला—विक्रमशिला—नालन्दा—नवद्वीप—मिथिलासु काशीकाश्मीरनेपालेषु असंख्येष बौद्धविहारेषु जैनोगाश्रयेषु चागणितानां संस्कृतग्रन्थानां संग्रहः प्रसिद्ध एवेति पुरावृत्तविदां न प्रमापयितव्यम् । नेपालभारतयोरेवमभिलेखालयानां कीटभक्षणादिविनाशहेतुभ्यो विदेशगमनाच्च परिरक्षणार्थमावश्यकताऽनुभूयते ।

राष्ट्रभेदेऽपि नेपालभारतयोः आर्यभूमितया भारतवर्षतया च देशैक्यमध्यवसीयते । जातिधर्मसंस्कृतिपरम्परादिभिश्च कारणैर्ऋषिसन्तानतया तन्निदेशवर्तितया च एतद्देशवासिनामभिन्नता । अतश्च एकस्य हानिरन्यस्यापि हानिः स्मर्यते। एवं सति हिमालयात् कन्याकुमारीं यावत् आसिन्धोरामणिपूरं संस्कृतग्रन्थानां संग्रहो विदुषां कुलेषु क्वचिदन्यत्र वा यदि श्रूयेत ज्ञायेय वा तदा तद्रक्षणं द्वयोरपि देशयोः कर्तव्येष्वन्यतमं भवति।

चीनदेशे विक्रमवर्षारम्भात्पूर्वमेव बौद्धधर्मस्य प्रवश इतिहाससम्मतः । मिंगनाम्ना चीनशासकेन द्वितीयशताब्द्यां बौद्धपण्डितानां भारतयात्रायै प्रस्थापनं, भारताच्च काश्यपमातङ्गस्य (किया–एह–मोतांग) गोवर्धनस्य च (धु–फा–लन) चीनगमनं चीनभाषायां भारतीयग्रन्थानामनुवादकार्यं चेतिहासवेद्यम् ।

बुनाम्न्या राजमहिष्या [५७५ वि०] द्वौ पण्डितौ सुंगयुनः हुइसगश्च भारतं प्रहितौ । ताभ्यां १७०पुस्तकानि चीनदेशं प्रापितानि । एवम् बुनाम्ना चीनसम्राजा (५९६वि०) मगधदेशं प्रेषिता बौद्धपण्डिताः तत्कालीनेन मगधराजेन जीवगुप्तेन समादृताः पुस्तकैः परमार्थनाम्ना पण्डितेन च सहैव चीनं प्रेषिताः। चीनाम्ना राज्ञा [६३१वि०] भारतं प्रेषितैः पण्डितैः पुस्तकानां सार्धद्विशती नीता ।

एतत्तु प्रसिद्धतरमेव यत् – फाहियानहुएनत्सांग – इत्सिगनामभिः परिव्राजकैः परःसहस्रं पुस्तकानि अभिलेखादीनि च चीनदेशं गमितानि । 'फाहियानः पञ्चदशवर्षाणि भारतं बभ्राम। हुएनत्सांगः सप्तदशवर्षाणि वसन् संगृह्य भगवतो बुद्धस्य स्वर्णरजतमूर्तीः विशत्यश्वैः ६५७ संख्यकान् बृहत्कायांश्च ग्रन्थान् चीनमनैषीत् इति विन्सेंटस्मिताभिधानस्य सुप्रसिद्धेतिहासकारस्य लेखादवगम्यते । ईत्सिगश्च यवमलयसुमात्रादिदेशेषु संस्कृतभाषां सम्यगवगत्य भारतवर्षमाययौ। तत्र विद्याकेन्द्रेषु ऐतिहासिकस्थलेषु भ्रमन् चतुःशतानि पुस्तकानि स्वदेशमनयत् । एवम् शिहचेमंग—फायंगप्रभृतिभिरपि भिक्षुकैः पुस्तकानि नीतानि । चीनदेशे प्रायेण संस्कृतपुस्तकानि गतानि । सिंहलद्वीपादपि १५०० ग्रन्थाः चीनदेशं प्राप्ता इति इतिहासविदुषां मतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्रति चीनराष्ट्रे षण्णां बृहत्पुस्तकालयानां मध्ये राष्ट्रिय-पीकिंग-पुस्तकालयो विश्वस्मिन् बृहत्तमपुस्तकालयेष्वन्यतमो गण्यते । अत्र स्वदेशीयविदेशीयभाषामयानि पञ्चविंशतिलक्षाणि पुस्तकानि सुरक्षितानि सन्ति ।

चीनदेशादेव षष्ठ्यां शताब्द्यां जापानदेशे बौद्धधर्मस्य प्रवेशः अभूत् । चीनदेशादेव तत्र संस्कृतग्रन्थानाञ्च प्रवेशः । एवम् कानजुर-तानजुरनामक-बौद्धसंग्रहालयादिषु तिब्बतदेशेऽपि संस्कृतपुस्तकानि प्रचुरमात्रया सञ्चितानि प्राप्यन्ते ।

बृटेनदेशे 'इण्डिया-अफिसपुस्तकालय'नाम्नि पुस्तकालये संप्रति सार्धद्विलक्षाणि पुस्तकानि सन्ति । तेषु विंशतिसहस्राणि हस्तलिखितानि सन्ति येषां विश्वस्मिन् क्वापि नान्या प्रतिलिपिर्लभ्यते, तानि सर्वाणि भारतीयान्येवेतीतिहासविदः । पुस्तकालये सप्ततिसहस्राणि यूरोपीयभाषामयपुस्तकानि सन्ति । पञ्चनवतिभाषाणां पुस्तकानि तत्र संगृहीतानि सन्तीति तद्विदः । एतदतिरिच्यैव लन्दननगरे एशियाटिकसोसाइटी-बृटिशसंग्रहालय-कमनवेल्थसंग्रहालयेषु कलारूपेण ग्रन्थाद्याकारेण च भारतीयज्ञानज्योतिः प्रकाशते ।

एवमेव अरबपारसीकतुरुष्कमिश्रयवनजर्मनिदेशेषु अमेरिकायाञ्च भारतीयानां ग्रन्थानां राशयो मूलरूपेण अनुवादरूपेण वा पुस्तकालयानामभिलेखालयानां वा शोभां गौरवं च वर्धयन्तः सुरक्षिताः सन्ति ।

पञ्चमशताब्दी- षष्ठशताब्द्यौ भारतीयसांस्कृतिकाभ्युदयस्य स्वर्णयुगमासीत् । जगद्विख्यातो नालन्दाविद्यापीठः एतद्युगस्य ज्वलदुदाहरणम् । विक्रमपूर्वं यथा तक्षशिला विश्वस्य ज्ञान—केन्द्रः तथैव नालन्दाविश्वविद्यालयोऽपि । तत्र खलु पृथिव्याः सर्वेभ्योऽपि कोणेभ्यो विद्यां गृहीतुं विद्यार्थिन आगच्छन्तिस्म । ते च च्छात्रा यथासंग्रहं स्वस्वपुस्तकान्यनयन् । तत्समये हिन्दूनां देवमन्दिरेषु राजप्रासादेषु च महान्तः संस्कृतपुस्तकानां संग्रहालया अतिष्ठन्त । ओदन्तापुरीयविहार-विक्रमशिलाविश्वविद्यालययोश्च नालन्दासंग्रहालयविघटनानन्तरं मनोहराः पुस्तकसंग्रहालया अवर्तन्त । कीर्तिशालिनो भोजराजस्य पुस्तकभवनमद्यापि वर्तते । तच्च मूकशब्दैरिव स्वगौरवमतीतं वैभवञ्चाख्याति । प्रसिद्धेषु एषु स्थानेषु अन्येषु वा मुस्लिमविजेतृभिरग्निसात्कृतानां पुस्तकानां हृदयविदारकमितिवृत्तमिह नोद्घाटयते । किन्तु गैरोलामतानुसारमीदृग्विप्लवे पलायिता विद्वांसो नेपालं शरणीकुर्वन्तो ग्रन्थरत्नैः स्वकीयैः सह जग्मुः। तत्सम्यद्रूपेण समानीतानि अनर्घ्यपुस्तकानि तदपत्यपरम्परारक्षितानि तेभ्यो मूल्यार्पणेन लब्ध्वा अन्यान्यपि च पुस्तकानि संचिन्वानो राजकीयपुस्तकालयो यथायोगं रक्षाप्रबन्धं कुर्वन्नासीत् । सोऽयं 'दरबारपुस्तकालयः' 'वीरपुस्तकालय' इति वा नाम्ना प्रसिद्धिगतोऽपि सम्प्रति 'अभिलेखालय' इति नाम्ना सिंहप्रासादनिकटे नवीनभवने स्थानान्तरितः । अत्र च त्रिंशत्सहस्राणि हस्तलिखितपुस्तकानि, शिला-लेखा विविधानि कलावस्तूनि च संगृहीतानि सन्ति ।

नेपालस्य हस्तलिखितपुस्तकालयेषु "वीरपुस्तकालयः" सर्वप्रथमस्थानं धत्ते । तस्यायमधोनिर्दिष्ट इतिहासांशः तत्पुस्तकालयाध्यक्ष— पं. बुद्धिसागरपराजुलीलेखादुद्धृतः, यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'इतिहासस्य मन्दप्रकाशे प्रतीतो लिच्छविकालीनो मल्लकालीनश्च पुस्तकसंग्रहः बङ्गशासकस्य शमशुद्दीनस्य नेपालदेशीयध्वंसात्मकरणनीतौ प्रायेण विनष्टः। तदनन्तरं च १८२५ वि. वर्षे महामहाराजाधिराजः पृथ्वीनारायणसाहदेवः बृहन्नेपालराष्ट्रं स्थिरीकृत्य हनुमत्प्रासादे बहून् दुर्लभान् ग्रन्थान् संजग्राह। ततः १८६६ वि. वर्षे श्री ५ गीर्वाणसाहदेव आवश्यकोपकरणैः पं. केदारनाथ-झा-पण्डित-साहाय्येन पुस्तकालयस्य सूत्रपातं चकार। तत्र संगृहीतानि पुस्तकानि श्री ३ जङ्गबहादुरसमये दरवारपाठशालाया अन्धकोष्ठे स्थित्वा दुरवस्थामन्वभूवन्। स हि विद्याविरोधिनीतिं स्वीकृतवान्। ततो वीरशमशेरो घण्टागृहं पुस्तकभवनं च निर्माय दरवारपाठशालातः पुस्तकान्यानीय तत्र स्थापितवान्। भारतीयपुस्तकानां सर्वेक्षणावसरे तदात्व एव म० म० हरप्रसादशास्त्रिणा तत्रत्यानां कियतां ग्रन्थरत्नानां सूचीसम्पादनं कृतम्। तच्च भागद्वये तदैव मुद्रितमपि, तेन च सूचीपत्रेणास्य पुस्तकालयस्यान्ताराष्ट्रियख्यातिर्जनिता।

ततः १९८५ वि.वर्षे च स्वर्गीय – पं.हेमराजाह्वयस्य राजगुरोस्तत्त्वावधाने पुस्तकानामनुसन्धानं कृत्वा त्रिभिर्भागैः बृहत्सूचीपत्रं सम्पादितम्। तदेतत्सुरक्षितमस्ति। सम्प्रति पुस्तकालयः प्राचीनहस्तलिखितपुस्तकेषु प्रतिशतं ५० वृद्धिमनुभवति। श्रूयते–'आंग्ल-गोर्खायुद्धसमये जर्मनिदेशीयैः नेपालदेशात्नीतानि ५००० पञ्चसहस्रग्रन्थरत्नानि जर्मनिपुस्तकालयेषु प्राप्यन्ते' इति।

नेपाले कर्णालीप्रदेशे बलिष्ठं मल्लशासनमितिहासात्सिध्यति। तत्समये काष्ठमण्डपस्थमल्लसमये च विद्वद्भिर्विरचिता विविधा ग्रन्था राजप्रासादे विदुषां संग्रहे च समचीयन्त। पालपा – तनहुंप्रदेशीयसेनवंशनृपतिभिः, गोरखाराज्ये साहवंशनृपतिभिश्च विद्याप्रचाराय अनेकसाधनानि रचितानि अभूवन्। इत्थं च अनेकहस्तलिखितसंस्कृतग्रन्थसम्पदा नेपालदेशः परिपूर्ण आसीत्।

संस्कृतवाङ्मयपरिशीलनपरः संस्कृतभाषाविशेषज्ञो जर्मनिदेशीयो विद्वान् मैक्समूलरः (१८८० –१९६७ वि.) "India : What can it teach us" इतिनाम्नि पुस्तके भारतीयानां हस्तलिखितसंस्कृतग्रन्थानां मुक्तकण्ठं वर्णनंकृत्वापाश्चात्यानाम्प्रेरणायै शङ्खं दध्मौ, ततो हस्तलिखितसस्कृतपुस्तकानुसन्धानजागर्तिमासाद्य विलियम––जोन्समहाशयेन १८४१ वि. वर्षे कालिकातानगरे 'एशियाटिकसोसाईटी' इतिनाम्नी संस्था स्थापिता। तदनन्तरं संस्कृतज्ञो हेनरीटामस–कोलब्रुकः १८६४ विक्रमवर्षे तत्संस्थाया अध्यक्षतां वहन् बहुशः संस्कृतग्रन्थाननुसन्धाय विनाशहेतुभ्यः अरक्षीत्। मैक्समूलरप्रेरितेन डा. बूलरमहाशयेनापि मुम्बापूर्यां 'बम्बै–संस्कृतसीरीज' इति नाम्नी ग्रन्थमाला प्रकाशिता। अनेन चानु संहितानां ग्रन्थानां त्रयोविंशतिः शतानि महत्त्वपूर्णानि संस्कृतहस्तलिखितपुस्तकानि यूरोपदेशं नीतानि। तानि चाद्यत्वे 'एलिफिसटन'–महाविद्यालयीये पुस्तकालये बर्लिनविश्व विद्यालये 'इण्डिआ आंफस–पुस्तकालये'च संस्थाशोभायै सुरक्षितानि सन्ति। भारतीयमुद्रितपुस्तकानि कलावस्तूनि च एषु सुव्यवस्थितानि प्राप्यन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डा. अफ्रेक्टमहाशयेन तु कीलहार्न—बूहलर—पीटर्सन—भाण्डारकर— बर्नेल—मेकेंजी—कोलब्रूक—गायकवाड—राधाकृष्णप्रभृतिभिरनेकैरनुसन्धातृभिः कृतान्यन्वेषणविवरणानि आलोड्य एकं सूचीपत्राणां सूचीपत्रम् (कैटेलोगस् कैटोलोगरम्) त्रिषु भागेषु विभज्य सम्पादितम् । तदिदं संस्कृतग्रन्थसूचीपत्रम् २००६ वि.वर्षे मद्रविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण डा. सी. कुह्नराजेन तत्सहायकेन डा. वी. राघवन–महाशयेन च संशोधितपरिवर्धितरूपेण सम्पाद्य प्रकाशितम् । तदेनं हस्तलिखित-संस्कृतग्रन्थानां संकलनविवरणकरणादिकमपि गौरवायत इति अनेके भारतीयाः पश्चात्याश्च संघटिताः सन्ति । इत्थं च विशेषतः 'इण्डिया-आफिसपुस्तकालय'स्य प्राच्यविभागो विदुषां हृदि किमपि कुतूहलञ्जनयन् पञ्चभिरुपविभागैः मुद्रित-पुस्तकविभागहस्तलिखितग्रन्थविभागचित्रकलाविभागच्छायाचित्र (फोटो) विभागप्रकीर्णवस्तु-विभागनामभिः सुव्यवस्थितः अप्रतिमरूपेण प्रकाशमानं भारतीयमतीतज्ञानविज्ञानगौरवं विश्वतो विकिरति । विश्वस्मिन् एष एवैको बृहत्तमः संग्रहालयो भारतीयपुरातत्त्वानाम् ।

ऋषीणामृषिकल्पानां चास्मत्पूर्वजानां शास्त्राभ्यसनरचनपराणि पावनानि तपोमयदिनानि नदीसमुद्रतटेषु वनवनोपान्तेषु विन्ध्यहिमगिरिकाननेषु स्वानुकूलवातावरणेषु व्यतीयुः। क्व कस्यर्षेस्त-पोभूमिरासीदिति स्वल्पानामेवाहृत्य वक्तुं शक्यते । देवघट्टतीर्थे वृद्धैरङ्गीक्रियमाणो वसिष्ठाश्रमो नेपाले चित्रवने चिरात् प्रसिद्धः। महर्षेर्वाल्मीकेराश्रमस्तु सम्प्रत्यन्वेणलब्धोवाल्मीकिनगराभिधामभजदिति अभिनवैववार्ता । एवं याज्ञवल्क्यस्य मिथिला विश्वामित्रस्य कौकिशीनदी तपोभूमिरिति न विवदित-व्यम् । पुलहस्यापि नेपालगण्डकीतटं तपोभूमिरितङ्गीकृत्यमस्ति । गौतमागस्त्यादयस्तु महर्षयो दक्षिण-भारतमेवालञ्चक्रुरिति निश्चितम् । ऋषिभिःप्रवर्तितानि गुरुकुलानि तत्र तत्र विद्यापरम्परां जनयन्ति परिचितानि । एवं विकासक्रमेण विदुषां कुशाग्रबुद्धिषु नैकश आविर्भावा अभायन्त इव हिमालयकन्याकुमार्योरन्तराले भारतभूमौ प्रास्फुटन् ।

भारतीयसम्पदां लोभेनाभिभूता विद्यारसिकाश्च पाश्चात्त्या विद्वांसो यूरोपीयान् संग्रहालयान् हस्तलिखितसंस्कृतादिग्रन्थैः पुरातत्त्वसामग्रीभिश्च अधिकाधिकं पूरयितुं भारतवर्षं समन्तादनु-सन्दधिरे । तदन्वेषणक्रमे नेपालदेशोऽपि गृहीतः । भारतीया विद्वांसश्च केचनेतिहासपरिशोधनसन्दर्भे पुरातत्त्वजिज्ञासया साहवंशीयशासनसमये आजग्मुः । साहकालात्पूर्वं चीनतिब्बतयोर्नेपालस्य सम्बन्धस्तु नातीव गुप्ततरः। तदा खलु शिष्टमण्डलानां गमनागमनं परस्परमुपहारप्रदानव्यवहार-श्चेतिहाससिद्धः । तदवसरे विदेशीयैरात्मसात्कृतानां मूल्यवतां हस्तलिखितसंस्कृतादिपुस्तकानां कला-वस्तूनाञ्चेयत्तां परिच्छेत्तुं किमपि साधनं नास्ति ।

पाश्चात्या गवेषकाः प्रायेण साहकाले नेपालं प्रविष्टाः। तत्र कर्कपेट्रिकः एकोनविंशति-शताब्द्यां नेपालं प्रविष्टः । स च सहैवामूल्यहस्तलिखितसंस्कृतादिपुस्तकैर्विविधकलावस्तुभिश्च गतः। ततो ह्यामिल्टनः, ततो हड्सनश्च नेपालमागतौ । तौ च हस्तलिखितपुस्तकानि प्राचीनकलावस्तु-रत्नानि चादाय स्वदेशं प्रति निवृत्तौ । ततः राइटो नेपालेतिहासानुसन्धानकृद् वंशावल्याअनुवादकश्च नेपालदेशादनेकवस्तूनि स्वदेशं निन्ये । भारतीयौ भगवानलालजी–इन्द्रलालजीत्याख्यौ द्वावपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिलालेखसम्पादको, यूरोपीयो वेण्डालो नेपालस्थप्राचीनग्रन्थानुसन्धानकृत्, संस्कृतज्ञःप्रसिद्धो विद्वान् सिल्भेनलेभिर्नेपालेतिहासलेखकः, ल्याण्डनः 'नेपाल'-लेखकः, टर्नरो नेपालीभाषाशब्दकोशकृत्, टूचीः नेपालेतिहासलेखकः, पेटेकः हस्तलिखितपुस्तकाधारेणनेपालेतिहासलेखकः, नोलीः नेपालशिलालेखसम्पादकः, पं.हरप्रसादशास्त्री वीरपुस्तकालयस्य सूचीसम्पादकः, राजेन्द्रलालः संस्कृतहस्तलिखितग्रन्थानां सूचीसम्पादकः, वि.भट्टाचार्यः वीरपुस्तकालसस्थग्रन्थानुसन्धानकृद् बुद्धमूर्तिकलाविच्च, इमे सर्वेऽपि नेपालदेशं प्राप्य अनेकहस्तलिखितपुस्तकानि अनेकशिलालेखाद्यभिलेखांश्च स्वदेशं निन्युः । कार्यवशेन विदेशं गतः कश्चिदपि पुनः स्वदेशं यियासुर्यथाशक्ति किमपि सारवत्स्वदेशादुर्लभं वस्तु नयति । यदि तु विदेशयात्राऽपि किमप्यानेतुं भवति तदा तद्वस्तु अवश्यमानीयते इति हालिकवेद्यम् । अतश्चमे वैदेशिका देशिका अपि नेपालीयपुरातत्त्वानि च स्वस्वदेशानुपाजह्रुरितिनिश्चप्रचम् । इत्थञ्च सर्वतो लुण्ठितं वञ्चितञ्च भारतं सम्प्रति किमपि जागरूकं दृश्यते । अतश्चैतदर्थमेव वाराणस्यां नागरीप्रचारिणी सभा,भारतीकलाभवनम्, सरस्वतीभवनम् च, पुनानगरे भण्डारकर-रिसर्च-इन्स्टिच्यूट इति, श्रीशार्दूल-इन्स्टिच्यूट इति, वीकानेरे अभयजैनग्रन्थालयः, उज्जयिन्यां सिंधिया-रिसर्च-इन्स्टिच्यूट इति, विहार-हिन्दी-साहित्यसंमेलनम्, मद्रे (मद्रासे) ओरियंटल-मैन्युस्क्रिप्ट-लाइब्रेरी, आदियारलाइब्रेरी, प्राच्यविद्यासंशोधनालयो मद्रासविश्वविद्यालयस्य, उदयपुरे वैदिकशोधसंस्थानम्,पुरातत्त्वमन्दिरम्,जयपुरे राजकीयपोथी-खाना इति, बलरामपुरमहाराजसंग्रहालयः, रामपुरे रजालाइब्रेरी इति, प्रयागस्थ-हिन्दीसाहित्यसंमेलनम्, इत्येवमादीनि संस्थानानि विशेषतः प्रयतमानानि दृश्यन्ते । नेपाले स एष नूतनोऽभिलेखालयश्चैतदर्थं प्रयतिष्यते । नेपालराष्ट्रियपुस्तकालयः, नेपालकेशरपुस्तकालयश्चेति द्वे संस्थे एतत्साहाय्यं करिष्यत इत्याशास्यते । अत्रेदं वक्तव्यम् – यद्यपि भारतीयज्ञानविज्ञानेतिहासाद्यनुसन्धानाय अभिलेखालयाः पुस्तकालयाश्च राष्ट्रे अपेक्ष्यन्ते तथापि संस्कृताध्ययनप्रचारतदनुशीलनादिकं विना नैतदेकमपि सेत्स्यति । नेपालदेशे च वर्तमानशिक्षापद्धत्या अपेक्षाधिकप्रचारेण संस्कृताध्ययनं विलुप्तप्रायम् । अतश्च पण्डितानां पुत्रैः संस्कृतानध्ययनात्संस्कृताध्ययनं राष्ट्रे लुप्तमिति कथं वक्तुमुचितम् संस्कृतविभागे व्ययपराङ्मुखतैव संस्कृतोन्नतेर्बाधिकेति सर्वो जानाति । अतश्च यैरध्याप्यं तैरेवानुसन्धातव्यमिति केवलं भर्त्सनमात्रं न कार्यक्षमं भवेत् ।

नगरे नगरे ग्रामे ग्रामे गृहे गृहे आङ्ग्लभाषाया एकाधिपत्यं प्रवर्त्यमानं समस्तनेपालराष्ट्रमाङ्ग्लदेशं कर्तुमिव प्रतीयते । यत्र वेदध्वनिरश्रूयत तत्र म्लेच्छभाषाडिण्डिमः । गङ्गाजलक्षालितो देशः सुरया क्षालितः । संस्कृतपाठशाला बहुश उच्छेदिताः । एतच्च वातावरणमधिकाधिकं प्रवर्धमानं दृश्यते । बहुशः परिवर्तनमभूत् ! पाश्चात्त्या जना आदर्शायन्ते न स्वपूर्वजाः । एतत्क्रमे च पाश्चात्यानामन्धानुसरणेन भौतिकः सर्वोच्चानन्दवाद आध्यात्मिकसर्वोच्चानन्दमधिक्षिपन्निव उपहसन्निव राजवीथ्यां नृत्यति । कुलीनाकुलीनमर्यादाऽपगता । अर्थकामयोरेव पुरुषार्थता राष्ट्रं दिधक्षुरिव प्रसर्पति । सदाचारप्रसङ्गः प्रतिक्रियार्यं भवति । प्रगतिशीलतैव गुणेषूत्तमा । सा च शिखासूत्रतिलकपरिहारस्वेच्छाहारविहारव्याहाररूपा । अतश्चोपनयनं कृताकृतम् । विवाहस्तु केवलं कामान् पूरयितुमभिमतो न जातिमनुरुन्द्धे नापि विधिम् । साङ्कर्यं नरकार्थं स्मर्यमाणं कः प्रमिमीते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं हिन्दुसंस्कृतिरेव न केवलं संकटमापन्ना अपि तु मानवतैव । नैतिकतापातात्समाजो गुरुं राजानं मातापितरौ तिरस्करोति, देशभक्तिमाचारञ्च त्यजति । चरित्रपाताच्च मेधां-स्वास्थ्यं कान्ति बलं च जहाति । इत्थं समाजस्य दयादाक्षिण्यसत्यधृतिक्षमादयः अपचीयन्ते । क्रोधदम्भादयश्चोज्जृम्भन्ते । एवं समन्तान्नैराश्यमेघाच्छन्ने देशस्य क्षितिजवृत्ते त्रिभुवनविद्यालयस्योपकुलपतिमहोदय उदीयमाननक्षत्रायते । विवेकिना येन संस्कृतशिक्षागुणान् विचिन्त्य तच्छिक्षाप्रचारायानेकशो योजनाविशेषाश्चिन्तिताः प्रवर्तिताश्च केचन । श्री ५ महाराजाधिराजस्तु देश-दोषान्क्षालयितुं प्रवृत्तः पावनः पवनश्च सतामभिमतः । नास्य स्वरूपमीक्ष्यते । जनहिता-यैवास्य सततप्रवहणम् । स एष सततं जागरूको निद्राणेषु प्राणान् विकिरति । नेपालस्य स्वर्णयुगमावहन् विकासक्रमे सांस्कृतिककेन्द्रेष्वन्यतममभिलेखालयमुद्घाट्य स एष नृपेन्द्रो महेन्द्रो विदुषां मुदमवर्धयत् । तदेतत्संस्थानं संस्कृतोन्नतिदिशि च किमपि विशिष्टं कार्यं कुर्यादित्याशासानो लेखविस्तराद् विरमामि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. रामचन्द्रः पौडेलः

आर्यसंस्कृतिः

आर्यसंस्कृतेर्मीमांसार्थं प्रथममार्यपदस्य संस्कृतिपदस्य च निर्वचनमावश्यकम् । ऋ गति-प्रापणयोरितिधातोर्ण्यत्यार्यशब्दः संपद्यते, गत्यर्थकानां ज्ञानाद्यर्थकतया ज्ञेयः प्रा तव्य इति शक्योऽर्थः ।

> कर्तव्यमाचरन्कार्यमकर्तव्यमनाचरन् ।
> तिष्ठति प्रकृताचारे स वै आर्य इति स्मृतः ॥
> वृत्तेन हि भवत्यार्यो न धनेन न विद्यया ।

इत्याद्यार्यपदनिर्वचनतः पुरातनसमये सदाचारवत्सु विशिष्टपुरुषेष्वार्यशब्दः प्रयुक्त आसीदिति गम्यते, उपलभ्यते च तास्मिन्नेवार्थे प्रयोगः प्रायशः । परं "ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारगास्तत्र भवन्तः शिष्टा (आर्याः)" इति शास्त्रकारवचनत आर्यशब्दः केषुचित्समयेषु वेदवेदाङ्गपारगाणामध्यात्मवादिनां श्रुतिस्मृतिसदाचारवतां ब्राह्मणानामेव बोधक आसीदित्यपि प्रतीयते । ततः कालक्रमेणार्यपदशक्तेर्विकासात् कोशादौ मान्यः पूज्यः उदात्तचरितः शान्तचित्तः सज्जनः साधुरित्यादयो बहवोऽर्थाः प्रदर्शिताः । अत आर्यशब्दः स्वस्ववर्णाश्रमधर्मवतां समेषां मानवानां बोधको जात इति प्रतिभाति ।

"एवं तर्हि निवासतश्चाचारतश्च स चाचार आर्यावर्त एवे"तिपातञ्जलमहाभाष्यतस्तत्समये निवासश्चाचारश्च आर्यत्वनिर्णायकावास्तामिति गम्यते ।

'कः पुनरार्यावर्तः प्रागादर्शात् प्रत्यक्कालकवनात् दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम्' इति पातञ्जलवचनात् —

> आसमुद्राच्च पूर्वस्मादासमुद्राच्च पश्चिमात् ।
> तयोरेवान्तरा गिर्योरार्यावर्तं प्रचक्षते ॥

इति मनूक्तेश्च पुरातनसमय आर्यावर्त एतावानेवासीदिति प्रतीयते, परं कालक्रमेण संसरति संसारे यथा यथा मानवविकासो जातस्तथा तथा तेषां निवासभूमिरपि महती जाता । अतः पूर्वनिर्धारिताऽऽर्यभूमिरपि विशालाऽभूत्, तथा च वर्तमानसमये तयोर्जातिनिर्णा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यकत्वे विन्ध्याचलाद् दक्षिणभागादिषु स्थिताः कस्मादपि कारणादार्यावर्तं विहाय बहिर्निवसन्तः परमार्यधर्मावलम्बिन आर्यजाश्चार्या न स्युः। अतो जन्मनो धर्माच्च जातेर्निर्वचनं समीचीनम्। यतो हि यं कमपि देशं निवसतो यस्य कस्यापि जनस्य तस्य देशस्य जलवायुस्थित्याद्यनुसारेण वेषभूषाशनादीनां परिवर्तने सत्यपि स्वकीयदेशधर्मावलम्बिनस्तस्य जातेःपरिवर्तनं न भवति। यूरोपीयोऽत्रागत्यास्मदीयं राष्ट्रियवेषभूषादिकं परिदधत् अत्रत्यां व्यवहारस्थितिमनुकुर्वन्नप्यार्यो न भवति। एवं च श्रुतिस्मृतिपुराणादिषु प्रतिपादितानि नित्यनैमित्तिककाम्यकर्माणि संमानयंस्तदनुसारमाचारादिकं च समाचरन्नार्यकुलमलङ्कुर्वन्नैहलौकिक्यां पारलौकिक्यां चोन्नतौ यो विश्वसिति स आर्य इति।

संस्कृतिशब्दश्च समुपसर्गककरणार्थकृधातोर्भावे क्तिन्प्रत्यये "संपरिभ्यां करोतौ भूषणे" इति सूत्रेण सुटि च निष्पद्यते- भूषणभूता सम्यक् कृतिः संस्कारो वा तस्यार्थः। आर्याणां संस्कृतिरितिसमासनिष्पन्नस्य समस्तस्यार्यसंस्कृतिपदस्य श्रुतिस्मृत्यादिप्रतिपादितकर्माणि कुर्वतो भूषणभूतसम्यक्कृतिः संस्कारो वार्थः सम्पन्नः।

प्रकृतिप्रदत्तान्यसंस्कृतानि सर्वाणि वस्तूनि व्यवहारायानुपयुक्तानि भवन्ति, तानि च वस्तून्युपयोगीनि विधातुं तेषां दोषमार्जनगुणधानहीनाङ्गपूरणरूपास्त्रिविधाः संस्कारा आवश्यकाः। यथा खनेरुद्धृतं मृम्मलादिमलीमसं सुवर्णमग्नौ प्रतप्य मलापनयनेन तस्य दोषमार्जनं स्वर्णकारेण तस्य कस्मिन्नपि भूषणे विरचिते गुणाधानं तत्रैव पुनर्हीरकादिसंयोजने तस्य हीनाङ्गपूरणञ्चेति त्रिविधसंस्कारैःशोधितं तदेव सुवर्णं दीप्यमानं श्लाघ्यं सर्वजनाह्लादकरं च जायते। तथैव प्राकृतेषु सर्वश्रेष्ठस्य मानवस्यापि जन्मजातान्दोषान्परिमार्ष्टुं गुणगणगरीयांसं सकलाङ्गपूर्णं च तं विधातुं वैदिकसंस्कारा आवश्यकाः। तथाहि जातकर्माद्यन्नप्राशनान्तसंस्कारतो गर्भवासगर्भाम्बुपानजन्यमालिन्यादिदोषाणां परिमार्जनेन चूडादिसमावर्तनान्तसंस्कारैः शिक्षायाः सच्चरित्रस्यापि विकाससम्पादनरूपगुणाधानेन विवाहादिसंस्कारतो हीनाङ्गपूरणेन च मानवः परिपूर्णमानवः सन् संसारे एकतां प्रेम सदाचारं विश्वबन्धुतायाः परमादर्शं च दर्शयितुं प्रभवति। यथा वस्त्रादीनां तूलिकया बहूनां रागाणां संयोजनरूपसंस्कारतो मनसि प्रतिभातं सकलाङ्गपूर्णं सुमनोहरमपूर्वं यस्य कस्यापि चित्रं सपदि संपद्यते भूषणास्त्रवस्त्रादीनामुद्दीपननिशानमार्जनादिसंस्कारैः समुत्पन्ना प्राक्कालिकाद् विशिष्टा शोभा बहुविधैः संस्कारैर्वसनभावनापन्नस्य कार्पासस्य पूर्वरूपतो विलक्षणविचित्रा नूतनावस्था च सर्वेषां दृष्टिगोचरैव; तथैव विधिपूर्वकविहितैर्वैदिकैः सकलसंस्कारैर्मानवेष्वपि शुद्धता गुणवत्ता तेजस्विता पूर्णता चोत्पद्यते "मन्त्राणां दश कथ्यन्ते संस्कारा सिद्धिदायिनः" इत्युक्तेर्मन्त्राणामपि संस्कारैरेव सिद्धर्जायते। अतः संस्काराणां महत्त्वं सर्वत्र वरीवर्ति, विशेषतो मानवानां कृते श्रुतिप्रतिपादिता गर्भाधानादिसंस्कारा अत्यावश्यकाः। अतआर्यसंस्कृतिकुक्षावेत एव प्रथमाङ्कनस्थानापन्नाः। अननुमेयात्पूर्वकालादन्तरान्तरा समापततो व्याघातान्विषह्य धाराप्रवाहरूपेणाद्यपर्यन्तमनुवर्तमाना प्राचीनपरम्परागताऽऽर्यसंस्कृतिः, यस्यां तपोयोगस्वाध्यायपरिमार्जितान्तःकरणानां प्रातःस्मरणीयानां महर्षीणां मनसि विकसिता वैदिका लौकिकाश्च बहवो विषया वर्तन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्याणां परमोत्कर्षमसहमानाः पश्चात्याः केचिद्विद्वांसो गतिप्रापणार्थकाद् ऋधातोरार्य इति निष्पन्नतया धातोर्गत्यर्थमादायैकस्मिन्देशेऽनिवसन्तो गमनशीलाआर्या अन्यस्माद्देशतः समागता नैतेषां मूलनिवासस्थानमार्यावर्त इति जल्पन्ति, परमेकमापातत प्रतीयमानं साधारणं हेतुतन्तुं समादाय तस्य धातोः कियन्तो अर्थाः, प्राचीनैराचार्यैः केषु केष्वर्थेषु प्रयोगः कृतः, कस्मिन्नर्थे परम्परा वर्तत इत्यादिकमनालोच्य तथा कथनं साहसमात्रमेव "एतस्मिन्नार्यावर्ते निवसन्तः" इत्यादिशास्त्रकारवचनेन आर्या आवर्तन्तेऽत्रेतिव्युत्पत्तावाङ्पूर्वकाद्वृतधातोराधारे घञि संपन्नेनार्यावर्तशब्देन चार्याणां निवास आर्यावर्त एवेत्यत्र न कोऽपि शङ्कालेशः।

पुनश्च डार्विनमतानुयायिनां विकासवादिनाम्—पञ्चसहस्रवत्सरतः प्राचीनो मानवानामितिहासो न लभ्यते मिश्रदेशस्य संस्कृतिः प्राचीना, पूर्वस्मात्पाषाणयुगत उत्तरोत्तरं मानवी संस्कृतिर्विकसन्ती वर्तते इति प्रचारोऽपि सृष्टेरादिकालतो विद्यमानं वेदोपनिषदां ज्ञानविज्ञानमहत्त्वं वेदाङ्गादीनामलौकिकं ज्ञानं महर्षीणां लोकोत्तरां बुद्धि प्रतिभां सदाचारं संस्कृतिं तथा प्राचीनां मूर्तिं प्राचीनाः सकलाः कलाश्च भस्मसात्कर्तुमेवेति नातितिरोहितम्। विकासवादिनःश्रुतिस्मृत्यादिकं नाङ्गीकुर्वन्तु नाम परमधुनोत्खनानान्वेषणादितः समुपलभ्यमानानि प्राचीनवस्तूनि प्राचीनतमा संस्कृतिरार्यस्यैवेति प्रकटयन्त्येव।

" एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥"

इति मनुनाप्युद्घोषितमेव। "अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदःसामवेदोऽथर्ववेदः" इतिबृहदारण्यकोपनिषद्वचनात्परमेश्वरस्य निःश्वासतो वेदोऽभिव्यक्तः वेदेष्वपि ऋग्वेदः प्राचीनतमस्तस्मिन्नुन्नततमा संस्कृतिर्विराजते सा च संस्कृतिरार्यस्यैव, आर्यो हि श्रुतिस्मृत्याद्यनुप्राणितः, अतः सर्वप्रथमः सर्वश्रेष्ठश्च मानवः। "सा प्रथमा संस्कृतिर्विश्ववारा" इत्यादिनाप्यार्यसंस्कृतेः प्राचीनत्वं प्रकटीकृतम् "तानि धर्माणि प्रथमान्यासन्" इति यजुर्वेदेनाप्यार्यधर्माणां प्राचीनत्वं स्फुटीकृतम्, धर्मस्य प्राग्भवत्वे तदाधारभूतायाः संस्कृतेरपि प्राग्भवत्वं सुतरामेवेति।

संस्कृतिः सभ्यता च समानेति केचित्प्राहुस्तदपि विचारणीयम्, समानजलवाय्वादिषु वृद्धिङ्गतानां समानपर्वतवननदीनिर्झरभूभागादीननुभवतां समानप्रकारकसामाजिकार्थिकसुखदुःखादीन्वहतां समानधर्मंश्रितानामेकदेशनिवासिनां जनानामनुभवतो निर्गता व्यवहारप्रचलिता लौकिका धर्ममूलाः सदाचाराः संस्कृतिः। सभ्यताशब्दः सह भान्त्यत्रेतिव्युत्पत्तावन्येभ्योऽपि दृश्यत इत्यनेन-सहोपपदकदीप्त्यर्थकभाधातोर्डप्रत्यये "सहस्य सःसंज्ञायां" मिति सादेशे टापि सभेतिजाते तत्र साधुरित्यर्थे "सभाया य" इतिसूत्रेण य प्रत्यये सभ्यस्य भाव इति विग्रहे "तस्य भावस्त्वतलौ" विति तल्प्रत्ययेन संपद्यते, यद्यपि—

"यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः।
राज्ञः प्रतिकृतो विद्वान् ब्राह्मणस्तां सभां विदु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतःप्रविशेत्सभाम् ॥" इति मनूक्तेः,
"सभ्येनावश्यवक्तव्यं धर्मार्थसहितं वचः।
श्रुताध्ययनसंपन्नाःकुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्याःशत्रौ मित्रे च ये समाः॥"

इतियाज्ञवल्क्यवचनाच्च! पुरा संस्कृत्यनुरूपा सभ्यताऽऽसीदिति प्रतीयते, परमधुना समाजे वसनाशनगमनवन्दनपरिधानकथनोत्थानादीनामाधुनिकप्रचलितव्यवहारानुसारेण सम्पादनं सभ्यतेति कथ्यते, सा च सामाजिकबाह्यगुणाश्रिता संस्कृतावान्तरिकगुणा अनिवार्याः। बाह्यगुणसम्पन्ना भौतिकोन्नतिमात्रतत्परा दम्भेनाऽपि धनमर्जयन्तो मानिनो लौकिकस्थितिषु सावधाना नरा अपि लोके सभ्या इति व्यवह्रियन्ते न तु संस्कृतियुता इति। ते तु परोपकारशीलाः शौचाचार-सम्पन्ना आध्यात्मिकभावनाभाविताः श्रुतिस्मृत्यादिषु निष्ठावन्तश्चदृश्यन्ते। संस्कृते रक्षणादेव-यस्य कस्यापि देशस्य धर्मरक्षा राष्ट्रकल्याणं व्यक्तेरुन्नतिरपि जायते। आर्यसंस्कृते रक्षा च संस्कारधीना यतः संस्कृतभाषायां निबद्धाः श्रुतिस्मृतिग्रन्था गर्भाधानादिस्मशानान्तसंकाराणां विधायकाः, ते च संस्काराः"समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः" इति-शास्त्रानुसारतः संस्कृतभाषयैव विधानीयाः।

यद्यपि संसार आर्यधर्मातिरिक्ता बुद्धयशुमुहम्मदकन्फुसियपलेतजरस्तरादयो बहवो धर्माः प्रच-लिताः सन्ति, परं ते हि धर्माः समये समये मानवैः प्रवर्तिता अर्वाचीना इत्यत्र न कस्यापि विमतिः, किन्त्वार्यधर्मो न मानवप्रवर्तित ईश्वरप्रदत्तो धर्म एषः, यावत्प्रकृतिर्वर्तते सृष्टिचक्रं चलति ता त् स्थास्यति अत एव सनातनपदेन व्यवह्रियते, सर्वेषां धर्माणां मूलमार्यधर्मः अत आर्यधर्माश्रिताऽऽर्य-संस्कृतिरपि सर्वप्राचीना।

विश्वमानवानामादिजन्मभूमिरादिसंस्कृतिश्चैकैव, तादृशो भूभाग आर्यावर्तस्तादृशी संस्कृ-तिश्चार्यसंस्कृतिः अस्मादेवार्यावर्तान्मनुष्याः परितः प्रसृतास्तैरत्रत्यो धर्मः संस्कृतिश्च नीता, परं बहुभिः कालैर्देशविशेषस्य जलवाय्वादिना स्थितिवशेन च सैवार्यसंस्कृतिर्नानारूपेण परिणता, अतः सर्वासां संस्कृतीनां जनन्यार्यसंस्कृतिः सर्वैरेव मानवैः संमाननीया पालनीया चेति शम्॥

◘○◘

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. राधाकृष्णशर्मा अधिकारी

भूमिसुधाराभियानमपि स्मृतिसम्मतमेव

पृथिवी हि विश्वस्मिन् अभ्यर्हिता यतः सर्वान् सर्वैः प्रकारैः सर्वव्यवहारसमर्थान् सा एव कुरुते। अतः तस्या एव विषये किञ्चिद्वक्तुमपि उद्योगः श्रेयान् इत्यवगत्य वर्तमाने प्रचलत् भूमिसुधाराभियानमेव अत्र विविच्यते। तच्च पाश्चात्यपद्धतिम् अनुरुन्धतां पाश्चात्यपद्धत्या एव सञ्जातमिति धर्मशास्त्रस्य ज्ञानाभावाद्यो भ्रमः तन्निराकरणं प्रमाणपुरःसरं विधीयते। यत्र प्रभूतार्थविषयः अस्माकम् आर्यैः प्रदिपादितः शास्त्रसम्भारः तत्र मानवजीवने समापातिनः के के विषयाः न सन्ति ? अपितु कृतेऽनुसन्धाने सर्वे एव समुपलभ्यन्ते सन्ति च तत्र तत्र। न कस्यापि कृते परकीयाणाम् अपेक्षा जायते। यत्तु जायते तत्तु धर्मशास्त्रस्य उपेक्षावशादेवेति वक्तव्यम्। धर्मशास्त्रे च यथा—

"वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः"। इति लक्षणमभिधाय "यजेत स्वर्गकामः" इत्यादिवाक्यमवतार्य धर्मस्वरूपम् विचिन्वन्ति, यथा यागात्स्वर्गो भवति इति। विहिताचरणेऽभिलषितानां वस्तूनामुपलब्धिर्भवति अनाचरणे चोपलब्ध्यभाव इत्यत्र परिदृश्यमानामेव संसृतिं स्वानुमानविषयं कुर्वन्तु सांसारिकाः। वीजप्ररोहन्यायेन सर्वज्ञोऽपीश्वरः पूर्वकल्पानुसरणमेव कुरुते न च अभूतपूर्वां रचनाम्। यतः एव ईश्वरः पूर्वकल्पानुसरणं कुरुते ततः एव नास्ति वेदस्य पुरूषनिर्मितत्वम् इति सिद्धमेव। स च अपौरूषेयो वेदः प्रयोजनवदर्थविधानेन प्रयोगसमवेतार्थस्मारकत्वेन, विधेयार्थपरिच्छेदकतया, पुरुषार्थानुबन्धित्वेन, विधिशेषनिषेधशेषरूपेण च विधेयार्थस्तावकतया च विधिमन्त्रनामधेयनिषेधार्थवादात्मकः प्रयोजनमुद्दिश्य यागादीन् विधत्ते। एवञ्च "यजेत" इत्यादिना स्वर्गादिफलोद्देशेन यागादेः वेदेन विहितत्वात् सिद्धं यागादेर्धर्मत्वमित्यादिभिः धर्मस्य स्वरूपं प्रतिपादयन्ति आचार्याः।

तथैव इतरविषयानपि सम्यक् प्रतिपादयन्ति। नैवोपेक्षन्ते। शक्त्यनुसारं धर्मार्थकामाः समा एव सेवितव्या भवन्तीति यत्र तत्र स्मारयन्ति। शक्तिमनपेक्ष्य धर्मानुष्ठाने एव विहिते अर्थकामौ विनश्येताम्। यत्र च अर्थस्य उपार्जनस्य उपाय एव अनुष्ठीयेत तत्रापि सा एव दशा समापतिता। केवलकामस्य सेवने तु किंवक्तव्यम्, स तु संसाराब्धौ निमग्नः सन्निमग्न एव भवति। अतो हेतोस्ते सर्वे स्वे स्वे काले शक्त्यपेक्ष्याः सेवनीयाः इति। तत्र च याज्ञवल्क्यवचनं प्रमाणम्। यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"धमार्थकामान् स्वे काले यथा शक्ति न हापयेदिति" । धर्मेण साकमर्थोपार्जनं कामसेवनञ्च सोपायमस्माकमाचार्यैः परिस्मृतं परिलिखितञ्च यत्र तत्र समुपलभ्यते शास्त्रान्तरेषु किं बहुना कामशास्त्रेष्वपि इतरबाधकञ्चेदितरसाधकं नानुष्ठेयमिति प्रतिपादयन्ति । यथा वात्स्यायनमुनिप्रतिपादिते कामशास्त्रे—

"त्रिवर्गसाधकं यत्स्याद्द्वयोर्वैकस्य वा पुनः ।
कार्यं तदपि कुर्वीत न त्वेकार्थं द्विबाधकम् ॥" इति ।

संस्कृतज्ञानां दैवे एव निष्ठा, कर्मणि उपेक्षा भवति । अतः ते किमपि विधातुं नोत्सहन्ते इति यश्चाधुनिकैः संस्कृतज्ञेषु दोषारोपः क्रियते स तु भ्रान्त्या अथवा शास्त्रज्ञानगन्धलेशाभावादिति सकरताडनं तर्जनीनिर्देशनपुरःसरमभिधेय एव । येषां सारस्वतानाम् इष्टानिष्टरूपफलावाप्तिः सुकृतेन दुष्कृतेन च पुरुषकर्मभ्यां भवति, भौतिकसुखभोगार्थं पौरुषेयी व्यवस्था व्यवस्थापिता एव । किञ्च दैवमित्यपि पूर्वजन्मनि पुरुषसम्पादितं कर्म एव । पूर्वे जन्मनि समुपार्जितस्य कर्मणः सत्त्वे इह जन्मनि स्वल्पेनापि प्रयासेन अधिकस्य फलस्य प्राप्तिः तदभावेऽत्र कृतेऽपि बहुप्रयत्ने प्रयत्नस्य अपेक्षया अतीव न्यूनफलस्य अवाप्तिः दृष्टा एव सांसारिकेषु यत्र तत्र सर्वत्र समेषां समैरिति प्रत्यक्षमेव प्रमाणमित्यत्र नालपनीयं कैश्चित् । एवं योगीश्वरोऽपि यथाह—

"दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता ।
तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम् ॥
केचिद्दैवात्स्वभावाद्वा कालात्पुरुषकारतः ।
संयोगे केचिदिच्छन्ति फलं कुशलबुद्धयः" ॥ इति ।

एकेन पादेन यथा पुरुषस्य गतिः न सम्पद्यते एकेन चक्रेण यानस्य गतिः न, पुरुषार्थमन्तरा दैवमपि नसिद्ध्यति तथैव ततः एव अवगच्छन्तु यद् आध्यात्मिकभौतिकयोरपि परस्परम् एकेन विना अन्यस्य साफल्यं नास्तीति । तत्र च उपोद्बलकं प्रमाणं योगीश्वरस्य एव—

यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिद्ध्यति ॥ इति ।

प्रथमतः जन्मान्तरीयफललाभ एव श्रेयानिति अस्माकं कृते तल्लाभ एव लाभः । परम् ऐहिकेष्वपि विषयेषु प्रतिपत्तिः शास्त्रेषु सम्यक् समुपलभ्यते एव यथा—

"कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयम् ।" इति ।
"हिरण्यं व्यापृतानीतं भाण्डागारेषु निक्षिपेत् ।" इति च राजकृत्येषु स्मृतम् । तथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत् ।
पालितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत् ।। इति ।

समेषां गोचरमेव । इतरसाधनर्रहितानां साधारणानां कृते पुनः अलब्धलाभाय ईश्वरोपासनं विहितम् । ईश्वरश्च अभिषेकादिगुणयुक्तो राजा । तत्सेवनञ्च विश्वस्मिन् केवलं नेपालदेशे एव तादृशगुणविशिष्टस्य श्री ५ महाराजाधिराजमहेन्द्रविर्बिक्रमशाहदेवस्यच्छत्रच्छायायां सौभाग्यवशत: वयं नेपालदेशीया एव प्राप्नुम:। तत्सेवनञ्च योगीश्वरेण स्मृतम् । यथा—

"उपेयादीश्वरञ्चैव योगक्षेमार्थसिद्धये ।" इति ।

तच्चाग्रेजातानाम्, इतरेषान्तु राज्ञः स्वयं प्रजापरिपालनं साधारणानां क्षत्रियाणां धनुर्विद्यादिकं वैश्यानां कृषिगोरक्षादिकं शूद्राणाञ्च अग्रेजातानां शुश्रूषा इति स्वस्वोपायं योगार्थमेव क्षेमार्थन्तु पुनः समेषां राजश्रयः समानः । किञ्च राजरक्षिता एव प्रजाः स्वकीयव्यापारे समर्थाः भवन्ति । तादृशगुणविशिष्टस्य नरपालस्य देशे एव धर्मशास्त्रस्य संरक्षणं संवर्द्धनञ्च भवति । धर्मशास्त्रस्य संरक्षणसंवर्द्धनाभ्यामेव निखिलासु प्रज्ञासु धर्मशास्त्रज्ञानं, धर्मशास्त्रज्ञानादेव तासु राजभक्तिर्जागर्ति । जागरिता च राजभक्तिः देशप्रेम संवर्द्धयति । वर्द्धिते हि देशप्रेम्णि स्वकीयायाः संस्कृत्याः संरक्षणं भवति । स्वकीयायाः सस्कृत्याः संरक्षणे सँल्लग्नाः हि जनाः नेतरसंस्कृतिं हृदयाधिरूढामधिकुर्वन्ति । इतरसंस्कृत्याः प्रवेशाभावे एव देशे अन्तर्द्वन्द्वं विलीयते । अन्तर्द्वन्दाभावे च सकलाः प्रजाः रामराज्यमनुभवन्तीति निश्चप्रचम् ।

या च साधारणानां जनानां मनसि भूमिसुधाराभियानं पाश्चात्यपद्धत्या सञ्जातमिति प्रतीतिः सा च धर्मशास्त्रज्ञानाभावात् । किञ्च प्रयुक्तस्यापि तस्य द्रव्यशोधनेन भूमिशोधनेन च भागद्वयम् । शुद्धिश्च कुसीदप्रयोगाद् वृद्धिरूपेण बन्धकग्रहणाच्च अधिकरूपेण द्विगुणं धनं धनिकगृहे प्रविष्टञ्चेद् धनिनः धनम् असमर्प्य एव ऋणान्मुक्तो भवति ऋणी, बन्धकरूपेण आहितं क्षेत्रादिकम् अपि यस्य तत्तस्यैव भवति । पुनर्यदि धनी ततोऽप्यधिकमुपभुङ्क्ते तर्हि तदतिरिक्तं धनम् अधमर्णे प्रत्यर्पणीयम् । एतत्सर्वम् अभिप्रेत्य योगीश्वरेण याज्ञवल्क्येन मुनिना बृहस्पतिना च समाम्नातम् एव ।

यथा—

"यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ।।" इति

ऋणी बन्धमवाप्नुयात् ।
फलभोग्यं पूर्णकालं दत्वा द्रव्यञ्च सामकम् ।।
यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी ।
ऋणी च न लभेद्बन्धं परस्परमतं विना ।। इति च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलं भोग्यं यस्य असौ फलभोग्यः बन्धकः आधिः। स च द्विविधः सवृद्धिकस्य मूलस्य अपाकरणार्थः वृद्धिमात्रस्य अपाकरणार्थश्च। तत्र च सवृद्धिकमूलापाकरणार्थं बन्धं पूर्णकालम् ऋणी समाप्नुयात्। वृद्धिमात्रापाकरणार्थन्तु बन्धं सामकं दत्त्वैवाप्नुयात्। बन्धकं गृहक्षेत्रादिकं प्रकर्षितं स्याद् वृद्धेरधिकमुपभुक्तं स्यात्तदा धनी धनभाङ् न भवति ऋणी च सामकमदत्त्वैव गृहक्षेत्रादिकं बन्धकं समवाप्नोति। धनिनः तावता एव परितोषः। न एतावन्मात्रम्। कुटलगोत्रप्रसूतेन अर्थशास्त्राचार्येण चाणक्येन च सुप्रतिपादितम् एव। यथा —

"कारणादाने प्रयासमाजीवं च परिसंख्याय बन्धं दद्यात्। तत्र टीकाकारेण महामहोपाध्यायेन गणपतिशास्त्रिणा व्याख्यातम् – ऋणादिकारणवशाद् गृहीते वास्तुनि क्षेत्रसंस्कारार्थे प्रयुक्तं कायाद्यायासं क्षेत्रसमुत्थं फलं च मूल्यतः परिगणय्य बन्धं दद्यात् तद्धने ऋणधनादुद्रिच्यमाने दृष्टे तमधिकमंशं भूस्वामिने प्रयच्छेत्। इति।

यावता च गृहक्षेत्रादिना स्वपरिवारपोषणं जनानां सम्भवे–तावति एव तेषां स्वत्वम्। अधिकस्मन्यमानाः तु ते अपहर्तृ समानाः। अतः यावता गृहक्षेत्रादिना लोकसाधारणं दैनन्दिनं प्रचलति तावति एव सहृदयैः स्वत्वं स्थापनीयम्। स्वत्वोपायाश्च "स्वामी रिक्थक्रयसंविभाग परिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य निर्जितं निर्विष्टं वैश्यशूद्रयोः" इत्यादि शास्त्रेषु निरूपिता एव। न ह्यस्माकं कपोलकल्पितम्। अपितु शास्त्रेषु प्रतिपादितम्। यथा—

"यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम्।" इति तु सर्वगोचरो विषयः नातितिरोहितः।

भुवो यथा ब्रह्मसृष्टिङ्गताः समे समानाः, पालयति धारयति च पृथिवी सर्वान् प्रत्यविशिष्टतया, परं फलप्राप्तौ न्यूनाधिक्ये तु व्यक्तिविशिष्टकर्मानुसारेण एव भवतः। न च पृथिवी एव तान् न्यूनाधिकफलशालिनः करोति। तथैव राजापि स्वाः निखिला; प्रजाः समानमानेन रक्षति पालयति च। यत्तु तत्रापि वैषम्यं दृश्यते तत्तु प्रजानामेव व्यापृतौ निहितम्। राजा तु स्वाः सकलाः प्रजाः समृद्धिमाप्नुयुरिति भावनया प्रेरितः किं किं न करोति, देशमनुसृतवता कालमनुसृतवता परिस्थितिमनुसृतवता राज्ञा प्रजापालनार्थं भूमिसुधारादिकं सर्वमेव अनुष्ठेयम्। तादृशगुणविशिष्टो हि राजा पार्थिवव्रतधारीत्युच्यते। यथाह मनुः–

"यथा सर्वाणि भूतानि धरा धारयते समम्।
एवं सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम्॥ इति॥

यः कोऽपि साधारणो जनः दुर्वृत्तेभ्यः धनमाच्छिद्य सद्वृत्तेभ्यः वितरति– अन्यायमार्गेण ससज्जननिष्पीडनं सञ्चितं गृहक्षेत्रादिकं धनं प्रतीयमानतज्जीवनादतिरिक्तं बलादागृह्य जीवनसाधनरहितेभ्यः प्रयच्छति सोऽपि समुचितकारितया आत्मद्वारा तौ उभौ तारयति चेन्नरपाल एव संकर्षणविकर्षणाभ्यां भूम्यादिकमुपलभ्य दिनानाथान् प्रपूर्य नाथयति यदि तत्र राजपुण्यविषये किं वक्तव्यम्। मनुनैवोक्तम्। यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"योऽसाधुभ्योऽर्थमादाय साधुभ्यः सम्प्रयच्छति ।
स कृत्वा प्लवमात्मानं सन्तारयति तावुभौ ॥ इति ॥

वितारकः आत्मानं तरणिं विधाय यस्माद् गृहीतवान् तं यस्मै वितीर्णवान् तञ्च सन्तारयतीत्यर्थः । तत्र च राजा समर्थः एव । स एव पृथिवीपतिः किन्नाम कर्तुं न शक्नोति । राज्ञां हि पापानां निग्रहः साधूनां संग्रहः द्विजातीनां महायज्ञादिपुण्यकर्म इव पुण्यकर्म, स एवाह यथा –

निगृहेण हि पापानां साधूनां संगृहेण च ।
द्विजातय इवेज्याभिः पूयन्ते सततं नृपाः ॥इति॥

तथा च–स एव–

स्वादानाद्वर्णसंसर्गादबलानां च रक्षणात् ।
बलं सञ्जायते राज्ञः स प्रेत्येह च वर्द्धते ॥

अबलानां दुर्बलानां जीवनसाधनरहितानां तत्प्रतिकूलेभ्यः येन केनापि संरक्षणं राज्ञः परमो धर्मः, ततः एव राजा इहामुत्र च वर्द्धते । अनुकूलप्रजश्च तस्माद् बलशाली भवत्येव तथा च–

तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः ।
श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत् ॥ इति ।

परिवारपरिसंख्यानपुरःसरं तदनुरूपायाः वृत्तेः परिकल्पनं च राज्ञां विहितमेवेपि तत्र भूमिसुधाराभियानेऽपि तेनैव रूपेण तेषां क्षेत्रादिषु स्वत्वम् आस्थाप्यते इति समानमेव । इत्येतदपि सर्वं स्मृतिषु आचार्यैः नानाप्रकारैः प्रतिपादितत्वात् शास्त्रसम्मतम् एव भूमिसुधाराभियानमपि । वेदमूलकस्मृतिषु च यावन्ति कर्माणि विधायकत्वेन विहितानि तेषां सर्वेषां सम्यगनुष्ठाने धर्म एव भवति इति, सिद्धं भूमिसुधाराभियानस्यापि धर्मत्वमिति विस्तरभयाद्विरमामि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. ऋषिरामशर्मा पोखरेलः

वैदिक–वाङ्मयस्य संक्षिप्तः परिचयः

तस्य महतोभूतस्य परब्रह्मणो मुखान्निःश्वासरूपेण स्वत एव निःसृतं वेद इत्यक्षरद्वयमिह जगति दुष्पारमनन्त–ज्ञान–रत्न–निधिभूतमस्ति । वेद एव प्राणिमात्रस्य रक्षणं करोति । "मा हिंस्यात्सर्वा (णि) भूतानीति" विधानेन ।

स च वेदो मन्त्रब्राह्मणात्मको वर्तते । यदुक्तमापस्तम्बादिभिर्महर्षिभिः—

"मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति ।

तत्र मन्त्रभागश्चतुर्धा विभक्तोऽस्ति । ऋग्वेदो, यजुर्वेदः सामवेदोऽथर्ववेद इति । तेषाञ्चतुर्णामपि वेदानां लक्षणञ्चाचार्याः समामनन्ति । यथाः—

नियताक्षरा, नियतावसानाः, पादवद्धा मन्त्रा ऋचः । अनियताक्षरा अपादबद्धा अनियतावसाना मन्त्रा यजूंषि । ऋक्ष्वेव विभिन्न–ताल–लयैर्गीतिरूपेण गानं साम । अभिचार-जापमन्त्रा (ऋच एव) अथर्वाभिधाः ।

केचिदाचार्यास्तु वेदान् संहिता–ब्राह्मणा-रण्यको-पनिषद्रूपेषु चतुर्षु भागेषु विभाजयन्ति । एष एव विभागः सम्प्रति लोकाभिप्रेत इत्यत्र नास्ति सन्देहः । किञ्च तानेव भागानभिलक्ष्य ऋग्वेदो यजुर्वेद सामवेदोऽथर्ववेद इति संज्ञा लोके व्यवह्रियते । तदेवं वेदपदेन तदीया संहिता ब्राह्मणमारण्यकमुपनिषदश्च गृह्यन्ते । तथाप्यद्यत्वे वेदपदेन संहिताया एवावबोधो भ्रममूलक एव । अत्र हि प्रत्येकं चतुर्धा विभक्तान्तानेव वेदानधिकृत्य तेषां संक्षिप्तः परिचयो दीयते । तत्रादौ वेदानां शाखाविभाग–संक्षेपः ।

ऋग्वेदस्यैकविंशतिसंख्यकाः शाखा आसन् । आधुना पञ्च एवोपलभ्यन्ते ।

यजुर्वेदस्यैकोत्तर–शत–संख्यकाः शाखाः श्रूयन्ते । तासु चाधुना नेपाले, उत्तरभारते च माध्यन्दिनशाखायाः प्रचारो वर्तते । दक्षिणभारते काण्वशाखायाः प्रचारो वर्तते । अतः शुक्लयजुर्वेदस्य द्वे शाखे एवोपलभ्येते । कृष्णयजुर्वेदे तु तैत्तिरीय–मैत्रायणी–काठक–कठकापिष्ठलाख्याश्चतस्रः शाखा उपलभ्यन्त इति यजुर्वेदे षट् शाखा एव सम्प्रति लभ्यन्ते । अन्यास्तु संज्ञामात्रावशेषाः सञ्जाताः ।

अत्र हि शुक्लकृष्णता यजुर्वेदस्य कथञ्जाता इत्युदेति शङ्का । अतस्तन्निवृत्त्यै किञ्चिल्लिख्यते । अत्र हि विविधाः कथा विचाराश्च प्रचलिताः सन्ति । तास्वेका कथात्र संक्षिप्यते । तद्यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याज्ञवल्क्यादयो बहवः शिष्या वैशम्पायनेनाध्याप्यन्ते स्म। दैवात् कदाचिद् वैशम्पायनस्य ब्रह्महत्याभिमतत्त्वं जातम्। तत्प्रक्षालनाय तेन याज्ञवल्क्यादयः स्वकीयान्तेवासिन आदिष्टाः। याज्ञवल्क्योऽन्यांश्छात्राननादृत्यैकाकी ब्रह्महत्यां शमयामीति तेषां पुरतो गुरवे न्यवेदयत्। ब्राह्मणवटुकानामनादरपूर्वकं स्वशक्तिवर्णनं कृतमिति गुरुर्वैशम्पायनो "मदधीतं त्यजे" ति दण्डं याज्ञवल्क्यं न्यगदत्। योगी याज्ञवल्क्योऽपि गुरोःसकाशादधीतानि यजूंषि छर्दितवान्। तांश्चान्ये गुर्वाज्ञया तित्तिरा भूत्वा समगृह्णन्।

ततो तानि यातयामानि यजूंषि तैस्तित्तिरैरध्यापितानि। ततो हि तानि यजूंषि कृष्णविशेषणयुतानि लोके। तैस्तित्तिरैरध्यापितत्वात्तैत्तिरीया शाखा च प्रथिता। अस्माकं देशे नेपाले कुमाऊँप्रदेश–वास्तव्याः प्रायः कृष्णयजुर्वेद–तैत्तिरीयशाखाध्यायिनो दृश्यन्ते तेषु त्रिपाठिनःक्वचित्सामाध्यायिनोऽपि श्रूयन्ते। तदेवं कृष्णयजुर्वेदतैत्तिरीयशाखाविस्तारः क्रमशोऽजनि।

इतस्तु याज्ञवल्क्यो वेद-हीनः सन्सूर्याराधनं कृत्वा सन्तोष्य च तन्तस्मादेव यजुर्वेदमधिगतवान्। शुक्लरूपात्सूर्यात्प्राप्तानीति तेषां यजुषां शुक्लयजुर्वेद इति संज्ञा जाता। वाजिरूपेण सवित्रोपदिष्टत्वाद्वाजसनेयी संहिता च कथ्यते। केचित्वाहु "याज्ञवल्क्यस्य पिता वाजसनिनामाऽऽसीत्। तदपत्येन याज्ञवल्क्येनोपदिष्टाऽन्येभ्य इति वाजसनेयीति संहिता–विशेषणमभूदिति।"

अन्येत्वाहुः कृष्णयजुर्वेदे विनियोगब्राह्मणसहिता मन्त्रसंहिताऽस्ति। विनियोग–ब्राह्मण–मन्त्राणां साङ्कर्यरूपं कृष्णत्वञ्चाऽस्मिन् वेदे तत्र तत्र लभ्यत इति तस्य यजुषः कृष्णयजुर्वेदपदवाच्यता प्रथिता। शुक्ल–यजुर्वेदस्य तु विनियोगश्रु निरूपं कल्पशास्त्रं पृथङ्, मन्त्रसंहिता पृथग, ब्राह्मणभागश्च पृथगेव वर्तत इति स्वच्छतारूपं शुक्लत्वं सङ्गच्छते। अतस्तस्य शुक्लयजुर्वेदता जाता इति। वस्तुतः एष एव पक्षः समीचीनतर्कालङ्कृत इत्यत्र नास्ति शङ्काया अवसरः।

साम–वेद– संहितायाः सहस्रशाखा आसन्। "सहस्र–वर्त्मा सामवेदः" इति महाभाष्यादिकञ्चात्र प्रमाणम्। परन्तुसम्प्रति त्रयोदशशाखानां नामान्येव लभ्यन्ते। तासु सप्त शाखास्तूपलभ्यन्त एवेतीतिहासविदः प्राहुः।

अथर्ववेदस्य नव शाखा आसन्। अद्यत्वे तिस्र एव लभ्यन्ते। तदेवं प्रतिवेदं प्रविभक्तानां शाखानां संख्या ११३१ आसीत्। अद्यत्वे तासु सप्तविंशतिशाखानां नामानि श्रूयन्ते लभ्यन्ते-चैकविंशतिरितिनिश्चप्रचमनुसन्धेयाः सन्ति सर्वाः शाखा अस्माभिः।

नष्टास्वप्यधिकशाखासु सम्प्रति लब्धानां गणनया ऋग्यजुःसामाथर्वसंहितानां मन्त्रादिगणनासंक्षेपो दर्श्यते। यथा हि—

दशसु मण्डलेषु प्रविभक्तो ऋग्वेदो दशतयीति च कथ्यते। ऋग्वेदे १०२८ सूक्तानि सन्ति। अत्रत्या ऋक्संख्या १०५५२ वर्तते। अक्षरसंख्या ४३२००० तथा १५३८२६ शब्दाश्च ऋक्संहितायां सम्बद्धाः सन्ति। ऋक्संहितायां मन्त्रा अष्टकाऽध्याय–वर्गऋग्रूपेण मण्डलानुवाकसूक्तरूपेण च विभाजिताःसन्ति। अस्यैव वेदस्य मैक्समूलरेणाङ्गलभाषायां व्याख्या कृता। यया पाश्चात्याःसमाकृष्टाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्लयजुर्वेदे ४० अध्यायाः सन्ति, तत्र माध्यन्दिनवाजसनेय-संहितायां १९७५ मन्त्रा वर्तन्ते । काण्वसंहितायान्तु २०१८ मन्त्राः सन्तीत्येतदेवान्तरमस्ति । कृष्णयजुर्वेदे १२० अध्याया सन्ति, अत्र २१४४ मन्त्राः संगृहीताः सन्ति ।

सामसंहितायां पूर्वार्चिकमुत्तरार्चिकमिति द्वौ विभागौ स्तः। उभयत्र कृत्वा १८७५ ऋचः सामवेद-संहितायां सम्बद्धाः सन्ति । साम्नि ७५ ऋच एव स्वतन्त्राः सन्ति । सर्वा अन्या ऋच ऋग्वेद-संहितातः समाहृताः सन्तीति कोविदा विदन्ति, किञ्च "ऋच्यध्यूढं साम" इत्यप्याहुः ।

अथर्ववेदे २० काण्डाःसन्ति । ७३१ सूक्तानि च सन्तीति काण्डगतमन्त्राणां सूक्तानाञ्च गणनया ५९८७ मन्त्राःसन्त्यथर्ववेदे । अथर्ववेदे कीटाणूनां, विविधानामोषधीनामायुर्वेदविषयस्य चाधुनिकमक्षयज्ञानमस्तीतितन्नितरामनुसन्धेयकोटिमारोहति । तदेवं सर्वाः संहिताः संक्षेपेणोपवर्णिताः। अद्यत्वे तासां शोधनकार्यादिपूर्वकं वैज्ञानिकमधिगमनमत्यावश्यकमस्ति । अन्यथा लोके नास्ति स्वर्णापिधान-पिहितामृतास्वादनोपलब्धिरस्माकमादरप्रश्नो वा ।

अथ ब्राह्मणविभागो लिख्यते । तथाहि—

ऋग्वेदे सांख्यायनैतरेयब्राह्मणञ्चेति द्वे ब्राह्मणे स्तः। शुक्लयजुर्वेदे शतपथब्राह्मणाख्यमेकमेव ब्राह्मणमस्ति । शताध्याययुक्तत्वाच्चास्य ब्राह्मणस्य नाम्नि सर्वथा सार्थकता वर्तते । कृष्ण-यजुर्वेदे तैत्तिरीयाख्यं ब्राह्मणमस्ति । परन्तु तन्मन्त्रसंहितया साकं सम्बद्धमस्ति ।

सामवेदे नवब्राह्मणानि सन्ति । तानि च पञ्चविंशषड्विंश—सामविधानार्षेय—दैवतोपनिषत्—संहितोपनिषद्-वंश—जैमिनीयब्राह्मणानीति परिगणितानि सन्ति । अथर्ववेदस्य गोपथाख्यमेकमेव ब्राह्मणं वर्तते ।

अथ चतुर्णामपि वेदानामारण्यकानि लिख्यन्ते तद्यथा—ऋग्वेदस्य साङ्ख्यायनैतरेयाख्ये द्वे स्तः। सामवेदस्यारण्यकमेव नास्ति । शुक्लयजुर्वेदस्य बृहदारण्यकाख्यमेकमेवास्ति । कृष्णयजुर्वेदस्यारण्यकं तैत्तिरीयाख्यमेकमेव लभ्यते । अथर्ववेदस्यारण्यकमेव नास्ति ।

अथोपनिषदां गणना प्रस्तूयते । सा चैवंविधास्ति – ऋग्वेदे तिस्र उपनिषदः समुपलभ्यन्त ऐतरेय—कौषीतकी—वाष्कलोपनिषद्रूपा ।

सामवेदस्य छान्दोग्य-केनोपनिषदाख्ये द्वे स्तः । शुक्लयजुर्वेदस्येशावास्योपनिषदाख्यैका बृहदारण्यकाख्यापरा चेति द्वे स्तः । कृष्णयजुर्वेदस्य तैत्तिरीय-महानारायणमैत्रायणीय-कठ-श्वेताश्वतरेति पञ्चोपनिषदः सन्ति । अथर्ववेदस्य प्रश्न-मुण्डक-माण्डूक्यरूपास्तिस्र उपनिषदः सन्ति । समेषां वेदानां सामुहिक्युपनिषत्संख्याऽष्टोत्तरशती वर्तते । यथा हि ऋग्वेदस्य १०, शुक्लयजुर्वेदस्य १९, कृष्णयजुर्वेदस्य ३२, साम्नः १६, अथर्वणः ३१ उपनिषदः सन्ति । ईशकठकेनप्रश्नमुण्डकमाण्डूक्यतैत्तिरीयैतरेयछान्दोग्यबृहदारण्यक-श्वेताश्वतरोपनिषदश्चेति ११ उपनिषदः विशेष-महत्त्वपूर्णाः प्रसिद्धाश्च सन्ति । भाषायाः सिद्धान्तस्य च दृष्ट्या सर्वासूपनिषत्सु बृहदारण्यक-छान्दोग्ययोः प्राचीनता दृश्यते । १६ तमशतके दाराशिकोहेन ५० उपनिषदां पारस्यभाषायामनुवादोऽकारि । तस्यैव कश्चिदपूर्णोऽशो ल्याटिनभाषायामपि प्रतिलिखितः। यस्य (अनुदितोपनिषदंशस्य)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभावो जर्मनदार्शनिकस्य "शोपेनहावरस्य" जीवने दरीदृश्यते। अद्यत्वे तु वेदानुवादः प्रायो विश्वस्य सर्वासु भाषासु सञ्जातो दृश्यते।

अथोपवेदानां सामान्यपरिचयो दीयते। आयुर्वेदो—गान्धर्ववेदो—धनुर्वेदोऽर्थशास्त्रञ्चेति चत्वार उपवेदा भण्यन्ते। एते चत्वार उपवेदाः क्रमेणाधुनिकयुगस्यायुर्वेद-धनुर्विद्याराजनीतिक-विज्ञानानां च प्रातिनिध्यं कुर्वन्ति।

अथ वेदाङ्गानां सामासिकः परिचयो दीयते। वेदानामध्ययने काठिन्यं माभूदिति शिक्षा-कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि-प्रणीतानि पूर्वजैर्महर्षिभिः। यदाह श्रीमान् यास्काचार्यः—

"साक्षात्कृत-धर्माणो ऋषयो बभूवुः। तेऽवरेभ्यो-ऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्सम्प्रादुः। उपदेशाय ग्लायन्तोऽपरे बिल्मग्रहणाय ग्रन्थमिदंसमाम्नासिषुर्वेदं वेदाङ्गानि चेति" (निरुक्तोपोद्घाते)! अथच तेषां परिचय एवंविधो वर्तते। उदात्तादयः स्वराः, गायत्र्यादीनि छन्दांसि, कखादयो वर्णा; मात्रा ह्रस्वदीर्घप्लुतरूपास्तथा शङ्कितमित्यादयः पाठदोषाः, प्रकृतिर्यस्य कल्याणीत्यादयो योग्याः, करालम्बोष्ठादयोऽयोग्याः, माधुर्यादयः पाठकगुणाः, गीतीशीघ्रीत्यादयः पाठकदोषा इत्यादिषु च विषयेषु यया सम्यक् शिक्ष्यते सा शिक्षेति कथ्यते।

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधाद्" इत्येवमादिरूपेण श्रुतिभिरभिहितत्वाच्छिक्षायाः कियत्यावश्यकता वर्तत इति ज्ञायत एव। शिक्षाविषये प्रातिशाख्य-ग्रन्था कात्यायनादिमहर्षिभिः प्रतिशाखं प्रणीताः सन्तीति सर्वथाऽस्य नाम्नः सार्थकता दृश्यते। अथ च याज्ञवल्क्य-वसिष्ठ-गौतम-पाणिनीत्यादिभिः प्रणीता शिक्षाग्रन्था नितरामेवोपादेयाः सन्ति। अद्यत्वे द्वात्रिंशत्संख्यकाः शिक्षाग्रन्था समुपलभ्यन्ते।

कल्प्यन्ते मन्त्रास्तत्तत्कर्मणि विनियुज्यन्त इति व्युत्पत्त्या कल्पशास्त्राणि मन्त्राणां विनियोजकानीति ज्ञायन्ते। तच्च "इषेत्वेति पलाशशाखां छिनत्ति' उर्ज्जेत्वेति सन्नमयतीत्यादिरूपम्। कल्पशास्त्राणि प्रतिवेदं भिन्नानि सन्ति। शुक्लयजुर्वेदस्य माध्यन्दिनवाजसनेय-संहितायां कात्यायनाचार्यप्रणीतं षड्विंशत्यध्यायात्मकमेकं श्रौतसूत्रं वर्तते। अथर्ववेदस्य वैतान-श्रौतसूत्रं विद्यते। तच्चैकं सदप्यनेकैर्ऋषिभिः प्रणीतमिति कथ्यते। आश्वलायन-सांख्यायनाख्ये द्वे कल्पसूत्रे ऋग्वेदसम्बद्धे स्तः। सामवेदे चत्वारि कल्पसूत्राणि सन्ति। तानि चार्षेय-लाट्यायन-द्राह्यायण-जैमिनीयश्रौतसूत्ररूपाणि वर्तन्ते। कृष्णयजुर्वेदस्य बौधायन-वैखानसा-पस्तम्ब-सत्याषाढ-भारद्वाज-मानवसंज्ञकानि षट् श्रौतसूत्राणि सन्ति। तेषु चादितः पञ्च तैत्तिरीयशाखया चरमञ्च मैत्रायणीशाखया सम्बद्धानि सन्ति। समेषां श्रौतकर्मणां विधायकानीत्येतानि सार्थकनामानि सन्ति।

श्रौतकर्मणो दर्शपौर्णमासादेरनुष्ठानं श्रौताग्निषु भवति। ते चाहवनीय-गार्हपत्य-दक्षिणाग्नि-भेदेन त्रिविधाः। श्रौताग्नयो वैतानिकाग्नयश्चेति नास्त्यर्थान्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मार्तयज्ञानां हुताहुत–प्रहुत—प्राशितानामनुष्ठानमावसत्थ्याग्नौ भवति । स्मार्ताग्नी सभ्यावसत्थ्यौ स्तः गृह्ये (आवसत्थ्ये)ऽग्नौ सर्वाणि श्रुतिमूलकानि स्मार्तानि कर्माणि गृह्यसूत्रैः (पद्धतिरूपेण) विधीयन्ते। वैदिकषोडशसंस्काराः स्मार्ताग्निसाध्या इति गृह्यसूत्रैर्विधीयन्ते। प्रतिवेदशाखं श्रौतसूत्राणीव गृह्यसूत्राण्यपि भिन्नानि हि लभ्यन्ते। ऋग्वेदस्य शांख्यायनाश्वलायनगृह्यसूत्रे स्तः। शुक्लयजुर्वेदस्यैकमेव पारस्करगृह्यसूत्रं वर्तते। अस्य प्रणेता पारस्कराचार्यः कात्यायनाचार्यश्चेति नामद्वयोपेत आसीदिति केचिदाहुः। द्वयोर्ग्रन्थयोः प्रणयनं कात्यायनापरनाम्ना पारस्करेणैव कृतमित्यत्र–"प्रोष्यैत्य गृहानुपतिष्ठते पूर्ववत्" "प्रेत्य गृहानुपतिष्ठते पूर्ववदिति" वाक्यद्वयं गृह्यसूत्रे लभ्यते प्रमाणभूतमितिश्रौतसूत्र–प्रणयनानन्तरं कात्यायनाचार्येणैव गृह्यसूत्रमपि प्रणीतमित्यनुमीयते। किन्त्वत्र प्रमाणान्तरं नोपलभ्यत इत्यद्यापि सन्देहास्पदमेव।

शुक्लयजुर्वेदस्यान्यासु शाखासु गृह्यसूत्रमपरन्नोपलभ्यते कृष्णयजुर्वेदस्य बौधायनाऽऽपस्तम्ब–हिरण्यकेशी–भारद्वाज–मानव–काठकगृह्यसूत्राणि चेति षट् सन्ति।

सामवेदस्य गोभिल–खादिर–जैमिनीय–गृह्यसूत्राणि सन्ति।

अथर्ववेदस्य चतुर्दशाध्यात्मकं कौशिकगृह्यसूत्रं वर्तते। वैद्यकशास्त्र-विषयेऽस्मिन् गृह्यसूत्रे विशेषविवरणमस्तीति तदक्षयनिधिर्मन्यते।

इतश्च श्रुतिप्रेरितधर्माचरण–विहार–प्रायश्चित्तादि–विधायकानि धर्मसूत्राणि च प्रणीतानि सन्ति। तेषामुपलब्धिश्च प्रायः प्रतिवेदं भवति। ऋग्वेदस्य सांख्यायनाश्वलायनधर्मसूत्रयोर्नाममात्रं लभ्यते न तु ते। शुक्लयजुर्वेदस्य श्राद्धसूत्रं कात्यायनेन प्रणीतमस्ति। धर्मसूत्रमस्य न लभ्यते। किन्तु याज्ञवल्क्यस्मृतिर्लभ्यते। कृष्णयजुर्वेदे बौधायनधर्मसूत्रमेकंप्रणीतं वर्तते। आपस्तम्बधर्मसूत्रं, कौषीतक्या शाखया संबद्धं विष्णुधर्मशास्त्रं तत्तच्छाखासम्बद्धञ्च हिरण्यकेशीधर्मसूत्रं वर्तते। गौतम–वसिष्ठ–मानव–धर्मसूत्राणि स्मृतयश्च स्वतन्त्राः परन्तु चतुःश्रुतिमूलकाः सन्ति।

प्रतिश्रौतसूत्रं परिशिष्टरूपेण स्वतन्त्ररूपेण च तत्तदाचार्य–प्रणीतानि वैदिकयज्ञशालादि-निर्माण–विषयक–रेखागणितरूपाणि शुल्बसूत्राणि सन्ति। यथा च कात्यायनशुल्बसूत्रम्, बौधायन–शुल्बसूत्रम्। आपस्तम्बशुल्बसूत्रमित्येवमादिकम्। उपर्युल्लिखितेन विवरणेन ज्ञायते यत् कल्पसूत्रस्यापि भागचतुष्टयमस्ति। १. श्रौतसूत्रं २. गृह्यसूत्रं ३. धर्मसूत्रं ४. शुल्बसूत्रमिति। तानीमानि चत्वार्येव संक्षेपेणोल्लिखितानि।

वेदाङ्गेषु मुखस्थानीयं व्याकरणमस्ति। तत्त्वे च "मुखं व्याकरणं स्मृतमि" त्यादिकं प्रमाणं लभ्यते। (अत्र वेदाङ्गमितिशब्देना–ङ्गित्वेन वेदपुरुषोऽभिलक्षितः।) व्याक्रियन्ते शब्दा अनेनेति व्युत्पत्त्या ज्ञायते यद् व्याकरणेन धात्वर्थादिमीमांसनद्वारा शब्दानां रूपसिद्धिः क्रियते प्रकृतिप्रत्ययादिविधानपूर्वकमिति। तत्रैन्द्रं, भारद्वाजं, पाणिनीयं शाकल्यमित्यादयोऽनेके संप्रदायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्ति। कतरद्वेदाङ्गमिति शङ्कोदेति परन्तु प्राचीनवैदिककालतएव प्रचलिता व्याकरण–प्रचार–पद्धतिः कालान्तरे सम्प्रदायरूपेण तैस्तैराचार्यैर्ग्रथितेति सर्वं वेदाङ्गमेव।

पाणिनिव्याकरणे भट्टोजिदीक्षितेन स्वरवैदिकप्रक्रिया पृथगेव प्रदर्शिता, लौकिकप्रक्रिया च पृथगेवास्ति। किञ्च वैदिकस्वरसंस्कारविषये प्रातिशाख्याभिधस्य स्वतन्त्रग्रन्थस्य प्रणेता कात्यायनाचार्य एव श्रौतसूत्रस्य गृह्यसूत्रस्य च प्रणेता पाणिनीय–व्याकरणस्य वार्तिककारश्चासीदिति केचिद्विद्वांस आमनन्ति। अन्ये तु नैतत्सत्यमाचक्षते। प्रातिशाख्येषु विशेषतो वैदिक-स्वर-संस्कारयोर्विवेचनं वर्तते। किन्तु ऋक्प्रातिशाख्ये छन्दोलक्षणादिकमप्यस्ति। किञ्च प्रातिशाख्येषु सिद्धशब्दानां पारस्परिकं लोपागम–विकार–प्रकृतिभावात्मकं संस्कारचतुष्टयं वर्णितं लभ्यते। एतेषां प्रातिशाख्यग्रन्थानां शिक्षाङ्गे समावेशमामनन्त्याचार्याः।

तुरीयाङ्गं निरुक्तमुच्यते तच्च वेदार्थज्ञानसाधनमिति सर्वोपरि स्थितमस्ति। "निरुक्तमुपरि स्थितम्"। वैदिकशब्दकोषस्य निघण्टोर्व्याख्याग्रन्थो निरुक्तपदवाच्यो वर्तते। अधुना निघण्टोरेक एव व्याख्यात्मको भाष्यग्रन्थः समुपलभ्यते। स च महर्षिणा यास्काचार्येण प्रणीतोऽस्ति। मूलग्रन्थे निघण्टौ नैघण्टुक – कपदिक – नैगम – दैवतरूपाणि चत्वारि काण्डानि पञ्चाध्यायाश्च सन्ति। निरुक्ते तु द्वादशाध्यायास्ततो द्वौ परिशिष्टाख्यावध्यायाविति चतुर्दशाध्यायाः सन्ति। विशेषतः कठिनान वैदिक-शब्दान् ततस्ततो निचीय निघण्टुरचना जातेतिविद्वांसो भणन्ति। निरुक्तभाष्यकर्त्रा, यज्ञेश्वरसूनुना, देवराजयज्वना स्वभाष्यादौ "क्षीरस्वाम्यनन्ताचार्यौ निघण्टुभाष्यकारावास्तामिति" समुट्टङ्कितं लभ्यते न तु तत्कृती। प्रसिद्धो भास्कररायनामा तान्त्रिको निघण्टौ सङ्गृहीतान् शब्दान् श्लोकबद्धानकरोत्। तेन च कण्ठस्थीकरणे साहाय्यमेव जातमस्तीति प्रतीयते।

निरुक्तकारेण प्रदर्शिता शब्दनिर्वचनप्रक्रिया नितरां वैज्ञानिकीति सम्भाषन्ते पौरस्त्याः पाश्चात्याश्च भाषाविज्ञानवेत्तारः। निरुक्तमेवाधुनिक–भाषा–विज्ञानस्य च मूलस्रोतोऽस्तीति–मैक्समूलर–श्लेगल–वाप्पा–दिपाश्चात्यानामपि भणितिर्दृश्यते। तदेतदद्यत्वे लोकसम्मतं वर्तत इत्यत्र नास्ति शङ्का।

निरुक्तकर्त्रा यास्केन त्रयोदश–निरुक्तकाराणां मतानि समुद्धृतानि सन्ति। तद्भाष्यकर्त्रा दुर्गाचार्येण च चतुर्दश निरुक्तकारा सन्तीतिविलिख्य यास्कादृते द्वादशनिरुक्तकाराणां नामान्येवोट्टङ्कितानि न तु तेषां स्थानग्रन्थादिपरिचयो व्यलेखि। पाणिनीयं व्याकणं यास्कप्रणीतं निरुक्तञ्च चन्द्रार्काविवाद्यत्वे वर्तमानमाधुनिकभाषाविज्ञानं द्योतयन्तौ स्वयं प्रकाशौ च वर्तेते।

छन्दः पञ्चमाङ्गं वेदपुरुषस्य पादस्थानीयमुच्यते। न हि पद्भ्यामन्तरान्तर्गन्तुं पार्यते। वेदमधीत्य तस्यानुसरणमपेक्षितं भवति। यच्चामनन्त्याचार्या "अधीतिबोधाचरण–प्रचारणै" रित्यादि। किञ्चान्यान्यङ्गानि वेदार्थज्ञानसहायभूतानि किन्तु पादस्थानीयं छन्दोऽधीतस्यैव वेदस्य पाठ-पारायणादियज्ञकर्मसु प्रयोगैकमार्गेषु गतिदानं करोति। यथाह ब्राह्मणम् —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"यो ह वा अविदितार्षेयच्छन्दोदैवतेन मन्त्रेण याजयति वाध्यापयति स्थाणुं वर्च्छति गर्तं वा प्रद्यते प्रमीयते वा पापीयान् भवति यातयामान्यस्य छन्दांसि (वेदाः) भवन्ति ।" इत्यादि-श्रुत्या ज्ञायते यच्छन्दोज्ञानादृते याजनाध्यापनयोः कृतयोरकालमृत्युः स्थाणुत्वावाप्तिर्नरकगतिः पापीयस्त्वं छन्दसश्च यातयामता भवतीति । अतश्छन्दसामध्ययनमत्यावश्यकं वर्तते । छन्दः-शास्त्र-प्रणेतृषु श्रीमान् पिङ्गलनागाचार्यो नाम अग्रे गृह्यते । तेन "पिङ्गलच्छन्दसूत्र" नामा ग्रन्थो वर्तते संप्रणीतः । तत्र हि वैदिक- लौकिकच्छन्दसां विस्तृतं विवरणमस्ति । अद्यत्वे बहवो ग्रन्थाश्छन्दोविषये प्रणीताः सन्तीति नात्र विशेष-विवेचनमपेक्ष्यते ।

ज्यौतिषं वेदाङ्गेषु लोचनस्थानीयमित्युच्यते । वेदोक्तानां यज्ञानां प्रयोगकालदेशादि-निर्धारणद्वारा ज्योतिःशास्त्ररूपमङ्गं वेदमुपकुरुते । प्रयोग-काल-निर्धारणादिप्रसंगवशाल्लोकानां शुभाशुभादिविचारश्चानेन शास्त्रेण क्रियते । अधुनातने युगे ज्यौतिषशास्त्रं सम्यगधीत्य वर्तमानविज्ञानेन योजनीयताऽऽसादनीया इति तद्विदुषामन्येषां सहयोगिनां सर्वकारस्य च साहाय्यमपेक्ष्यते । किञ्च । प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणावित्यादिः ।

अत्र हि पुराणेतिहासौ पञ्चमवेदस्थानीयाविति च केचिदाचार्याः समामनन्ति । अतः तयोरपि संक्षेपो न खलु प्रसङ्गभिन्नो भवेदिति लिख्यते । इतिहासविषये रामायणमहाकाव्य-मैतिहासिकं महाकाव्यं महाभारतञ्चोल्लेख्यमस्ति । अद्यत्वे तु बहवो ग्रन्था इतिहास-विषये प्रणीताः सन्ति । पुराणानि त्वसंख्येयान्येवकथ्यन्ते । अष्टादश महापुराणानि व्यासलिखितानि सन्ति । कानिचनोपपुराणनि च प्रणीतानि सन्ति । तेषां सर्वेषामत्रोल्लेखोऽसम्भव एवेति विरम्यते । प्रबन्धकाय-वृद्धिभयात्तेषां लघुपरिचयोऽप्यसम्यग्दत्तइति विदुषां पुरतः साञ्जलिबन्धं प्रार्थयामि ।

अन्ते पाश्चात्यैर्निर्मथिताशेषामृतस्यास्माकं वैदिकग्रन्थराशेः, संस्कृत्याः, सभ्यतायाः, वैदिक-धर्मस्य च पुनरुत्थानाय सर्वैरप्यस्माभिरग्रेसरैर्भाव्यमित्यत्र नास्ति वैमत्यम् । अत्र विषये सर्वकारः सर्वथा मुक्तहस्तत्वेन सामयिक-प्रोत्साहनेन चोपकर्ता भवत्विति चास्माकं विनिवेदनम् ।

किञ्च चन्द्रलोक-निवासोल्लासपूर्णेऽण्वादि-क्षेप्यास्त्र-सङ्कुले वर्तमान-वैज्ञानिकयुगे न वयं विज्ञानोन्नत्या विश्वस्मिन्नात्मानमुन्नेतुं प्रभवामः। किन्तूपहास्यतामेवाश्रयिष्यामः । अथ हि सर्वथाऽस्माभिरधुनातने दोलायमाने भौतिक-युगे स्वीयैराध्यात्मिकयोगदानैरेव स्वदेशनाम विश्वात्मवादश्च संस्थापयितुं प्रभूयते ।

अतोऽस्माभिः सर्वमपिकोषजातमाध्यात्मिकं महौषधं विश्वस्मै जनाय पाययित्वा ज्ञान-विज्ञान-समन्वयः स्थापनीयो वरीवर्ति । तदर्थं निखिलं विश्वं, विश्वस्यैकमात्रं स्वतन्त्रं हिन्दुराष्ट्रं तत्रत्या-माध्यात्मिकां प्रजातन्त्रात्मिकां पञ्चायत-व्यवस्थां तत्प्रवर्तकं श्री५मन्तं हिन्दूसम्राजञ्च साञ्जलिबन्धमनुमन्त्रयतीति शम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्व. पं. हरिनाथः प्याकुर्याल: (१९०९–१९८६)

आर्यानार्यशतकम्

सुजनाय नमस्तस्मै य उदास्ते वीक्ष्य दुर्जनाचरितम् ।
दुर्जनमपि तं वन्दे सौजन्याद्यो विषादिवोद्विजते ॥१॥

विलिखामि यथोत्साहं सहभावात्सुजनदुर्जनाचरिते ।
अन्योन्यसन्निधिवशात्परभागो[1] यत्सितासितयोः ॥२॥

आदौ सुजनस्य वृत्तं पूज्यत्वाल्लिख्यतेऽथंतो जघन्येन्यत् ।
द्वन्द्वे पाणिनिमुनिरपि वदति स्माभ्यर्हितम्पूर्वम् ॥३॥

स्वार्थं हित्वाप्येकः परोपकृतिबद्धपरिकरो भवति ।
इतरोपि तथा घटते परार्थहतये यथाशक्ति ॥४॥

एकः संगतिसमये प्रक्रमते प्रश्रयं प्रदर्शयितुम् ।
अपरो मिथ्या विनयं मत्वाऽपयशो जनान्तिकं[2] ब्रूते ॥५॥

मिथ्याभियुक्तमेकः परिशोधयते च यावदात्मानम् ।
भोगीगरलमिवान्यः पुरोऽपि कटुतां समुद्गिरति तावत् ॥६॥

विकृतिमुपेयान्मन इति साधुजनः[3] काटवादपव्रजति ।
इतरोपि यथाशक्ति श्रावयितुन्तत् पुनः पुनर्यतते ॥७॥

परिहरति सङ्गमेकोऽनर्थान्प्रचुरान्वितर्क्य वित्रस्तः ।
अपरस्तूद्घोषयते मानं वा ग्राम्यतां त्यजौ[4] हेतुम् ॥८॥

शृण्वन्नपि जनरवतः सुजनस्तद्वल्गितानि न शृणोति ।
अपरोऽकलहायमानं सहिष्णुमपि कातरं मनुते ॥९॥

दुर्जनवचनात्सुजनो न विकुरुते पथि[5] करीव यत् श्वरवात् ।
न विरमति कण्ठशोषं कुर्वाणोऽन्यो मुधापवादगिरः ॥१०॥

साधुजनो निर्वेदादेकाकी चरति निर्जने वसति ।
तत्प्रियमपरोऽक्षन्ता यतो यतोऽसौ ततो याति ॥११॥

---

१. गुणोत्कर्षः । २. त्रिपताककरेणान्यानपवार्यान्तरा कथाम् । अन्योन्यामन्त्रणं यत्स्यात्तज्जनान्ते जनान्तिकम् । ३ वाचां कटुभावं श्रुत्वा ल्यब्लोपे पञ्चमी । ४. सङ्गत्यागे । ५. गच्छन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयमुपयातान्सुजनो नाद्रियते यर्हि विषमशीलांस्तान् ।
हृदयक्षुरान्मुखमधृनुपजपितुं[६] तर्हि योजयत्यन्यः ॥१२॥
दृढचित्तः साधुजने कदाचिदपिमुञ्चते न सन्मार्गम् ।
अपरो निजार्थदासो मार्गामार्गौ न भावयति ॥१३॥
नातिक्रामन्सुजनो मर्यादामश्नुते क्षतिं यर्हि ।
इतरस्तदापहसति प्रज्ञामान्द्यं गणयमानः ॥१४॥
परवन्निजस्य सुजनो दोषं पश्यन्नपोहितुं यतते ।
इतरः परस्य गुणांश्चनिजदोषे भवति जात्यन्धः ॥१५॥
अन्यस्य गुणान् सुजनो विवर्धयञ्छ्लाघते सदसि ।
इतरः प्रच्छाद्य गुणान्दोषानमतोप्यपावृणुते ॥१६॥
विदुरस्तरतमभावं सच्चरितो नाधिकं विलङ्घयते ।
इतरो महच्चिकीर्षुः स्वं महतो भूरि कुत्सयते ॥१७॥
सुजनो निजस्तुतिवचो विषमिव वदने न निदधाति ।
न जहाति दुर्जनमुखं निजस्तुतिश्चान्यनिन्देव ॥१८॥
सुजनः सुकृतैकरुचिः संवृणुतेऽनुष्ठितं निजेन वृषम् ।
अपरस्तु दम्भमूर्तिः श्रेयः स्वकृतं स्वकीकुरुते ॥१९॥
उपदिशति धर्ममेकः पृष्टो योग्यं जनं यथाबुद्धि ।
हा हन्त हन्त कुजनो नोज्झति धर्मेपि कौटिल्यम् ॥२०॥
धर्माचरणैः प्रशस्तो नतमूर्द्धा नाभिनन्दति प्रथमः ।
अपरः प्रमोदमानोऽकृतमपि धर्मं प्रकीर्त्तयति ॥२१॥
सुजनः श्रेयस्तन्वन् विजने प्रयतस्तनोति गतमानः ।
यत्र महाञ्जनसङ्घस्तत्रान्यो दर्शयंस्तनुते ॥२२॥
विमृशन्विधिं विधेयं यथाक्रमं सज्जनः कुरुते ।
विदधाति विधिविहीनं गतक्रमं श्लाघ्यमानोऽन्यः ॥२३॥
सुजनः फलाभिसन्धिं विनैव वाचापि मित्रतां याति ।
इतरस्तु फलमपश्यन्नुत्तरदानेपि दुर्गतो भवति ॥२४॥
पात्रेणैव सहैको रचयति मैत्रीन्नवा कुपात्रेण ।
पात्रापात्रविवेकं त्यक्त्वाऽन्यो लोलुपः सर्वैः ॥२५॥
दैवाज्जातामथवा मैत्रीमेकोऽनुपालयति यत्नात् ।
अपरः प्रयोजनमृते सज्जनमैत्रीमपि जहाति ॥२६॥

६. भेदं कर्तुम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मैत्री सुजनेन सह स्नेहविशेषं दिने दिने तनुते ।
इतरेण विरसभावं परिणामे वैरितां वहति ॥२७॥

वैरं कथमपि सुजनैर्यदि जायेतापयाति शीघ्रं तत् ।
अपरेण जीवितावधि विवर्द्धयते त्यज्यते नैव ॥२८॥

दोषापोहप्रकृतिः सुजनो वैरन्नचेतसि दधाति ।
कपिरिव (व्रणं) शश्वत्परामृशन्वर्द्धयत्यपरः ॥२९॥

स्नेहमये सच्चेतसि रुक्षस्थेयः कथं वसतु वैरम् ।
अपरस्तु वैरमूर्तिः स्वात्मानं वा कथं त्यजतु ॥३०॥

सुजनं तु तथाद्रियते भक्त्या धर्मैकतत्परोपित(प/ग)ः ।
अन्यं जुगुप्समानोप्यन्तर्भीत्या यथा नयवित् ॥३१॥

अकृतादरोपि सुजनो मध्यस्थो विप्रियं न वा चरति ।
अपरिचितोपि तु कुजनो भषतितरां सारमेय इव ॥३२॥

अतिसत्कृतोपि सुजनः सौजन्यं तस्य मन्यते विपुलम् ।
इतरःस्वस्माल्लघुकं मन्वानस्तं विलङ्घयति ॥३३॥

सुजनेन समागन्ता न जनो विनये विचेष्टते बलवत् ।
कुजनेन तु प्रयतते पदे पदे दौष्ठवाच्चकितः॥३४॥

सुजनेन सहालापे दर्शय विनयं न वा न ते किंचित् ।
विनयेऽसता मुधात्वं तदभावे नादरो दोषः ॥३५॥

कार्यात्प्रशस्यमानो मानविहीनः परार्थकृच्चैकः ।
अन्यो विडम्ब्यमानंमन्योनर्थाय पश्यतिच्छिद्रम् ॥३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रधानाचार्यो रामनाथ आचार्यः

गुरुशिष्याणामादर्शः

आकिञ्चन्यं दधानो विषयसुखपरित्यागसंसक्तचेता
योगानुष्ठानमार्गाविचलितमनसामग्रणीः सत्त्वनिष्ठः ।
ब्रह्मानन्दानुभूत्या प्रकृतिविलसितं सर्वमेव प्रपञ्चं
जानानो राजते स्म क्षितितलतिलको धौम्यनामा महर्षिः ॥१॥

विद्याविद्योतितान्तःकरणविलसतामात्मचिन्तान्तरायान्
स्त्रीपुत्रभ्रातृगेहान् दुरिततिकरान् दूरतो द्राग्विहाय ।
कान्तारं संश्रितानां व्यपगततमसां योगिनां ध्येयशीलं
सौम्यं यं प्राप्य लोकाः सुचरितनिकषं भेजिरे मुग्धभावम् ॥२॥

धुन्वन्मूर्द्धानमद्धा बुधनरनिकरो यस्य पाण्डित्यपूर्णो-
दीर्णप्राज्यप्रभावं त्रिभुवनविदितं श्लाघतेऽद्यापि शश्वत् ।
शान्ताकारोऽपि देहोद्गतपरमहसा दीप्यमानोऽसमानो
योगी कीर्त्याऽद्वितीयः स हि भुवि शुशुभे पाण्डवानां पुरोधाः ॥३॥

नद्यास्तीरप्रदेशे फलभरनमितानोकहव्रातदृश्ये
नानाक्रीडद्द्विजालीकलरवकलिते रम्यतासार्वभौमे ।
देहान्तर्वर्तिकामप्रभृतिरिपुतमोऽजस्रघस्रेशलीलां
व्यातन्वानस्य साक्षादपरसुरगुरो राश्रमस्तस्य रेजे ॥४॥

आम्नायाम्नातयागाविरतविधिहुतिप्रोल्लसज्जातवेदाः
भूम्ना प्रेम्णा प्रकामं श्रुतिपठनरतैश्छात्रवर्गैः सनाथः ।
आवासः पूतताया अनुपमसुषमाराजिराराज्यमानः
स्वान्तानां प्रेक्षकाणामपहरणविधावद्वितीयश्च योऽभूत् ॥५॥

एकत्राम्नायवाणीभणितिमधुरिमाऽऽकर्णनस्तब्धकर्णाः
कामं कर्णान्तनेत्रा मुखविधृततृणा एणतर्णाश्च मुग्धाः ।
अन्यत्राऽऽकाशभागश्च रुहव्वनलसन्नीलधूमाभिरामो
होमार्थं द्रव्यराशिस्तिलघृतमिलितः क्वापि संलक्ष्यमाणः ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मिन्नेकान्तवासप्रणयिमुनिजनाऽजस्रसंसेव्यमाने
कान्तारोपान्तवल्लीविकसितकुसुमभ्रान्तभृङ्गोपजुष्टे ।
दूरात्संलक्ष्यमाणं सततविनिपतद्गव्यधाराप्रदीप्त-
ज्वालामालापरीतज्वलनसुललितज्योतिरुज्जृम्भते स्म ॥७॥

तस्यान्तेवासिवर्गो अहमहमिकया सेवमाना गुरूणा-
मश्रान्तं पादयुग्मं नतमुनिशिरसा धूतधूलिप्रसारम् ।
वेदान् शास्त्राणि तूर्णं कलयितुमनसः स्वीकृतब्रह्मचर्या
अध्यासामासुराराद्गुरुवररचितां पर्णशालां सुखेन ॥८॥

सर्वे छात्रा अजस्रं विनयगुणगणालङ्कृताः सत्स्वभावा
आलस्यस्वापलोभानुपहतधिषणा आर्जवेनानुयाताः ।
आज्ञामादाय प्रातर्गुरुचरणकृतां भिक्षमाणा गृहस्थान्
प्रेम्णां पात्रत्वमापुर्विजितचपलता धार्ष्ट्यवन्तो गुरूणाम् ॥९॥

इत्थं सर्वेषु तेषु प्रणयभरवशात्पक्षपातेन शून्यं
स्नेहोद्रेकं समानं विसृमरयशसो देशिकस्याऽऽदधत्सु ।
एकस्मिन्नारुणौ तु प्रबलनियतितः किञ्च पुण्यादगण्याद्
भक्तिप्राचुर्यतो वाऽधिकतरममताऽश्रान्तमुद्योतते स्म ॥१०॥

यातेष्वेवं दिनेषु प्रकटितकृषकस्वान्तमोदोऽखिलेलं
साम्राज्यं नीलतायास्त्रिभुवनकलितं दर्शयन् दृश्यमूर्तिः ।
विद्युद्दाम्नाऽथ पारस्परिकपरिहतिव्युत्थगर्जातिभीष्मः
सौरं तेजो विलुम्पन्नधिगगनतलं व्यानशे वारिवाहः ॥१२॥

पारावारस्य वारां तनुकणनिकरैर्मातरिश्वप्रणुन्नै-
र्वेगादाकृष्यमाणैर्दिनकरकिरणैर्लब्धवर्ष्मा वदान्यः ।
क्षेत्राजीवप्रमोदातिशयवितरणस्वीकृतोदारभावो
जीवातुर्भ्रातकानामतिशयिविसरो दृश्यते स्माम्बुवाहः ॥१३॥

✧ ★ ✧

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. हरिनाथ उपाध्यायो ढुङ्गेलः

निज–जन्मभूमिः

नेपालसंस्थेषु नगेषुरम्यो द्रोणाद्रिदिव्यौषधिभिः प्रपूर्णः ।
मनोहरो भक्तपुरीसमीपे प्रकाण्डनामा गिरिरस्ति दृश्यः ॥१॥

विभाति दिव्यस्तदुपत्यकायामत्युर्वरायां धन्यधान्यपूर्णः ।
ग्रामो विशालोऽपि विशालशालः कटुञ्जयाख्यो जगतीप्रसिद्धः ॥२॥

षट्कोणयुक्तो रचितः प्रकृत्या सरस्वती–यन्त्रनिभः सुकृत्या ।
मार्गैरनेकैरभितोऽभिगम्यः कटुञ्जयोऽयं परितोऽपि रम्यः ॥३॥

स्थले स्थले चत्वरगोचरैर्युतो महद्भिरश्वत्थवटैरलंकृतः ।
हनूमतीवृद्धनदीसमावृतः कटुञ्जयोऽयं परितः सुशोभितः ॥४॥

स्वास्थ्यप्रदः सर्वगुणैरुपेतः पवित्रवातावरणोऽनुकूलः ।
आदर्शनीयोऽभिजनाग्रगण्यः कटुञ्जयोऽयं परितोऽपि रम्यः ॥५॥

मूर्धाभिषिक्त–क्षितिपायमान समुच्चसिंहासनवर्तमानः ।
यस्मात् सुदूरं प्रसमीक्ष्य दृष्टिः पुनः पुनर्नन्दति साभिलाषा ॥६॥

कुहू कुहू कोकिलकूजितानि भुनुनुनू षट्पदगुञ्जितानि ।
हरिल्लतापुष्पसुशोभितानि हरन्ति चेतोऽत्र मधोर्दिनानि ॥७॥

घासाय दूरात् समुपेयुषीणां निशम्य गीतानि सुभाषिणीनाम् ।
क्षेत्राणि दृष्ट्वाऽप्यतिशाद्वलानि भवन्ति चेतांसि समुत्सुकानि ॥८॥

वैचित्र्यशाटी, सुमशीर्षभूषा, मन्दानिलोद्वेलनहावभावा ।
नानाद्विजाऽऽकूजनगीतवादा कटुञ्जयश्रीरधिनृत्यतीव ॥९॥

नद्यन्तिकस्थेषु समस्थलेषु चरन्ति गावो विहरन्ति गोपाः ।
गायन्ति केचिन्मधुरस्वरेण वृन्दावनस्येव चकास्ति कान्तिः ॥१०॥

पुरोषुरार्या ऋषयोऽत्र भूमौ जित्वा कटुं मोहगणं विवेकात् ।
तेनैव तन्नाम प्रसिद्धमस्या बभूव सार्थं नहि कल्पनैषा ॥११॥

ऋष्याश्रमं तं प्रतना ब्रुवन्ति कटुञ्जयं चाधुनिका वदन्ति ।
विद्यासदाचारपरा द्विजेन्द्रा नामद्वयं सार्थकतां नयन्ते ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवाधिदेवस्ततआशुतोषः सुवर्णशृङ्गेशमहेश एषः
उत्तुङ्गभूमौ वसतिं विधाय कटुञ्जयं पश्यति निर्निमेषः ॥१३॥
प्रकाशुकाद्रेः शिखरे सुरम्ये श्रीवासुकिर्वासमलङ्करोति ।
निरीक्षते सन्ततमेव सोऽपि कटुञ्जयं रम्यमतीव मत्वा ॥ १४ ॥
अभीष्टदः सिद्धिभिरष्टभिर्युतो गणाधिपः सूर्यविनायकाभिधः ।
प्रकाशुकेऽस्मिन् विपिने विराजते विनायकाः सन्ति ततः कटुञ्जये ॥१५॥
बाला अवाचोऽपि भवन्ति वाग्मिनो यदङ्कपाल्यां विजने समर्पिताः ।
सा पार्वती शङ्करबालशङ्करी प्रेम्णा गरिम्णोपरि यस्य तिष्ठति ॥१६॥
सुशोभतेऽत्रैव सुशीलभैरवो वृष्टिप्रदो भक्तजनार्तिनाशकः ।
प्रत्यक्षमेतत् फलमत्र वर्तते कुण्डं भवेच्चेज्जलमद्यपूरितम् ॥१७॥
स भैरवो भूतगणाभिजुष्टः श्वेताश्वसंयुक्तरथोपविष्टः ।
संवीज्यमानश्चमरैर्मरुद्भिः कटुञ्जयं भ्राम्यति मध्यरात्रे ॥१८॥
तत् पूर्ववृद्धैः कतिशोऽपि दृष्टं मिथ्येति तस्मान्नहि शङ्कनीयम् ।
ये श्रद्धया तं विधिवद् भजन्ति लोकेषु ते भैरववद् भवन्ति ॥ १९ ॥
वैशाखसंक्रान्त्यपरेऽह्नि यस्य रथाधियात्रा नयनाभिरामा ।
नानोपचारैः सह पूजनाय, आयान्ति दूरादपि दर्शनाय ॥ २० ॥
शिलामयी स्थूलतनुर्हि भैरवी व्याप्नोति सर्वावयवैः कटुञ्जयम् ।
देवैर्द्विजैर्दिव्यसरिद्भिराश्रिता काशीव पुण्या मम जन्मभूर्मता ॥२१॥
यस्यामगस्तिप्रमुखा वसिष्ठाः सुकाश्यपास्ते घृतकौशिकाश्च ।
वेदांस्तदङ्गानि सदामनन्तो वसन्त्यनूचानवरैर्वरेण्याः ॥ २२ ॥
नेपाल(लि)भाषादिकविर्वसन्तो श्रीचक्रपाणिः कविपुङ्गवश्च ।
श्रीपद्मनाथः कविराजमेघाद्यनेकशोऽस्यां सुधियोऽप्युदीयुः ॥ २३ ॥
ये काश्यपास्ते निगमागमेषु प्रकाण्डपाण्डित्यप्रदर्शनेन ।
नेपालभूपालमहामहिम्नाम् श्रीमाननीया गुरवोऽप्यभूवन् ॥ २४ ॥
रणेषु शूरा विषयेषु धीराः कार्येषु वीरा निजधर्मशीलाः ।
सद्ब्राह्मणाज्ञामनुपालयन्तः क्षत्रा विशोऽप्यत्र वसन्ति शूद्राः ॥२५॥
ब्राह्मे मुहूर्ते शयनात् प्रबुद्धाः प्रातस्तनैरच्युतनामभिश्च ।
गुञ्जायमानं गगनं विधाय स्नानाय निर्यान्ति गृहाद् गृहस्थाः ॥२६॥
धारासु कूपेष नदीषु नित्यस्नानादिकर्माणि समाचरन्ति ।
सधौतवस्त्राः सशिखोपवीता द्विजातयो वैदिकधर्मप्राणाः ॥२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नान्तो जपन्तोऽथ यजुः पठन्तो देवर्षिपितॄनपि तर्पयन्त :।
विभूतिभिर्भूषितभालपट्टा विभान्ति नद्यामृषयो वृसीस्थाः ॥२८॥

वेदीमधिष्ठाय नियम्य प्राणान् नासाग्रसंन्यस्तदृशो द्विजेन्द्राः।
सायं प्रभाते च जगन्नियन्तुर्ध्यायन्ति भर्गं सवितुर्वरेण्यम् ॥२९॥

स्तोत्राणि सूक्तान्यपि वैदिकानि प्रोच्चैः पठन्तः परितोऽधिवासम् ।
भ्रमन्ति भूदेववराश्च यत्र न कस्य चित्तं मुदमातनोति ? ॥३०॥

गृहे गृहे वैदिकभूसुराणां गुञ्जन्ति वेदध्वनयो नितान्तम् ।
ध्वनन्ति शङ्खाश्च रणन्ति घण्टा न कस्य चित्तं मुदमातनोति ? ॥३१॥

गावो घटोध्न्यः प्रतिगेहमत्र वहन्ति कुल्या घृतदुग्धदध्नाम् ।
हृष्टाश्च पुष्टा जनता विलोक्य न कस्य चित्तं मुदमातनोति ? ॥३२॥

ब्रह्मिष्ठकर्मिष्टसुधर्मनिष्ठाः शास्त्रेष्वनेकेषु विचक्षणाश्च ।
प्रायोऽधितिष्ठन्ति ततो हि सर्वे कटुञ्जयं ब्रह्मपुरं वदन्ति ॥३३॥

परस्परप्रेमनिबद्धभावा अध्यात्मवाचो विधिवर्त्मभाजः।
आदर्शतामत्र प्रदर्शयन्तः सुखेन घस्नानतिवाहयन्ति ॥३४॥

धर्मेषु शङ्का, यदि कर्मशङ्का, शास्त्रेषु शङ्का, व्यवहारशङ्का ।
यदा भवेदत्र समेत्य सर्वे शङ्कां स्वकीयां विनिवारयन्ते ॥३५॥

यन्मृज्जलान्नानिलवर्धितेन देहेन भोगा बहुशोऽपि भुक्ताः।
दृष्टाश्च देशाः कतिशोऽभिरामा न विस्मृता सा "निजजन्मभूमिः" ॥३६॥

गोचारणं तद् वृषयोधनं तत्, तत् खेलनं ताः परिहासवाचः ।
तत् क्रीडितं यैः सह कन्दुकेन स्मृत्वा मनस्ताम्यति कौतुकेन ॥३७॥

तत् स्नानसंध्यार्चननित्यकर्म प्रातः पितुः शासनतः क्रमेण ।
कृतं च वेदाध्ययनं स्वरेण स्मृत्वा मनस्ताम्यति कौतुकेन ॥३८॥

अधीयतस्तान् गृहपिण्डिकासु प्रदाय चित्तं प्रतिकण्डिकासु ।
वदन्नुदात्तस्वरितस्वरेण स्मृत्वा मनस्ताम्यति कौतुकेन ॥३९॥

निवेद्य नैवेद्यमभीष्टमाज्यं तत् पायसं प्रत्यहमात्मजेभ्यः।
दत्तञ्च पित्रा ऋषिसंनिभेन स्मृत्वा मनस्ताम्यति कौतुकेन ॥४०॥

प्राग्जन्मपुण्योपचयेन तत्र कटुञ्जयेऽगस्तिकुलेऽभिजातः।
विद्वद्विनेयो हरिनाथशर्मा स्मरत्यजस्रं "निजजन्मभूमिम्" ॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मान्तरस्थोऽप्यथवा विमुक्तो दूरे स्थितो वाऽप्यथ संनिकृष्टः ।
तं पद्मनाभं पितरं तथाम्बां तां जन्मभूमिं सततं प्रणौमि ॥४२॥

किञ्चः—

"हृदि वज्रपातः"

हा हन्त ! सर्वत्र करालकालः शनैः शनैर्धर्ममपाकरोति ।
न ब्राह्मणा ब्राह्मणधर्मसंस्था न क्षत्रवैश्या निजधर्मभाजः ॥१॥

सुधारवादाकृतयो विटेशा वेदान्तमाघ्राय च तत्त्वविज्ञाः।
अज्ञप्रताराय बिडालकाकवृकैः समानाः प्रचरन्ति हन्त ! ॥२॥

नैमित्तिकं नित्यमुदस्य कर्म निषिद्धकाम्यानि सदाचरन्तः।
विद्मो वयं तत्त्वमिति ब्रुवाणाः पाखण्डिनो हन्त ततः समन्तात् ॥३॥

ये शिक्षितास्तेऽपि कुसङ्गिसङ्गात् सनातनं धर्ममपास्य शुद्धम् ।
भक्ष्यं कुभक्ष्यं न विचारयन्तः पिबन्ति वा जक्षति यत्र तत्र ॥४॥

उच्छिष्टपानेन हि जातिपातः सांक्रामिका रोगगणाः सरन्ति ।
अपव्ययोऽप्यत्र विशेषतः स्यात्, तस्मान्न पेयं जनतापणेषु । ५॥

यज्ञेषु शूद्रो न कदापि कल्पते, शूद्रान्नमापश्च सदा विगर्हिताः।
तथापि शूद्रानुगता द्विजब्रुवा धर्मं विहन्तुं किमहो ! समुत्सुकाः ॥६॥

असत्यवाचो नरकं यियासवः शिष्टद्रुहो दुष्टजनाः स्वबान्धवान् ।
स्वार्थस्य सिद्ध्यै पिशुनादिकर्मभिः संघर्षयन्ते हतजम्बुका इव । ७॥

देशं नरेशं च विमोह्य वाग्भिर्धूर्ताः सुपूर्ता जनता तु रिक्ता ।
उदासते सज्जनमानसानि देशस्य दौर्भाग्यमिदं विलोक्य ॥८॥

विकासकार्यादिमिषेण सर्वकारात् समानीय धनं यथेच्छम् ।
स्वार्थान्धदृष्ट्या व्ययितं तथापि प्रोत्साहितास्ते समयो विचित्रः ॥९॥

पठेयुराङ्गलं निजजीविकायै न तत्र दोषः समयस्तदीयः ।
यद् धर्ममुज्झन्ति सनातनं तद् "दृष्ट्वा महान् मे हृदि वज्रपातः" ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णा विवर्णाः, श्रुतयो नु जीर्णा, म्लेच्छाः प्रपूर्णाः परितो विकीर्णाः।
स्वकीयधर्मांश्च प्रचाग्यन्ते "दृष्ट्वा महान् मे हृदि वज्रपातः" ॥११॥

क्व ज्ञानवादः क्व विकासवादः संविद्विहीनाः शलभा इवाग्निम् ।
सर्वेऽनुधावन्ति महाजवेन चेखिद्यते चित्तमिदं विचिन्त्य ॥१२॥

नितम्बनाभिस्तनबाहुमूलजानूरुगुप्ताङ्गमपि प्रकाश्य ।
भ्रमन्ति रथ्यां युवकैर्युवत्यो हा हन्त ! हा सभ्यकलेः प्रभावः ॥१३॥

न वर्णभेदो न च जातिभेदता न लिङ्गभेदो न विधिर्निषेधता ।
विकासवादः परितो विजृम्भते सर्वत्र हा ! खादतमोदता क्रिया ॥१४॥

शिखा न टीका न च हिन्दुलक्षणं, स्नानं न संध्या न च पाठपूजनम् ।
कादम्बरी-प्रेमरसैश्चमत्कृता बोभूयते खादतमोदता क्रिया ॥१५॥

★★★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. जुननाथः पण्डितः

संस्कृताभिनन्दनम्

विश्वेशश्वसितं यदेव तपसा श्रुत्यात्मना लेभिरे
ख्याताः संयमिनस्तपोधनतया कौपीनवन्तोद्विजाः।
मन्वाद्या नृपतल्लजाः परिकरं यद्रक्षणे पर्यधुः
सेयं संस्कृतभारती विजयते लोकत्रयश्रेयसे ॥१॥

या द्राक्षारसमाधुरीमुपहसत्यास्वाद्यमानान्तरा
याऽन्तस्तापमपाकरोति विदुषां पेपीयमाना मुदा।
या सौजन्यसुधाद्रवैः स्नपयति स्वैरं सतां मानसं
सेयं संस्कृतभारती विजयते लोकत्रयश्रेयसे ॥२॥

कर्मब्रह्मपथानथापि विविधं तत्त्वं खभूगोलयो-
रायुर्वेदमुतार्थशास्त्रमखिलं संगीतशास्त्रं महत्।
या व्याख्याद् गृहशिल्पमद्भूतकला निद्धाति देशान्तरे
सेयं संस्कृतभारती विजयते लोकत्रयश्रेयसे ॥३॥

लब्धा मानवसभ्यता भुवि यतो धर्मो यया वर्णितो
यस्यां हिन्दुसुसंस्कृतिः परिचिता या विश्वभाषाप्रसूः।
वन्दन्तेऽपि च यां गुणैः परिचिता वैदेशिका देशकाः
सेयं संस्कृतभारती विजयते लोकत्रयश्रेयसे ॥४॥

आलीढा परिचुम्बिता खलुखलै र्भूयो हठाच्चर्विता
त्यक्ता वा भुवि नीरसेति बहुधा दिष्ट्याऽस्ति नो चूर्णिता।
दैन्यं माऽमरभारति त्वमधुनाऽग्रासीर्धृतिधारये-
महेन्द्रध्वज एष नूनमुदितः सर्वंसहाश्रेयसे ॥५॥

आसृष्टेःपरिपन्थिनोऽपिबहुशो वर्षातपान् भूरिशः
साहं साहमपूपुरज्जनमनो द्राघीयसो वासरान्।
बालिश्याद् ब्रुवतां मृतेति कियतां निशशङ्कमङ्केशया
सेयं संस्कृतभारती विजयते लोकत्रयश्रेयसे ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. तोयनाथः पाण्डेयः

तमसो ज्योतिषि (नाटकम्)

अत्र नान्दी

शारदे सारदे पाहि नो विशारदे। भुक्तिमुक्तियुक्तिदे कान्तिदे कलमापहे !

पीडयापि बाधितान् व्रीडया विभूषितान् नवीनमार्गमागतान्। विपद्गतान् हिते रतान्।
तथा कृतान्तयातनामतीत्य हर्षगामिनः। समुन्नतौ समुत्सुकान् शूरवीरसज्जनान् ॥

शारदे सारदे०

दृष्टिरत्र दीयताम् कुतत्त्वको निपीयताम्। तमोनिमग्नमानसो ज्योतिषि विधीयताम्।
आपदः पतन्तु वा विद्युतो हसन्तु वा। देशमानगौरवाय भक्तिरत्र दीयताम् ॥

शारदे सारदे०

प्रथमा कोशी[1]

(नान्द्यन्ते सूत्रधारः)

सूत्रधारः— अलमतिविस्तरेण, महानुभावाः, प्रणिपत्यैवमहं विज्ञापयामि अस्मिँस्त्रिभुवन–विश्वविद्यालयस्य षष्ठदीक्षान्तसमारोहावसरे किमपि प्रदर्शयितुकामोऽस्मि (नेपथ्याभिमुखम्) कस्कोऽत्र भोः ?

नेपथ्ये— इहास्मि नेपथ्य–विधान–संलग्ना।

सू. धा.— आः ... नेपथ्य–विधानम्, नेपथ्य–विधानम्, त्वरयाऽऽगम्यतामत्र।

नटी— (प्रविश्य) किमर्थं त्वरते भवान्।

सू. धा.— महीयांसो दर्शका दर्शनौत्सुक्येन ससंभ्रमा इव लक्ष्यन्ते, तदारभ्यताम् नाटकम्।

नटी— किन्नाम नाटकं प्रदर्शनीयम् ?

सू. धा.— तोयनाथ–पाण्डेयेन सरलैः शब्दैर्नीति–समस्तैः पदैश्च प्रथितं "तमसो ज्योतिषि" नाम नाटकं प्रदर्शनीयम्।

नटी— किं तद्दर्शनीयं भवति ?

सू.— प्रिये ! 'आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इति महाकविकालिदासोक्तिं न स्मरसि ?

न.— नह्येवं वक्तुकामा परमस्मिन्नाटके प्राचीनो विषयो गृहीतः, उत नवीनो विषय इति।

सू.— प्राचीनोऽपि नवीनः।

---

१. कोशीशब्दोऽत्राङ्कपर्यायः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न.— कथमिव ?

सू. यथा जीर्णं शरीरंविहाय नवीन-शरीरग्रहणे ह्यात्मनो नवीनत्वम् तथैवात्रापि। प्रिये ! तमसि प्रयुक्तःकोऽपि विधिर्न सम्यक्परिलक्ष्यते तत्र ज्योतिरेव प्रकाशयति संपादयति च यथास्थानं यथाकामम्। एतादृशं विश्वविद्यालयादेव ज्योतिर्निःसरति। तमसि निमग्नान् ज्योतीरज्जुः समुद्धरति। समुद्धृतो ज्योतिष्मानेव सर्वकारैः प्रयुक्तां विविधां योजनां सफलीकरोति। यथाऽत्र रघुः (इत्यर्धोक्ते)

न.— श्रूयताम् श्रूयताम् विक्षिप्तस्याक्रन्दनमिव श्रूयते।

सू.— कथमिहापि विक्षिप्तः (श्रुत्वा) एवम्। तमसि निमग्नःकोऽपि भवेत्।

न.— आवाभ्यां संगच्छते किम् ?

सू.— तावत् त्वरया गच्छावः। (गच्छतः)

(प्रविशति रुधिर–शिरसा रघुनाथः)

रघुनाथः— (विहस्य) हा···हा···हा··· शान्तिः क्रान्त्यां लीना, मानवस्य ग्रीवा मलिना, नेपालस्य उर्वरायां भूमौ बीजवापानां कदम्बकं निवसति। शृङ्गीकनकस्य शिरश्छेदेन कनकं विकसति, क्रयाद् विक्रये अर्घः, वाञ्छति भोगी नुपुराघातेन भोगिन्या निसर्गम् (उच्चैर्हसति)

(शनैः शनैरवलोक्य बालिकायाः प्रवेशः)

रघु— (रुद्धकण्ठेन) किं पश्यसि विधातुर्विधानं वा गीतायाः कर्मयोगम् (रोदिति)

बालिका— कथमीदृशीं दशामापन्नः ?

रघु— (उच्चैर्विहस्य) आम् ... अद्यावधि त्वं पूता। (भर्त्सयन्) परं स्मरैतावत् मानवतामुल्लङ्घयितुं देवत्वस्य पुलिनाद् दानवतायाःपुलिनं यावत् सेतुरचनां वाञ्छसि। विविच्य पादावुन्नमय बालिके ! (बालिका बिभेति) न भेतव्यम् ! च्च. च्च. च्च. प्राप्ते दानवतायाः कूले सर्वनाशस्ते। देवत्वस्य तीरस्यादृश्यता, स्मरेदानीं न कदापि प्रत्यागमिष्यसि तत्र ?

बालिका— किमस्माकं प्रयोजनं प्रत्यावर्तने ?

रघुः— आम् ... अद्यावधि त्वं पूता (उच्चैर्हसति) आगच्छ वन्दे (बालिकायाः करं गृहीत्वा हसति) (बालिका रोदिति) च्च, च्च, च्च, बालिके मा रुदिहि, निवारय नयननीरस्यापव्ययं, तटबन्धं रचय, कतिपये मरुभूमिहृदयास्तव नयने उभयतःस्थास्यन्ति बिन्दुद्वयेन ते स्पर्धन्त उर्वरत्वेन।

बा— अतः परं नाहमुपहसामि (प्रणमति)

रघुः— (रुदन्) भो ! दानव ! त्वं विचित्रां लीलां रचयसि, धवलहृदयं दूषयसि। हन्त ! एतादृशस्य कोमलाङ्कुरस्य सर्वनाशः। जगति यथा यथा एतादृशानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रेतानां छाया प्रवर्धते तथा तथा सरलप्रकृतिं सर्वनाशस्याभिमुखमाकर्षति । बिभ्यति, क्रोशन्ति रुदन्त्युत्पतन्ति च प्रेतच्छायाक्रान्ताः ।

बा.— कथमीदृशीं दशामापन्नः ?

र.— तव पितृव्यकृपया ।

बा.— तेन ताडितस्त्वम् ?

र.— अथ किम् ?

बा.— किं विक्षिप्तस्त्वमिति ?

र.— (भर्त्सयन्) तव पितृव्यो विक्षिप्तः । तस्यापि पिता विक्षिप्तः, पुनः पितामहोऽपि विक्षिप्तस्तस्य । अहं तु निक्षिप्तः प्रक्षिप्तः प्रेतात्मनि न पुनर्विक्षिप्तः (उच्चैर्हसति, शान्तिः क्रान्त्यां लीनेति पठति)

बा.— नाहमेवं ब्रवीम्युपहसितुकामा । (प्रणमति)

र.— दानव ! त्वमेव विजयी, स्वीकरोम्यात्मनः पराजयं, विरम तावत् किसलयच्छेदात् । (रोदिति) ।

बा.— मा रुदिहि, संमार्जयामि वस्त्रखण्डेन ललाटस्य रुधिरं ते (वस्त्रं खण्डयति बध्नाति च)

(ततः प्रविशति भैरवः)

भैरवः— भैये ! किङ्करोषि त्वम् ?

बा.— त्वमेव किङ्करोषि ।

भै.— किमर्थमेकाकिनी ?

बा.— न पश्यसि, रुधिरस्रावमस्य । यदि तव ममापि एतादृशी दशा तर्हि कीदृशी पीडा भवेत् ।

भै.— अहो ! नवीनामुदरबन्धनीं संछिद्य परकीये ललाटे बध्नासि । तावत्, कथयिष्ये पितरं, तदा त्वमपि अस्यैव दशां गमिष्यसि ।

बा — अस्योदरबन्धनी नास्ति ।

भै — जानासि, पित्रा भृशं ताडितोयम् । अस्य सेवया न कुप्यति पिता त्वाम् ?

बा — किमर्थं ताडितः ?

भै — विक्षिप्त इति ।

रघु — (उत्थाय)को विक्षिप्तः को विक्षिप्तः, पिता तव विक्षिप्त पितामहो विक्षिप्तः प्रपितामहोऽपि विक्षिप्तस्ते अहं तु निक्षिप्तः प्रक्षिप्तः प्रेतात्मनि न पुनर्विक्षिप्तः (भैरवः पलायते पतति च)

बा — (रघोर्मुखं विलोक्य) वृथैव स पलायते । त्वं किमपि न करोषि तम् । एवम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र० -- च्च, च्च, च्च, नास्ति बालिके किमपि मया सह (परितो विलोकयन्) एकां लौहमुद्रिकां गृहाण, वस्त्रे बध्नाति), बालिके ! नाहं किमपि कर्तुं समर्थः । काष्ठस्य बाहू धारयामि मानवशक्तिविहीनं शरीरमिदम् ।

बा. -- पठनेन शक्तिरायातीति भैरवस्य गुरुः कथयति त्वमपि पठ । (पुनः प्रविशति भैरवः दाण्डिकेन धनेतमाङ्गेन सह)

भैरव :-- अनेनैव ताडितः पातितोऽहं त्वमपि लकुटेनास्य खण्डय शिरः ।

बा. -- हम्ऽऽअसत्यं वदसि त्वम् । अविश्वास्यमस्य कथनम् । इतः पलायितः स्वयमेव पतितः।

भैं० -- इयं स्वस्य सेविका किमर्थमस्याः कथन आयासि । ताडय तां मद्वचनात् ।

ध. -- किं त्वया ताडितः ?

र० -- पूर्वमेवापहृता युस्माभिः शक्तिर्मे कथं पुनस्ताडने समर्थः स्याम् ?

ध० -- त्वं न जानासि ? प्रभुतनयोऽयम् ।

र० -- अत एव श्वानमिव त्वामत्रानेतुं समर्थः ।

ध० -- कथं कथं किं मां श्वा इति कथयसि (जिघांसति)

बा. -- किं वृथैव हन्तुमिच्छसि ?

ध. -- किमर्थं ताडितो भैरवः ?

र. -- (उच्चैर्विहस्य) न मया ताडितः पातितश्च ।

ध० -- (भैरवं प्रति) तव पित्रा भृशं ताडितः किं पुनर्मृतस्य मारणेन, गच्छतम् (उभौ गृहीत्वा गच्छति)

अथ द्वितीया कोशी

(पिटं रचयन्ती सेती दृश्यते)

सेती. — कीदृग् वंशखण्डो जीर्ण इव प्रतिभाति ।
ना. ना. ना. ना. ना. ना. ना.
हु हु हु हू हू हू हू
स्मर्तव्या हि प्रीतिस्ते, गातव्या च गीतिस्ते ।
(प्रविश्य धनेः वंशखण्डानि प्रक्षिपति)
आः (बिभेति दृष्ट्वा), कथं चौर इव प्रविष्टः ?

ध.ने — सम्यगभिहितं त्वया । अनवरतं चोरयामि हृदयं ते ।

से० — अयमेव दण्डश्चोरस्य (वंशखण्डेन ताडयति)

धने० — (किञ्चिद्दूरं गत्वा शूर्पस्थितं कदलीद्वयं गृहीत्वा) लकुटदण्डस्त्वया दत्तः, गृह्यताम्मर्थदण्डः (एकां तामाशयति, द्वितीयां स्वयमश्नाति, हसतः ।

से. — किं रघुः सत्यं विक्षिप्तः ?

ध. — अस्माकं स्वामी कथयति । अहं न शङ्के तादृगिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

से० — अत्यन्तं सरलो वराकः ।
घ० — तस्य सर्वस्वमपहृतं स्वामिना ।
से० — पापात्मा तव स्वामी ।
घ० — मा ब्रूहि यदि श्रृणुयाद् वयमपि प्रक्षालितसर्वस्वकरा भविष्यामः ।
से. — कोऽपि नास्ति ।
घ.— सेति !
से.— आम् ।
घ.— अहमपि सेवाकार्यं त्यजामि ।
से.— किमर्थम् ?
घ.— क्षान्त्या कर्म करोमि तदा जीवन् मृत इति भर्त्सयति । प्रवचनात् जल्पकः मौनिभावान्मूक इति, समीपे स्थिते प्रगल्भः, दूरतः स्थित अप्रगल्भ इति भर्त्स,-यति । अनवरतः परिश्रमो, यशो न ददाति । आ...त्यजामि ।
से.— न हि न हि यदि तथा करोषि, अस्मिन्ग्रामे वासो न स्यात् (मुक्तिबहादुरः प्रविशति)
घ.— (क्षणं विचिन्त्य हृदयं संताड्य) अन्यतो गमिष्यावः ।
मुक्तिबहादुरः— कुत्र गमने विचारः ?
घ.— अहो कथं स्वामी !
से.— न हि न हि स्वामिन् । एतत् पिटादिकं विक्रेतुं भञ्ज्यागं परिहृत्यान्यतो गन्तुं वाञ्छति ।
मु.व.— न भविष्यति विक्रयः । ममावश्यकता एषां, प्रेषय सर्वम्, इमाः कदलीश्च ।
से.— स्वामिन् कदल्यस्तु भुक्तशेषाः, कथं स्वामिने समर्पयामि ।
मु.ब.— का हानिः ?
से. — स्वामिन् ! पूर्वं बहुवारं पिटादिकमर्पितम् । इदानीन्तनस्य तु दुर्गोत्सवः समीपे वर्तते, गृहे वृद्धा श्वश्रूर्ननान्दरश्च वर्तन्ते, अस्य मम चावश्यकता नूतनवस्त्रस्य, विक्रीयैतानि (इत्यर्धोक्ते)
मुक्तिब.— अलमलम्, दुर्गोत्सवार्थे दास्यामि ऋणम्, सर्वं प्रेषय मद्वचनात् (गच्छति)

अथ तृतीया कोशी

(मुक्तिबहादुरस्य गृहाङ्गणम्)

(वृद्धं रघुं मुक्तिबहादुरो लकुटेन ताडयति)

हरिप्रसादः— मा ताड्यतामधिकं श्रीमन् ! मरिष्यति ।
मुक्ति— का हानिरस्य मरणेन ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रनाथः— मारणेनापि को लाभः ?

मु.— शत्रुर्विनश्यति ।

साहिला घर्ती– न भवते द्रुह्यति । अस्य ग्रामवासादिकस्य स्थिति र्न समीचीना । अतएव विक्षिप्त इव प्रतिभाति ।

मुक्ति.— (संक्रुध्य) मया निर्मिता स्थितिरियम् ? सर्वज्ञ इव प्रजल्पसि । अस्यैव पित्रा गृहीतस्य ऋणस्य परिणामः । ऐश्वर्यार्धं दत्वा त्वमेव रचय अस्य सुस्थितिम् । (भैरवो मैयां रघुमिव बद्ध्वाऽऽनयति स्थापयति तत्रैव)

भैरवः— पितः ! अवलोक्यताम् (हसति) ।

मुक्ति— (संक्रुध्य मैयां संताड्य) किं युष्माकं क्रीडास्थलम् ? (घनेः मैयां बन्धनान् मोचयति) अत्यन्तं प्रगल्भेयम् ।

सा. घ.— अनाथा वराकी ।

मु. ब.— अस्या पित्रोर्निधनकारणमेव ?

सा. घ.— न ह्येवं वक्तुकामः ।

मु. ब.— त्वमेव नीत्वा परिपालयैनाम् ।

सा. घ.— स्वामिन्, सत्यं प्राप्नोमि यदि ।

मु. ब.— न केवलं वचसा पत्रेण गृह्यताम् । बखतबहादुर ! लिख्यताम् पत्रमेकम् ।

ब. ब.— कया रीत्या ?

मु. ब. रीतिं न जानासि तथापि लेखकस्त्वम् । धिक् (तारस्वरेण) अस्य स्वायत्तीकरणे मैयायाः ।

ब. ब.— नात्र ममाभिप्रायः ।

मु. ब.— तर्हि किम् ?

ब. ब.— कति मूल्येन ?

मु. ब.— साधु साधु (क्षणं विचिन्त्य) एते किं कथयन्ति ?

ह. प्र.— स्वामिन् ! पशोरिव कन्याया विक्रये को विधिः ?

मु. ब.— पत्रे मा लिख्यताम्, केवलं वचसा परिपालने मूल्ये का हानिः ?

ह. प्र.— कथ्यताम् घर्तीमातुल !

घर्ती— न तथा समृद्धिमानहम् ।

मु. ब.— कुत्र यातं तव खोलाखेताभिधेयं क्षेत्रम् ?

घर्ती.— तेनैव स्वनाम धारयामि ।

मु.ब.— तर्हि कोऽपि द्वितीयोपायोऽनुष्ठीयताम् ।

घर्ती.— अर्थं विना ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु.ब.— सार्थम् ।

घर्ती.— श्रीमन् श्रूयतां मद्वचनं याथार्थ्येन कथयामि । अजीगर्तस्य पुत्रं पशुमिव क्रीत्वा हरिश्चन्द्र इव न हन्तुमिच्छामि । अपितु शकुन्तलामश्रुद्वयेन धृत्वा कण्व इव स्नेहेन परिपालयामि ।

रुद्र.— (हमन्) तपोवनदर्शनाय पशूनामाखेटाय च प्राप्तो दुष्यन्तः प्राप्तः शकुन्तलया । अत्र तु दारुवनावलोकिनस्तरुणोमृगयानिपुणाः हालिका दुष्यन्ताः प्राप्यन्ते ।

घर्ती.— समयः समानयति तदनुरूपं दुष्यन्तम् ।

मु.ब.— अर्थं विना सर्वा योजना निष्फला स्यात् ।

घ.— यथा भवते रोचते ।

(मुक्तिबहादुरस्य पत्नी गौंथली प्रविशति)

गौंथली.— एते पुरुषनामधारिणो दैवात् पुच्छविषाणहीनाः स्व-स्व-गृहिणीं वञ्चयित्वा भुक्तस्य पाचनाय परस्परमालपन्ति । मातुल ! नयैनाम् (अर्पयति) ।

घर्ती.— पत्रं विना ?

गौं.— लिख्यताम् पत्रं, किं पश्यसि त्रखते ?

मु.ब.— कथितपूर्वोऽयम् ।

धने— पञ्चविंशत्या क्रमेण वारत्रयं मयापि गृहीतम्, तत्र वर्षत्रयमनवरतं सपरिश्रमं श्रीमतां कृतं कर्म । सर्वं मेलयित्वा लिख्यताम् नवीनमृणपत्रम् ।

मु ब.— क ..क...कथं कथं तव पित्रा गृहीतं शतद्वयमिति । किं पीत्वाऽऽगतोसि यत् सहस्रद्वयस्थाने शतद्वयं लपसि । (ऋण—पत्रं प्रक्षिपति)

धने — कथं प्रभो ! पित्रा सप्तदशवारं कथितं शतद्वयमिति । अहो ! सहस्रद्वयम् ! केवलं बलीवर्दं क्रेतुं शतद्वयमेव । अहमपि साक्षिस्थाने अस्मि ।

मु.व.— तव पित्रा वारत्रये अष्टादशशतरूप्यकाणि द्यूतक्रीडायां नाशितानि ।

ब.व.— अत्र लिखितानि द्विसहस्ररूप्यकाणि वर्तन्ते ।

धने.— (हरिप्रसादं प्रति) साक्षिस्थाने भवानपि वर्तते धर्मं स्मृत्वा यज्ञोपवीतं स्पृष्ट्वा कथ्यतां द्विसहस्रमिति ।

हरि.प्र.— अयमागच्छामि (गच्छति)

ब.ब.— मूर्ख ! धर्मस्मरणे का वार्ता, अत्र लिखितानि द्वे सहस्रे, यत्र कुत्रापि गच्छ वाधिकरणेगच्छ निश्चयेन दातव्ये द्वे सहस्रे ।

धने.— तमाङ्पुत्रो मृतः । (शिरस्त्राणेन मुखं छादयति)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु.ब.-- (बखतं प्रति) लिख्यतां सहस्रद्वयाधिकपञ्चसप्तत्या नवीनम् ऋणपत्रम् । पुनर्विक्षिप्तस्यास्य विषये किं क्रियते ।

ब.ब -- ताडनेन न किमपि फलति ।

रु.ना.-- ममापि कथनमेतावत् ।

मु ब.-- तर्हि किं क्रियते ?

ब.ब.-- एकं नुहारक्षेत्रमवशिष्टमस्य तदपि गृह्यताम् ।

मु.ब.-- (रुद्रनाथं प्रति) कथम् ?

रु.ना-- यथा भवते रोचते ।

मु.ब.-- सर्वाणि पत्राणि लिख, अन्तर्गत्वा क्षणमागमिष्यामि (आसक्ताः सर्वे लेखने, मैया मौनं गत्वा रघोर्बन्धनं मोचयति)

गौंथली.-- (प्रविश्य) घर्तीमातुल ! गृहचतामस्या वस्त्रपोटलिका । (ततः प्रविशति भैरवः)

भैरवः-- मैये ! त्वं त्यक्तासि । अधुनैव परगृहं प्रविशसीति मम पित्रोरालापनेन ज्ञातम् । किमर्थं गच्छसि त्वम् ?

मैया.— न जानामि ।

भै.— मा गच्छ, कया सह क्रीडिष्यामि । तारस्वरेण रुदिहि, ततो न प्रेषयिष्यन्ति ।

मैया.— जानासि ? रोदनेन तु पूर्वं पूर्वमिव बहु ताडयन्ति । माता नास्ति पिता नास्ति, (क्षणं विविच्य) कथय भैरव ! मृता जनाः कुत्र गच्छन्ति, तैः सह संगन्तुं न शक्यते ?

भैरवः-- अस्माकं ग्राममिवान्यग्रामं गच्छन्ति मृतास्तैः सह संगमनाय स्वयमपि मर्तव्यम् ।

मैया-- तर्हि, इदानीमहं म्रिये मातापितृभ्या संगत्य त्वया साकं क्रीडनायाऽगमिष्यामि । भवति ?

मु.ब.-- (प्रविश्य) संपन्नं सर्वम् ?

ब.ब.— मुद्राकर्म केवलमवशिष्टम् ।

मु.ब.-- तदपि समाप्यताम् ।

ब.ब.-- घने ! उत्तिष्ठ देहि मुद्राचिह्नम् ।

घ.-- (रुदन्) तमाङ्पुत्रो मृतो मृतः । (करं प्रसारयति, उभयोरङ्गुष्ठयो मुंद्रामादत्ते बखतः)

मु.ब.— तस्यापि (रघोःस्थानं दर्शयति), कथं कथं कुत्र गतो विक्षिप्तः किं भग्नः सः ? (परितोऽवलोक्य) शीघ्रं बद्ध्वाऽनीयताम् ताड्यताम् मार्यताम् (रुद्रबखतौ निर्गच्छतः) (घर्तीं प्रति) त्वमपि नयैनाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घर्ती.-- (उत्थाय) मैये ! गच्छावस्तावद् स्वगृहम्, नमस्कुरु मातापितरौ (मैया नमस्कृत्य, स्वक्रीडनकानि मृगयित्वा भैरवाय समर्पयति)

भैरवः-- मैये मा गच्छ (स्तमाकर्षति)

मु.ब.-- विरम तावद् दुष्ट !

भैरवः— (रुदन्) मातः ! प्रवेशयैनामन्तः, मा प्रषय ।

गौंथली.-- आगमिष्यति त्यजेदानीम् (पुत्रमाकर्षति)

अथ चतुर्थी कोशी

रघु-- श्रीमन्, किं क्रियते तस्य नाम श्रुत्वा । मुक्तिबहादुर इति कथयन्ति सव ।

निरीक्षकः— तर्हि सर्वेषां ग्रामवासिनां मुक्तिं वाञ्छति (हसति) ।

र.— श्रीमन् वहाम्यहं चर्मपेटिकाम् ।

निरो.— भारवाहो मया सह गन्तुं न शक्नोति, भोज्यादिकं संस्थाप्यास्मिन् स्वहस्ते धारयामि नात्र कष्टम् ।

र.— श्रीमन् कष्टमहमनुभवामि रिक्तहस्तत्वात् । कृपा चेन्मयि वोढुं वाञ्छामि ।

नि.— तथाग्रहश्चेद् गृहाण (ददाति) । कथय सविस्तरमात्मन इतिवृत्तम् ।

र.— संप्राप्ते मयि चतुर्थे वर्षे दिवंगतो जनक इति मात्रा कथितम् समयोऽयमेव मुक्तिबहादुरस्य कुदृष्टेः । संप्राप्ते मयि द्वादशे वर्षे मातापि पितृपथमनुययौ ।

नि.-- रघो ! मया कथितं विहाय नान्यः पन्था विद्यते ।

र.-- तथा करोमि सेवावृत्तिं परिगृह्यापि पाठशालायां प्रविश्य पठामि ।

नि.— एवम् । द्वित्रदिनानि मम गृहे स्थास्यसि ।

र.-- अनवरतं वाञ्छामि श्रीमतामनुग्रहम् ।

नि.— यथाशक्यं सहयोगं न विस्मरामि निर्गच्छतः)

पञ्चमी कोशी

नववर्षानन्तरम्

२०२१ वैक्रमाब्दे

(पञ्चायतसभा)

पञ्चप्रधानो मुक्तिबहादुरः--अत्रत्या अधिकाः सदस्या विपक्षे मम गता इति तर्कयामि । नास्य शुभावहः परिणामो युष्मत्कृते सम्यक् विविच्यताम् । अहं पञ्चप्रधानः । पूर्वंपूर्वमिवाधुनापि स्वस्थानं सुरक्षितम् मया ।

हरिप्रसादः-- दुष्कर्मणा स्वस्थानं सुरक्षितमिति मा स्मर्यताम् ।

मु.ब.-- मा जल्प, तवापीदृशी शक्तिः !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रनाथः— समयेन व्यवस्थया च दत्ता शक्तिः ।

मु.ब.— दारुच्छेदन एव शक्तिर्युष्माकम् ।

शङ्कर.— शोषकोऽविवेकी च छिद्यते ।

मु.ब— त्वमपि ! (उच्चैर्भर्त्सयति) ।

श.— नाहं न चायं न च सव सदस्याः, न ग्रामवासिनो न च प्रान्तवासिन एव, अपितु सर्वेऽधिराज्यवासिनो यतन्ते शोषकोच्छेदनाय (घनेः, मैंया, सेती समागच्छन्ति, मैया कानिचित्पत्राणि घर्तीहस्ते स्थापयति) ।

मु.ब.— विरम तावद् हालिकपुत्र !

श.— आसनस्य मर्यादां परिपालयतु भवान् ।

मु.ब.— गोपालकर्मणा वीतजीवनस्त्वं मर्यादां शिक्षयसि ।

श.— गोपालकर्मणा पाशुपाल्येन कृषिकर्मणा च ग्राम्यजीवनं धारयन्ति सर्वे, त एवास्य ग्रामपञ्चायतस्य सदस्या भवितुमर्हन्ति न च दुराचारी पापात्मा शोषको द्यूतकरः कन्याविक्रयी च ।

मु.ब.— (आसनादुत्थाय) विविच्य मुखमुद्घाट्य दुष्ट ! एतानि अलीकविशेषणानि हि मृत्युपथं प्रापयिष्यन्ति त्वाम्, दूरमपसर, घने ! चूर्णयास्य शिरो लकुटेन, घने ! पालय मद्वचनं......किं तवाप्यस्मिन्ग्रामे वासो नाभिप्रेतः ? (सदस्यान् प्रति) किं शृणुथ किं पश्यथ नास्त्यत्र कोऽपि हितकरो मम, संचूर्णयामि लकुटेन शिरो हि तस्य ।

घर्ती—. श्रीमन् न रोषदर्शनावसरः । न कोऽपि लाभो मिथ्याप्रभावेण (आसने स्थापयति) । सभायां सर्वेषामधिकारो वचसामादाने प्रदाने च ।

मु.ब.— किं सभायामधिकारः प्रयोगस्य परुषवचनानामपि ?

घ.— स तु त्याज्यः ।

रु. ना.— पूर्वं भवता प्रयुक्तम् ।

मु. ब.— अहं तु प्रमापयामि स हालिक इति ।

श.— अहमपि प्रमापयामि शृणुत । निशि बालकान् यूनो वृद्धांश्चाहूय ऋणं दत्वा द्यूतं कारयित्वा मासत्रयाभ्यन्तरे वा षण्मासाभ्यन्तरे पशुभूम्यन्नादिकं गृह्णाति किं नायं दुराचारो- नेदं द्यूतम् ! यं प्रति कुदृष्टिः पतति तस्य क्षेत्रे अङ्कुरितान्यन्नानि गोमहिष्यादिभिर्खादयति, किं नोऽयं पापात्मा ? दशवारमेकाकिनी सेती स्वसतीत्वरक्षणाय भग्ना, किं नायं दुराचारो व्यभिचारो वा । रघोःसर्वस्वं मिथ्या पत्रादिभिर्हृतम् । किं नेदं पापकृत्यम् ? शतद्वयस्थाने सहस्रद्वयकरणं किं नेदं शोषककर्म ? घनेः जन्मद्वयेऽपि मुक्तिं न गच्छति तव ऋणात् । स्वभ्रातुः पुत्रीं दशवर्षारूढामनाथां परहस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रीणीते । अत्रत्याः सर्वे जानन्ति । उदाहरणमेकम् । एतादृशान्यनेकान्युदाहरणानि सन्ति ।

(ततः प्रविशति भूमिसुधाराधिकारी, सर्वे उत्थायाभिवादयन्ति ।)

अधिकारी— कया गत्या चलति व्यवस्था ?

मु. ब.— श्रीमन् सम्यक् प्रचलति ।

अधिकारी— अत्रत्या जनाः संतुष्टाः ?

मु. ब.— सुखिनः सोत्साहाश्च सर्वे ग्राममुन्नतिदिशं नयन्ति ।

श०— श्रीमन् ! किञ्चिदहमपि विवक्षुः ।

अधिकारी— निःसङ्कोचं कथ्यताम् ।

श०— अत्रत्या न सुसंतुष्टाः, कारणं पञ्चप्रधान एव ।

मु. ब.— मिथ्या वदति श्रीमन्नयम् ।

अधिकारी— श्रूयतां श्रूयताम्, (शङ्करं प्रति तत् कथम् ?

मु. ब.— श्रीमन् मां "दुराचारी व्यभिचारी" इत्यादिशब्दैरुल्लङ्घयति मर्यादामासनस्य ।

अधिकारी— विरम तावत् त्वम् (शङ्करं प्रति) त्वं कथय ।

श०— यानि वक्तुकामोऽहं तानि प्रमाणानि मूर्तिधारीणि पुरतो विद्यन्ते । धने ! त्वं निवेदय स्वदुःखं प्रथमम् ।

अधिकारी— कथय कथय निःसङ्कोचं कथय ।

मैया०— सेति ! त्वमेव निवेदयात्मनि घटितं सर्वम् ।

से०— (शनैः शनैः सलज्जम्) श्रीमन् ! अहं तु बहुकष्टेन सतीत्वं रक्षामि । वार वारमाक्रामति भूस्वामी । मम वृद्धं कदापि ऋणान्न मुञ्चति ।

धनेः— (हस्तेन भूमिं ताडयति) प्रभो ! शतद्वयस्थाने सहस्रद्वयं मिथ्या लिखितम्, द्वादशवर्षमनवरतं कर्म कृतं तथापि न मुञ्चति ।

अधिकारी— देहि ऋणपत्रमस्य (मु. ब. ददाति) (अवलोक्य) को हरिप्रसादः ?

ह. प्र.— अहं श्रीमन् ।

अधिकारी— श्रूयताम् मद्वचनम् । कस्यामप्यवस्थायां न भेतव्यम् । ईश्वरं संस्मृत्य घटितं सत्यं व्यावर्ण्यताम् । किमनेन सहस्रद्वयं गृहीतम् ?

हरिप्रसाद- रुद्रनाथौ— सर्वमसत्यम् । केवलं पञ्चसप्तत्यधिकं शतद्वयं गृहीतम् ।

ब. ब.— अहमपि साक्षी श्रीमन् ! सहस्रद्वयमेव गृहीतम् ।

मैया— श्रीमन् ! भागिनेयोऽयं तस्य ।

अधिकारी— लिख्यतामस्य पृष्ठे सर्वं गृहीतमिति (मु. ब. लिखति) धने ! गृहाण पत्रम् । अतः परमनीच्छया न करणीयं कार्यमस्य । पञ्चसप्तत्यधिकशतेन द्वादशवर्षपर्यन्तं कर्म कृतमस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धने-- (हृदयं मंताड्य) जय जय ।

श०-- रघोऽपि तथैव मिथ्या रचनादिभिर्लुण्ठितम् सर्वस्वम् ।

अ०-- कः स रघुः ।

धर्ती-- श्रीमन् ! अधुना नास्त्यत्र । दीक्षान्तसमारोहे त्रिभुवनविश्वविद्यालये वर्तते, श्व आगन्ता ।

श०-- स एवास्य ग्रामस्योन्नतेः कारणम् । समये समये निर्दिशति विकासाय ।

घर्ती.-- (मैयां निर्दिश्य) इमामपि शिक्षितां विधाय "महिलासंघटनस्य" नेतृत्वे प्रयुक्तावान्, अस्याअर्थे सर्वं व्ययं स एव करोति ।

अधि.-- इयं का ?

घर्ती.-- मम धर्मपुत्री, स एव अस्याः पितृव्यः मुक्तिबहादुरं दर्शयति)

श०-- तत्र भवता विक्रीता ।

अधिकारी-- कथम् ?

धर्ती.-- शतप्रस्थं शालिधान्यं प्रतिवर्षमस्या मूल्ये दातव्यं मया, परं पत्रमन्यथा लिखितम् ।

अधिकारी-- देहि पत्रम् ।

मु. ब.-- श्रीमन् पत्रं तु विनष्टम् । परमस्य कथनमलीकम् ।

अधि.-- कथं नष्टम् ? कारागृहं वाञ्छसि ?

मु. ब.-- प्रभो ! शरण्यो भवान् (ददाति) ।

अधि.-- (अवलोक्य) नववर्षपयन्तं गृहीतानि सर्वाणि धान्यानि प्रयच्छास्मै नो चेत्कारागृहं गमिष्यसि । उत्तमर्णो होमनाथः कः ?

होमनाथ-- अहमस्मि श्रीमन् ।

अधि०-- तव पञ्चशतं रूप्यकाणि मानबहादुरेण विवाहाय गृहीतानि ?

हो०-- एवम् एवम् श्रीमन्, दशकशतदत्तधनस्याद्यावधि पणमेकमपि कलान्तरं न दत्तम्, न च मूलम् । भूमेरायोऽपि नार्पितः ।

मानबहादुरः-श्रीमन दशकलान्तरस्थाने चत्वारिंशत्प्रस्था धान्यानां गृहीताः । प्रतिवर्षं मया समुपार्जितमन्नं बलान्नयति ।

अधि०--- सर्वमसत्यं वदसि, मया सर्वं ज्ञातम् । पञ्चश्रीकस्य सर्वकारस्य नियमानुरूपं यत्प्रतिज्ञातम् तत्सर्वं त्वया दातव्यम् । त्वत्सदृशाः कतिपये दुर्जनाः सर्वकारस्य सदिच्छां मलिनीकुर्वन्तोऽसत्यं शस्त्रीकृत्य साधुजनान प्रहरन्ति । अस्माकं नेपालेश्वरो महेन्द्रनृपतिः सकलाधिराज्यवासिनस्तमसो ज्योतिः प्रापयितुमुन्नमयितुं स्वदेशञ्चानवरतं यतते । परं दुर्जना न स्मरन्ति ।

सर्वे.-- एवम् एवम् ।

अधि०-- अवशिष्टं द्वितीयदिने करिष्यामि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठी कोशो

मार्गे

(रघुनाथस्तस्य सखायश्च प्रविशन्ति)

१ सखा – रघुनाथ ! धन्यो धन्यो धन्योऽसि ।

२ सखा–– धन्योऽसि रघुनाथ !

३ सखा–– धन्यवादं प्रयच्छामि रघो !

रघुः–– भवन्त एव धन्यवादार्हाः ।

१ सखा–– स्नातकोत्तरपरीक्षायां भवान् सर्वप्रथमस्थानं समारूढः, कथं वयं धन्यवादार्हाः ?

रघु०–– एतत्तु भवत्सदृशां सखिजनानामनुकम्पया, अन्यथा पर्वतीयतृणस्य पुष्पस्य रूपं कथं संभवेत् ।

२ स०–– अतः परं का वाञ्छा ?

रघु०— ग्रामस्य सेवायां जीवनं यापयिष्यामि ।

३ स— तेन कर्मणा बौद्धिको विकासो न संभवति ।

रघु–– सखे ! अयमेवबुद्धेर्विकास इति मन्ये ।

१ स–– तत्कथम् ?

रघु–– तत्रानक्षरा अज्ञानिनो बहवस्तृणा इवाङ्कुरिताः सन्ति । तृणवद् विकसन्ति यथा समये, नीरसतां प्राप्यान्ते विनश्यन्ति । न कोऽपि जानाति तेषां नामानि । यदि कोऽपि मालिकस्तत्र संभवेत् तेषु कतिपयानि पुष्पाणीव राष्ट्रस्याह्लादकीभवन्ति यैर्गौरवं प्राप्नोति राष्ट्रम् ।

२ स०–– तर्हि भवान् ग्रामवासिनां मालिककर्म वाञ्छति ?

रघु०–– एवम् ।

१ स०–– सुकुमार एष विचारः । भवतः प्रेरणया पञ्चायतसदस्या अपि सुन्दरं कार्यं कुर्वन्ति । अस्माकमेष विदितो विषयः ।

३ स०— (किञ्चिद् विहस्य) मैयायाः का वार्ता ?

रघु— सा तु मम शक्तिरेव । शक्तिं विना न कोऽपि प्रभुः कार्यसम्पादने ।

१ स – निःसंशयम् । वयमपि भ्रमणाय आगमिष्यामः किञ्चित्कालानन्तरम् ।

रघु— अस्मादेव ग्रामः शोभनां दशां गमिष्यति । अनुज्ञां वाञ्छामि गमनाय ।

सर्वे— गम्यतामर्थसिद्धये (गच्छति)

अथ सप्तमी कोशी

हरिप्रसादः– अद्यास्य ग्रामस्य महोत्सवदिनम् । प्रतिवर्षं स्मृतिदिनं भविष्यति ।

रुद्रनाथः— सत्यम् तादृशीं दुर्दशामापन्नो ग्रामः केन ज्ञात एतादृशमभ्युदयपथं यास्यतीति ? सर्वं भवतो निर्देशनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रघु.— न तदेव कारणमत्र, सर्वकारैः प्रदत्ता कल्याणकारिणी व्यवस्था तथोन्नताभिलाषिणो ग्रामवासिन एव ।

श— सत्यं वदति भवान् । त्रिभुवनविश्वविद्यालयस्य स्नातकोत्तरपरीक्षायां सर्वप्रथमं स्थानं गतो भवत्सदृशो ग्रामबन्धुः प्राप्तो ग्रामवासिभिरुच्चाभिलाषिभिः ।

रघु— सर्वं सत्यम् । परमहमस्मिन्क्षणे (मैयां प्रदर्श्य) अस्या प्रेरणादायकं वाक्यम् "पठनेन शक्तिरायातीति भैरवस्य गुरुः कथयति त्वमपि पठ" इति स्मरामि ।

धनेः— अहमपि किमपि कथयामि ।

रघु.— कथय कथय ।

धने.— घर्तीमातुलोऽप्यत्रैव वर्तते मैयाया रघोश्च वैवाहिकस्य सम्बन्धस्य वार्ताऽस्मिन्नेव महोत्सवे प्रसरेत् ।

सर्वे— प्रस्तावस्य समीचीनता ।

रघु०— कथम् ?

धनेः— सर्वं कार्यमहं सम्पादयामि ।

रघु.— का विशेषता एतादृशकर्मणः संपादने । ग्रामस्योन्नत्यै कार्यसंपादने प्रतिज्ञां कुरु । इयमेव वार्ता ।

घर्ती.— मम मैयायां तादृशं स्वत्वं न वर्तते यादृशमत्र भवतः, यथा कथयति अत्र भवान् ।

रघु.— भवता सम्यक् परिपालिता रक्षिता साक्षात् पिताएव भवान्, यद्यपि मया अस्या वस्त्रान्नपठनादीनां व्यवस्था कृता । परं भवतोऽनुज्ञामुल्लङ्घ्य को विहितविधानःस्यात् ?

मैया.— (रघुं प्रति) भवतो भूकर्षकाः कथयन्ति स्म यदस्मात् वर्षादधिकारिणामाज्ञानुसारेण सर्वे धान्यानि भवते ददतीति तत् कुत्र स्थाप्यते ?

रघु.— यत्र त्वं वससि तत्रैव स्थापय ।

धने.— अत एव मया कथितम् । युवयोर्विवाहो भूयात् । सुन्दरं गृहमेकमहं रचयामि । तत्रैव धान्यमपि स्थाप्यते ।

हरिप्र.— सम्यगभिहितवान् धनेः। नूतनगार्हस्थ्यमुपभुज्यताम् ।

रघु.— (मैयां प्रदर्श्य) इयं मयि शक्तिरूपेण स्थिता । क्षीरपयसोरिवावयोः सम्बन्धः। परमिदानीमहं नूतनगार्हस्थ्यमुपभोक्तुमसमर्थः। यावदत्रत्यः कश्चिदपि जनो विनर्णं विवाहं न संपादयति तावदहमपि न ।

रु. ना.— भीष्मप्रतिज्ञा संजाता ।

मैया.— नैषा भीष्मप्रतिज्ञा ग्रामसेवाया प्रवृत्तिरियम् । एकीभूय करणात् संपद्यते मनोरथः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शङ्करः:-- क्रियते तदपि परं ग्रामस्य कलङ्क इव मुक्तिबहादुरः पञ्चप्रधानस्य स्थानमारुह्य सर्वं विकासकार्यं रुणद्धि। केवलं ग्रामवासिषु कलहमुत्पाद्य भ्रष्टाचारमाचरति।

रु. ना.-- एतादृशां दुराचरणैः क्वचित् कल्याणकारिणीमपि व्यवस्थामज्ञा ग्रामवासिनो न स्मरन्ति।

रघु.-- समयस्तानपि सन्मार्गे नयति। यदि न गच्छन्ति ते सन्मार्गं शिक्षितैस्त्यज्यन्ते। सर्वे स्वकीये कार्ये दत्तचित्ता भवन्तु।

हरि प्र.-- (मैयां प्रदर्श्य) अनया वर्तमानायां प्रथमपत्न्यां निश्चितोऽपि गोपालस्य द्वितीयविवाहो विनाशितः।

रघु.-- नैतदेव 'महिला संघटनस्य कार्यम्'।

रुद्रना.-- किमन्यत् ?

रघु.-- अन्यापि वर्तते ग्रामस्यावश्यकी क्रिया।

हरि.-- श्रोतुं वाञ्छामः।

रघु.-- श्रूयताम् विधीयताम्। पिटकशूर्पादीनां निर्माणम् तव नेतृत्वे स्थापयामि (सेतीहस्ते वंशखण्डं स्थापयति)। वस्त्राणां निर्माणच्छेदनरचनादयः, सुस्वादुभोजनस्य पाकशिक्षा, कोष्ठादीनां मण्डनम्, आदेयप्रदेयस्य विवेचनम्, गृहे चायव्यययोः संख्या, एतत् सर्वं तव नेतृत्वे स्थापयामि (मैयायै पोटलिकामेकां ददाति)। गृहस्य गृहाङ्गणस्य कलात्मकं मण्डनम्, वैयक्तिकस्य सार्वजनिकस्य चोपवनस्य निर्माणम्, तत्र फलपुष्पाणां व्यवस्था, जलानां स्रोतः प्रपा च, एतत् सर्वं भवतो नेतृत्वे स्थापयामि (रुद्रनाथाय लघ्ववदारणं ददाति)। कृषेर्नवीना वैज्ञानिकी व्यवस्था, शालेयस्य, यव्यस्य, माष्यस्य मौद्गीनस्य, कौद्रवीणस्य, तथा शाकशाकिनादीनाञ्च ज्ञानम्, मलजलादीनां व्यवस्था एतत् सर्वं भवतो नेतृत्वे स्थापयामि (हरिप्रसादाय लोष्टभेदनं ददाति)। मार्गादीनां कुल्यादीनाञ्च व्यवस्था तव नेतृत्वे स्थापयामि। (धनेहस्ते बृहदवदारणं स्थापयति)

धने:-- अहं करोमि, सर्वमाहूय कार्यं करोमि।

रघु.-- एवमाशासे। पशूनां वृक्षाणाञ्च व्यवस्था भवतो नेतृत्वे स्थापयामि (घर्तीहस्ते दामनी स्थापयति)। स्वास्थ्यसंम्बन्धिनो विविधविषया तथौषधानां व्यवस्था चैतत्सर्वं तव नेतृत्वे स्थापयामि (पुस्तकं पोटलिकां ददाति शङ्कराय)। शिक्षासम्बन्धिन्यां व्यवस्थायां युष्माकं सेवायाञ्चात्मानं नियोजयामि। साधन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्षिकतया प्रतिज्ञा कर्तव्या ।

सर्वे.— कृताः प्रतिज्ञाः, कार्यं वा साधयामः देहं वा पातयामः ।

जवनिका पतति

(अत्र सर्वे स्वस्वकर्तव्यस्य कर्मणः सूक्ष्मप्रकारं रचयमाना दृश्यन्ते)

भरतवाक्यम् —

माहेन्द्री समुदारता प्रसरति कोशीव या गण्डकी
स्वार्थं तद्धि परार्थमेव यत्नं यस्या भवेत् सर्वदा ।
नेपाले जलदेवयच्छति सदा यज्जीवनं वाञ्छितम्
देशे वाञ्छति शास्त्रसंस्कृतिकृषेरुत्कृष्टतां शोभनाम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डा. जयमन्तो मिश्रः

अरस्तूमहोदयस्य भरतमुनेश्च नाट्य-विषयक-विचारः

यवनदेशस्य प्रसिद्धदार्शनिक.अरस्तूमहोदयःखिष्टपूर्वे चतुर्थशतके (३८४-३२२) निजविशिष्ट-प्रतिभया न केवलं पाश्चात्य-सभ्यता-संस्कृति-मूलकारणं दर्शनं ज्ञानंचाविश्चकार, अपितु काव्य-शास्त्रेऽपि अपूर्वां शक्ति प्रकटयामास। तस्य 'काव्यशास्त्रम्'[1] तथा 'रीतिशास्त्रम्'[2] एतस्मिन् विषये प्रसिद्धं ग्रन्थरत्नम् अद्यापि विदुषां मानसं मोदयतितराम्।

प्रायशस्तस्मिन्नेव प्राचीनसमये महामुनिर्भरतो भारतभुवं स्वजन्मनालंचकार तथा ज्ञान-विज्ञान-कला-रत्नाकरं षट्त्रिंशदध्यायं "नाट्यशास्त्रम्" प्रणिनाय। भिन्न-देश-काल-संस्कृतिषु-परिबर्धमानयोरप्युभयोर्नाट्यविषयक-विचारे विद्यमाना मौलिक-समानता समालोचक-विचक्षणानां चेतांसि चमत्करोति। अरस्तूमहोदयस्य कतिपये काव्य-नाट्य-विषयक-विचाराः न केवलं भरतमुनेस्तद्विषयक-विचारेऽनुकूलतां भजन्ते, अपितु अभिन्नतामपि प्रतिपादयन्ति।

(१) नाट्य-स्वरूपम्

किन्नाम नाट्यमिति जिज्ञासां समादधता भरतमुनिना "नाट्यशास्त्रे" —

"त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्"[3]

"नानाभावोपसंपन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्॥"[4]

"सप्तद्वीपानुकरणं नाट्ये ह्यस्मिन् प्रतिष्ठितम्"
देवतानामृषीणां च राज्ञामथ कुटुम्बिनाम्।
"कृतानुकरणं लोके नाट्यमित्यभिधीयते[5]"

"लोकस्वभावानुकरणाच्च नाट्यस्य सत्त्वमीप्सितम्[6]"

इत्येवंरूपेण 'लोकवृत्तानुकरणम्' 'अवस्थानुकरणम्' नाट्यमित्यादि बहुशः प्रतिपादयाञ्चक्रे। नाटकस्य निरूपणं कुर्वता तेन—

'सुश्लिष्टसन्धियोगं च सुप्रयोगं सुखाश्रयम्'
मृदुशब्दाभिधानं च कविः कुर्यात्तु नाटकम्[7]"

"मृदुशब्दं सुखार्थं च कविः कुर्यात्तु नाटकम्[8]।"

"मृदुललितपदार्थं गूढशब्दार्थहीनं
बुधजनसुखयोग्यं बुद्धिमन्नृत्ययोग्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुरसकृतमार्गं सन्धिसन्धानयुक्तं-
भवति जगति योग्यं नाटकं प्रेक्षकाणाम्[९] ॥"

इत्यादिरूपेण तत्स्वरूपं प्रतिपादितम्। अनुकरणात्मकस्य रूपकस्य दशसु प्रभेदेषु प्रधानतमस्य नाटकस्य मृदुललितशब्दैः रसाभिव्यञ्जकशोभनार्थैश्च शरीरं विधेयमिति मुनेः स्पष्टं मतम् ।

अत्रेदं बिचारणीयम्—

"नाट्यशास्त्रे" भरतमुनिना 'लोकवृत्तानुकरणम्,' 'लोकस्वभावानुकरणम्,' 'कृतानुकरणमित्यादि यन्नाट्यविषये प्रतिपादितम् तत्र 'अनुकरणम्' नटद्वारा प्रदर्शितं किम् अनुकार्यस्य कार्यकलापस्याभिनयरूपम्, उताहो कविद्वारा निरूपितं जगत्पदार्थस्य वर्णनात्मकं कविकर्मरूपम् ? एतज्जिज्ञासायाः समाधाने आपाततस्तु इदमेव प्रतिभाति यन्नटद्वारा कृतम् अभिनयरूपमेवानुकरणं मुनेरभिप्रेतम्, यतस्तदनुसरणकारिणां भट्टलोल्लटाभिनवगुप्त-धनञ्जय-धनिक-विश्वनाथप्रभृतीनाम् "मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानात् नर्तकेऽपि प्रतीयमानो रसः[१०]," "नहि नटो रामसादृश्यं स्वात्मनः शोकं करोति । सर्वथैव तस्य तत्राभावात् । भावेनानुकारत्वात्" "अवस्थानुकृतिर्नाट्यम्" "काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतु-र्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम्" "अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्।" "अनुकर्तृगतत्वं चास्य निरस्यति " इत्यादि कथनेषु रङ्गमञ्चे अनुकारकनटेन प्रदर्शितं धीरोदात्तादिनायकानां विविधानामवस्थानाम् आङ्गिकवाचिकाहार्यसात्त्विकाभिनयरूपं प्रयोगविज्ञानमेवानुकरणं प्रतिभाति; किन्तु सूक्ष्मेक्षिकया दर्शनेन नवनिर्माणात्मकं कविव्यापाररूपमपि अनुकरणं भरतमुनेस्तमनुसरतां विपश्चितां च मतमिति निश्चिन्वन्ति समालोचक-विचक्षणाः ।

भरतमुनेः—

"एतद्रसेषु भावेषु सर्वकार्यक्रियासु च ।
सर्वोपदेशजननं नाट्यमेतद् भविष्यति ॥

धर्म्यं यशस्यमायुष्यं हितं बुद्धि-विवर्धनम् ।
लोकोपदेशजननं नाट्यमेतद् भविष्यति ॥

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
न स योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥

सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च ।
अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम् ॥

वेद-विद्येतिहासानामाख्यानपरिकल्पनम् ।
विनोदजननं काले नाट्यमेतद् भविष्यति[११]"॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"सन्ध्यन्तरैकविंशत्या चतुष्षष्टयङ्गसंयुतम् ।
षट्त्रिंशल्लक्षणोपेतं गुणालंकारभूषितम् ॥
महारसं महाभोगमुदात्तवचनान्वितम् ।
महापुरुषसञ्चारं साध्वाचारजनप्रियम् ॥
सुश्लिष्ट-सन्धियोगं च सुप्रयोगं सुखाश्रयम् ।
मृदुशब्दाभिधानं च कविः कुर्यात्तु नाटकम् ॥
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
न तत्कर्म न योगोऽसौ नाटके यन्न दृश्यते ॥
यो यः स्वभावो लोकस्य नानावस्थान्तरात्मकः ।
साङ्गाभिनयसंयुक्तो नाट्यमित्यभिधीयते ॥
तदेवं लोकभावानां प्रसमीक्ष्य बलाबलम् ।
मृदुशब्दं सुखार्थं च कविः कुर्यात्तु नाटकम्[17]॥"

इत्यादिकथनेन स्पष्टं भवति यत् कविव्यापाररूपमपि लोकवृत्तानुकरणं मुनेरभिप्रेतम् । अतएव तेन न केवलं रङ्गमञ्चोपयोगिनां बहिरङ्गरूपाणां चतुर्विधाभिनयानामेव सविस्तरं वर्णनं कृतम्, अपितु नाट्यान्तरङ्गरूपाणाम् प्रधानीभूतानां रसभावादीनामपि विशेषरूपेण वर्णनं कृतम्

अत्रेदं विभावनीयम्:—

यथैव च अनुकर्तृभिः कृतम् अनुकार्यवृत्तस्य अभिनयरूपमनुकरणं तत्तादात्म्यापादनरूपंभवति न तथा कविभिः कृतं लोकवृत्तानामनुकरणं कवेः प्रतिभाव्युत्पत्त्यभ्यासात् सृष्टं नवनिर्माणरूपम् । काव्ये हि कविभिः वस्तुनः त्रयाणां रूपाणामनुकरणं क्रियते, कर्तुं शक्यते च—

(क) (कविहृदये) वस्तुनः प्रतीयमानरूपस्य,
(ख) वस्तुनः सम्भाव्यरूपस्य (यथा तद्रूपं भवितुमर्हति) ।
(ग) वस्तुनः आदर्शरूपस्य (यथा तेन रूपेण भाव्यमिति) ।

एवञ्च कविकर्मणः साफल्यं वस्तुनः संभाव्यरूपस्य आदर्शरूपस्य चानुकरणेएव यतो हि तत्रैव प्रतिभायाः कल्पनायाश्च समुपयोगो भवति । तथाविधानुकरणेनैव काव्य-निबन्धनं धर्म्यं यशस्यमायुष्यं हितं बुद्धि-विवर्धनं लोकोपदेशजननं-धर्मार्थ-काम-मोक्ष-साधनञ्च भवति तेनैव च कविः वस्तुतः प्रजापतिपदवीं लभते ।

अरस्तूमहोदयेन अनुकरणात्मक कलासु उत्कृष्टतमायाः त्रासद्या लक्षणं कुर्वता प्रोक्तम्,—"त्रासदी कस्यचिद् गम्भीरस्य, स्वतः पूर्णस्य निश्चितायामयुक्तस्य कार्यस्यानुकृतिः, यस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माध्यमं नाटकस्य विभिन्नभागेषु विभिन्नरूपेण प्रयुक्ता सर्वविधालंकारालंकृता भाषा भवति, यत्रच त्रास-करुणयोरुद्रेकद्वारा मनोविकाराणां समुचितविरेचनं भवति "।[१८] एतल्लक्षणानुसारेण—

(क) त्रासदी कार्यस्यानुकृतेर्नाम ।

(ख) इदंकार्यं गम्भीरं स्वतः पूर्णं निश्चितायामयुक्तं च भवति ।

(ग) अस्य कार्यस्य समाख्यानं वर्णनं वा नभवति, अपितु प्रदर्शनं भवति ।

(घ) भाषा छन्दोलयगीतादिभिरलंकृता भवति । [१९]

(ङ) त्रासकरुणयोरुद्रेकद्वारा तादृशमनोविकाराणां विरेचनं भवति, येन त्रासद्याः प्रयोजनस्य—आनन्दानुभवस्य—सिद्धिर्भवति ।

अतएव च कारणात्त्रासद्या अनिवार्यरूपेण षडङ्गानि भवन्ति यानि तस्याः सौन्दर्य-निर्धारणं कुर्वन्ति । तानिच [१] कथानकम् [२] चरित्रचित्रणम्, [३] पदरचना, [४] विचारतत्त्वं भावतत्त्वं वा, [५] दृश्यविधानम्, [६] गीतञ्च । एतेषु कथानकं, चरित्रचित्रणं, विचारतत्त्वंचानुकृतेर्विषयः, दृश्यविधानम् अनुकृतेर्माध्यमम्;पदरचना तथा गीतमनुकरणस्य विधिः ।[२०]

अत्र स्वकाव्यशास्त्रे अन्यत्र प्रकरणे च अरस्तूमहोदयस्य अनुकरणार्थे प्रयुक्तः 'मीमेसिस' इति शब्दः कल्पनात्मकं पुनर्निर्माणं, नूतनसर्जनमित्याद्यर्थमेव बोधयति न तु वस्तुनो यथावद्रूपस्यानुकरणम् ।

'पारमार्थिकसत्यस्यानुकरणं जगत्, तस्यानुकरणं काव्यमिति अनुकृतेरनुकरणतया काव्यं सत्यादतीव दूरतरमतः काव्यंहेयमि'ति प्लेटोमहोदयस्य मतं दूषयन् काव्यात्मकमनुकरणं न यथावदनुकरणमपितु प्रेयःश्रेयःसमन्वितमादर्शरूपमिति प्रतिपादयँश्च अरस्तूमहोदयः अनुकरणस्य प्रयोगं न सङ्कुचितार्थे चकार, अपितु पूर्वप्रतिपादितदिशा भरतमुनेरभिप्रेतार्थेएव । अतएव अरस्तूमहोदयमते इतिहासात् काव्यं भव्यतरम्, यतः इतिहासे घटनाया यथावद् वर्णनं भवति काव्ये तु तस्यास्तथावर्णनं भवति यथा तथा घटनया भवितव्यम् । काव्ये दार्शनिकता भवति अतएव इदमितिहासान्महत्तरम् । काव्यस्य कथावस्तु सार्वभौमं सार्वकालिकञ्च, इतिहासस्य कथावस्तु देश-काल-विशेष-परिच्छिन्नम् । [२१] एवञ्चानुकरणसिद्धान्ते उभयोर्मतं समानतां भजते ।

(२) भाषा—

नाटकस्य भाषा-विषये यथा भरतमुनिना

"षट्त्रिंशल्लक्षणोपेतं गुणालंकारभूषितम् ।"[२२]

"शब्दानुदारमधुरान् प्रमदाभिनेयान् ।[२३]

" मृदुललितपदार्थं गूढशब्दार्थहीनम् ।"[२४]

इत्यादि प्रतिपादयता नाटकस्य शब्दप्रयोगैर्गुणालंकार-भूषितैर्भाव्यमिति निरूपितं तथैव अरस्तूमहोदयमतेऽपि त्रासद्या भाषा छन्दोलयगीतादिभिः सर्वविधालंकारैरलंकृता भवतीत्यनयोर्विचारे साम्यं वरीवर्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(नाट्य-काव्य-कथावस्तु)—

भरतमुनिमते—

"इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम् ।
पञ्चभिःसन्धिभिस्तस्य विभागाः परिकीर्तिताः ॥

इतिवृत्तं द्विधा...

आधिकारिकमेकन्तु प्रासङ्गिकमथापरम् ॥"[२८]

एतच्चेतिहासपुराणादिप्रसिद्धं कविकल्पितरूपमुत्पाद्यं चेति द्विविधम् ।

अरस्तूमहोदयमतेऽपि कथावस्तु घटनानां विन्यासरूपमेव यच्च कार्यव्यापारानुकरणरूपं भवति । एतच्च कथानकम् त्रासद्या सर्वप्रमुखं वस्तु । एतदेव एतस्या आत्मरूपम् ।[२९]

कथानकस्य एवंविधमहत्त्वप्रदाने अरस्तूमहोदयस्येयं वाचोयुक्तिः—

[१] त्रासद्यां न व्यक्तेरनुकरणं भवति अपितु कार्यस्य जीवनस्य चानुकरणं भवति ।

[२] जीवनं च कार्यव्यापारस्यैवापरं नाम । अतो जीवनस्यानुकृतौ कार्यव्यापारस्यैव प्रामुख्यम् ।

[३] सुखं दुःखं वा काव्य-जन्यप्रभावस्य स्वरूपम् । तच्च कार्यकलापे एव निर्भरम्, अतः कार्यं कथानकंवा त्रासद्याः साध्यं भवति ।

[४] चरित्रचित्रणं कार्य-व्यापारेण सह गौणरूपेण स्वत एव सामायाति ।

[५] कार्यव्यापारमन्तरा त्रासदी न भवितुमर्हति चरित्रचित्रणं विना भवितुं शक्नोति ।

[६] चारित्र्यस्याभिव्यञ्जकानि भाषण-विचारादीनि सर्वथा परिष्कृतान्यपि तथा सारभूत-कारुणिक-प्रभावं नोत्पादयन्ति यथा कथानकानां घटनानां च कलात्मकविधानानि ।

[७] त्रासद्याः प्रबलतमं रागात्मकतत्त्वं स्थितिविपर्ययाभिज्ञानरूपं कथानकस्यैवाङ्गम् ।

[८] अतएव नवोदितकलाकाराः भाषायाः परिष्कारे चरित्रचित्रणे च प्रथमं सिद्धिं लभन्ते, परन्तु कथानकस्य सफलनिर्माणे ते समयमपेक्षन्ते ।

एतावता अरस्तूमहोदयमते कथानकस्य सर्वाधिकमहत्त्वं सुस्पष्टम् ।

इदमत्र रहस्यम्—

तत्समये उपलब्धेषु साहित्येषु (१) कथानकस्य प्रामुख्येण, (२) वस्तुवादि-दृष्टिकोणे अमूर्तभावादिवर्णनापेक्षया मूर्तसंघटनादिवर्णनस्यैवाधिकमहत्त्वेन, (३) अनुकरणसिद्धान्ते चरित्रचित्रणाद्यपेक्षया कथावस्तुवर्णनस्य सहजतया, (४) रस-भाव-चरित्र-वर्णनस्यापि माध्यमतया इतिवृत्तस्यैव सत्त्वेन च अरस्तूमहोदयः नाटकादौ कथानकस्यैव माहात्म्यं प्रतिपादयांचकार ।

"इतिवृत्तंतु काव्यस्य शरीरं परिकीर्तितम्" इत्येवं प्रतिपादयता भरतमुनिना नाट्ये शरीररूपेण स्थितात् कथनकात् "न हि रसादृते कश्चिदर्थः प्रवर्तते[२७]" इत्येवं प्रतिपाद्य प्रधानीभूतस्य रसस्य आत्मरूपत्वं सुस्थिरीकृतम् । एतच्च सर्वथा समुचितम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यता हि भारतीये नाट्यदर्शने वस्तु–नायक–रसेषु रस एव प्रधानतमः । 'रसो वै सः[२४]'' इत्यादिश्रुत्या रसे एव आत्मस्वरूपत्वम् आत्माभिव्यक्तिरूपत्वं च । एवं च आत्माभिव्यक्तिरूपस्य रसस्य सफलप्रकाशकतयैव कथावस्तुनोऽपि साफल्यम् । अतएव काव्यस्य आत्मतत्त्वं रसध्वनिः । एततसिद्धान्ते च कथानकापेक्षया चारित्र्यस्याधिकं महत्त्वं चारित्र्यापेक्षया च आत्मभूतस्य रसस्य । एवं हि अरस्तूमहोदयस्य विचारात् भरतमुनेरयं विचारो युक्ततरः ।

अपरं च 'नाट्ये रस–भाव–चरित्र–चित्रणापेक्षया कथानकस्यैवाधिकं महत्त्वमिति अरस्तूमहोदयस्य कथनं प्रकारान्तरेणापि न स्वीकर्तुं योग्यम् । एतत्सम्बन्धे तेन यत् प्रतिपादितम्–'कथानकेन विना त्रासदी भवितुं नार्हति किन्तु चरित्रचित्रणं विना भवितुं शक्नोति' तदपि न सर्वथा समीचीनम् यतो घटनायाः कर्तृ–भोक्तृ–रूपेण पात्र व संघटकम् । तद्विना कथानकमेव कथं घटेत ? कथानकेन सह पात्राणां मनोवृत्तीनां प्रधानसम्बन्धोऽस्ति । पात्रमनोवृत्तिद्वारैव सामाजिकमनोवृत्तयः प्रेरिताः प्रभाविताश्च भवन्ति । एतत्-तत्त्वस्य आलेखनमेव चरित्रचित्रणं नाम । अतश्चरित्रचित्रणं विना कथानकं भवितुमर्हतीति तस्य कथनं न युक्तम् । अत एतदेव कथनं सर्वथा समीचीनं यत् कथानकं रागात्मकतत्त्वस्य वाहकम्, चरित्रचित्रणं तस्याधारः, रसश्च तस्य परिणामः अर्थाच्चरममुद्देश्यम् ।

[४] कथावस्तुन आयामः

नाटकीयकथावस्तुन आयामः अरस्तूमहोदयस्य मते यथासंभवं सूर्यस्यैकपरिक्रमणेन (अहोरात्रेण) किञ्चित्तदधिकेन वा समयेनैव सम्बद्धः, यद्यपि ततः पूर्वं तथा समयबन्धनं नासीत्[२७] ।

कथावस्तुनः एतादृशः सीमित आयमो भारतीये नाट्यशास्त्रे अपेक्षितो नास्ति, अतएव संस्कृतनाटकेषु तादृशसमयबन्धनं नावलोक्यते । कथानकस्य पूर्णतायाः प्रदर्शने एवं समयसीमाबन्धनं नाप्युचितं नैव संगतम् ।

[५] कथानकस्य एकान्वितिः

यथा भारतीये ''नाट्यशास्त्रे'' आधिकारिककथावस्तु आधारीकृत्यैव प्रासङ्गिकानामन्यकथानकानां च पञ्चसन्धिद्वारा वर्णनस्य विधानं वर्तते यथा च तेषां सर्वेषां निर्वहणसन्धौ एकार्थ्योपनयनद्वारा कार्यान्वितेर्निरूपणं दृश्यते तथैव अरस्तूमहोदयस्य 'काव्यशास्त्रे'ऽपि कथानकस्य एकान्विते[३०] प्रतिपादनं दृश्यते । अत्रापि मुख्यकथानकस्याङ्गतयैवान्येषां परस्परसम्बद्धानां कथानकानां वर्णनेन भवितव्यमिति निरूपितं वर्तते । तत्र कार्यान्वित्या सह स्थानान्विति-कालान्वित्योरप्यावश्यकत्वं प्रतिपादितं वर्तते । परन्तु संस्कृत–नाट्यशास्त्रे कालान्वितेः स्थानान्वितेश्च उपेक्षैवावलोक्यते; यतः पूर्णकथानकप्रयोगे एनयोरन्वित्योर्विधानं नैव संभवं नापि समीचीनम् ।

[६] कथावस्तुनः पूर्णता--

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अरस्तूमहोदयस्य विचारेण आदि-मध्यावसान-युक्तमेव कथावस्तु पूर्णम् । तादृशेनैव च पूर्णेन नाटकीयकथावस्तुना भाव्यम् । परन्तु संस्कृतनाट्यशास्त्रे उपर्युक्तपूर्णत्वसमन्वितमेव कथावस्तु नाटकस्य साफल्याय न भवति यदि तेन सहृदय-सामाजिक-जिज्ञासा-परितोषो न जायते । अत एतन्मतानुसारेण जिज्ञासापरितोष एव पूर्णताया निकषः ।

[७] कथानकस्य संभाव्यता--

नाटकीयकथानकसंभाव्यताविषये उभयोर्मतं समानमेव । कथानकस्य संभाव्यतागुणद्वारेणैव कथानकस्य काम्यत्वमन्यथा असंभाव्यतया निरुपाख्यप्रसङ्गापत्त्या तत्र सहृदयानां प्रवृत्तिरेव न स्यात् ।

[८] इतिवृत्तस्य सहजविकासः

यथा भरतमुनिमते इतिवृत्तस्य सहजविकासो नाट्यसन्ध्यङ्गद्वारा भवति तथैव अरस्तूमतेऽपि संवृति-[31] विवृति[32]--'स्यतिविपर्यया[33]भिज्ञान[34]द्वारा कथानकस्य सहजो विकासो भवति ।

[९] कुतूहलम् --

अरस्तूमहोदयमते नाटकीयकथानके कुतूहलस्य तत्परितोषस्य च निरूपणं नितरामावश्यकम् । सामाजिकानां पुरतः कुतूहलोत्पादनाय घटनानामुपस्थित्या अकस्मादेव भाव्यम् । किन्तु तत्र सूक्ष्मरूपेण कार्य-कारण-भावेनापि भवितव्यम्[35] ।

भतरमुनिना "नाट्यशास्त्रे" सन्धिप्रयोजनप्रतिपादनावसरे "आश्चर्यवदभिख्यातम्"[36] इतिकथयता कथानके आकस्मिकतायाः— कुतूहलस्य-प्रतिपादनं कृतम् ।

"कौतूहलोत्तरावेशो भवेत्तु परिभावना"[37]

इति मुखसन्धेः परिभावनारूपप्रभेदे तथा-

"अद्भुतस्य च सम्प्राप्तिर्भवेत्तदुपगूहनम्"[38]

इति निर्वहणसन्धेः उपगूहनरूपप्रभेदे कुतूहलस्य स्पष्टं प्रतिपादनं वरीवर्ति ।

त्रासद्याः संघटनार्थं यथा अरस्तूमहोदयेन प्रस्तावनायाः,[39] उपाख्यानस्य,[40] उपसंहारस्य[41] च निरूपणं कृतं तथा "नाट्यशास्त्रे"ऽपि प्रस्तावना प्रासङ्गिककथावस्तु-फलागमादिषु तेषां निरूपणं विद्यते ।

एवञ्च अरस्तूमहोदयस्य मते भरतमुनेश्च नाट्य-विषयक-मौलिकविचारेऽतीव साम्यं वर्तते ।

१. Aristotle's Poetics
२. RHETORICS.
३. 'नाट्यशास्त्रे' १, १०४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. तत्रैव १, १०८।
५. तत्रैव १, ११६, ११८।
६. तत्रैव सप्तमाध्याये ९५ तमे पृष्ठे।
७. तत्रैव २१, १२०।
८. तत्रैव २१, १३१।
९. तत्रैव १७, १२३।
१०. 'काव्यप्रकाशे' रसप्रकरणे।
११. अभिनवभारत्याम् ३७ तमे पृष्ठे।
१२. दशरूपके १, ७।
१३. तत्रैव दशरूपावलोके।
१४. 'साहित्यदर्पणे' ३, ४८।
१५. तत्रैव।
१६. 'नाट्यशास्त्रे, १, ११०– ११६।
१७. तत्रैव २१, ११८–१३१।

१८. Tragedy, then, is an imitation of an action that is serious, complete, and of a certain magnitude; in language embellished with each kind of artistic ornament, the several kinds being found in seperate parts of the play; in the form of action, not of narration; through pity and fear effecting the proper purgation of thise emotions, Poetics VI.

१९. By 'Language embellished' I mean language into which rhythem, harmony and some enter. Ibid VI.

२०. Every tragedy, therefore, must have six parts, which parts determine its quality—narely, plot, character, Diction, Thought, Spectacle, Song. Two of the parts constitute the medium of imitation. Ibid. VI.

२१. The true difference is that one relates what has happened, the other what may happen. Poetry, therfore, is a more philosophical and a higher thing than history: for poetry tends to express the Universal, history the particular. Ibid IX.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२. "नाट्यशास्त्रे" २१, ११८ ।

२३. तत्रैव १७, १२१ ।

२४. तत्रैव १७, १२२ ।

२५. तत्रैव २१, २ ।

२६. The plot, then, is the first princple, and as it ware, the soul of a tragedy. Poetics VI.

२७. "नाट्यशात्रे" रसप्रकरणे ।

२८. तैत्तिरीयोपनिषदो ब्रह्मानन्दवल्ल्याम् ।

२९. For tragedy endeavours, as far as possible, to confine itself to a simple revolution of the sun, or but slightly to exceed this limit; where as the epic action has no limit of time; though at first the same freedom was admitted in Tragedy as in the Epic poem. Poetics. V

३०. Unity of plot.

३१. Complication.

३२. Unravelling.

३३. Reversal of Situation.

३४. Reeognition.

३५. Poetics IX.

३६. "नाट्यशास्त्रे" २१, ५४ ।

३७. तत्रैव २१, ७५ ।

३८ तत्रैव २१, १०३ ।

३९. PROLOGUE.

४०. EPISODE.

४१. EXODE.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डा० सच्चिदानन्दशचौधरी

महाकवेरश्वघोषस्य काव्येषु पात्राणामन्तर्द्वन्द्वानि

आधुनिकैः साहित्य-मीमांसकैः भृशमिदं कथ्यते यत् प्राचीनेषु संस्कृत-महाकाव्य-नाटकेषु पात्राणामन्तर्द्वन्द्व-चित्रणस्य सर्वथाऽभावो दृश्यते । रसैकप्राणाः संस्कृत-कवयस्तु सुतरामेवैतत् प्रवृत्ति-पराङ्मुखा आसन् । प्रवृत्तिरियं जीवन-दर्शनस्य भौतिकतावादितया यथार्थ-चित्रण-परायणतया च पाश्चात्येष्वेव कविषु नाटककारेषु च लभ्यते । परमीषदवधान-दानेनापि आधुनिकानां समालोचकानामेषा तर्क-जल्पना कपोल-कल्पना-पदवीमेवावाप्स्यतीति मे सुचिन्तिता मतिः । एतदर्थं विशालस्य गीर्वाण-वाङ्मयस्यान्यतमं काव्य-कर्त्तारमश्वघोषमेव पुरस्कृत्य तस्योभयोः बुद्धचरित-सौन्दर-नन्दाभिधानयोः महाकाव्ययोः कतिचिदंशाः उदाह्रियन्ते येनेयमुपर्युक्ताऽऽधुनिकानां धारणा वैपरीत्यमालप्स्यत इति मदीयाशंसा ।

कनिष्क-नाम्नो राज्ञः शासन-काले अश्वघोषो नाम बौद्ध-महाकविरजायतेति सर्वैरपि ऐतिहासिकैः विचक्षणैः स्वीक्रियत एव । अयं यथैव प्रतिभाशाली कविरासीत् तथैव पारंगतस्तार्किकः, वैराग्य-जुष्टः परिव्राजकश्च । सुललितया काव्य-सरण्या बौद्ध-दर्शनस्य प्रचार एव तस्य महानुभावस्य लक्ष्यमासीत् ।

यद्यपि पात्राणामन्तर्द्वन्द्व-चित्रण-दृष्ट्या बुद्धचरितापेक्षया सौन्दरनन्दमेवाधिकं साफल्यमवाप इति मे निर्णीता मतिः परं बुद्धचरितमपि न सर्वथैतद्वैशिष्ट्य-विहीनं काव्यमिति बोधनीयम् । बुद्धचरितस्य महाकाव्यस्य नायको गौतमो बुद्धः, तत्सम्बद्धाः अनेके जनाश्चात्र वर्णिताः । गौतमस्तु प्रारम्भादेव कृत-संकल्पो, दृढ-व्रतः बाधा-विघ्नैरप्रतिहन्यमानः स्वकीयेऽभीप्सिते मार्गेऽग्रेसरोऽभूत्, अतस्तस्य जीवने कदाचिदपि मनोद्वन्द्वस्यावसरो नोपस्थितः । स्वभावतः कविनाऽश्वघोषेणापि तस्य व्यक्तित्व-निरूपणे न तथोद्भावितं येन स मनोद्वन्द्वस्य विषयतामुपेयात् । परमन्येषाम् विविधानां पात्राणां चरित्र-चित्रण-प्रसङ्गे नैतद्दृष्ट्या पश्चात्पदो मह कविरश्वघोषः ।

एतन्निमित्तम् सर्वप्रथमं गौतम-जनकस्य शुद्धोदनस्य प्रसङ्गो दृश्यताम् । यदा शुद्धोदनेनेदं ज्ञातं यत् सिद्धार्थस्य हृदि संवेगोऽजायत तदा तेन सांसारिक-विषयेषु तमासक्तं कर्त्तुं अनेके प्रयत्नाः कृताः । परं दृढ़-व्रतो गौतमस्तु स्वीयान्निर्धारितात् लक्ष्यादपसर्त्तुमशक्यतां प्रादर्शयत् । अन्ततः एकस्मिन् दिवसे सहसैव सिद्धार्थः पितरमुपसृत्य महाभिनिष्क्रमणं ययाचे । शाक्यराजस्तु श्रुत्वैवैतद् कुलिश- कठोरं बचनं मोहमुपगतः । प्रत्यावृत्तायान्तु चेतनायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽचिन्तयत्— 'हन्त ! निर्वाणार्थिनः सिद्धार्थस्य महाभिनिष्क्रमणन्तु श्रेयस्करं परमेतस्योपभोग–क्षमं नवं वयः विपुलो वैभवश्च नोपेक्षणीये। प्राप्त–वार्द्धक्यस्य मम संन्यास–गृहणमुचितमासीत्,परमयं तरुणः सिद्धार्थः परिव्राजकत्वमाप्तये प्रयतत इति महत् खेदास्पदम्। इत्यमन्तर्दाह– ज्वलितः शुद्धोदनः तरुणं तनयन्निवारयन् निश्चयादकथयत्ः –

"प्रतिसंहर तात ! बुद्धिमेतां न हि कालस्तव धर्मसंश्रयस्य।
वयसि प्रथमे मतौ चलायां बहुदोषा हि वदन्ति धर्मचर्याम् ॥

विषयेषु कुतूहलेन्द्रियस्य व्रतखेदेष्वसमर्थ – निश्चयस्य।
तरुणस्य मनश्चलत्यरण्यादनभिज्ञस्य विशेषतो विवेके ॥

मम तु प्रिय मे ! धर्मकालस्त्वयि लक्ष्मीमवसृज्य लक्ष्मभूते।
स्थिर– विक्रम ! विक्रमेण धर्मस्तव हित्वा न गुरुं भवेदधर्मः" ॥ इति।

मनोद्वन्द्वस्यापरः प्रसङ्गः बुद्धचरितस्य छन्दक–विसर्जननाम्नि सर्गे दरीदृश्यते। छन्दकः गौतमस्य पार्श्वकः अश्ववाहश्चास्ति।

कयाचित् दैव्या प्रेरणया प्रेरितेन छन्दकेन महाभिनिष्क्रमण–प्रवृत्ताय सिद्धार्थाय अश्वो दत्तः परं यदा सः तं वने सम्प्रेष्य राजधानीमागन्तुकामोऽभूत तदा तस्य ग्लानि–पूरितं हृदयं विदीर्ण–प्रायं संजातम्। तस्य मनसि अनेके विचाराः समुत्पद्यमानाः आसन्। गृहं परावृत्य महाराजं, महाराज्ञीं, गौतमपत्नीं यशोधरां सः च किं निवेदयिष्यतीति निश्चेतुमसमर्थः छन्दकः सिद्धार्थमेवमवोचत्ः–

तन्नार्हसि महाबाहो विहातुं पुत्रलालसम्।
स्निग्धं वृद्धं च राजानं सद्धर्ममिव नास्तिकः ॥

संवर्धन–परिश्रान्तां द्वितीयां तां च मातरम्।
देवीं नार्हसि विस्मर्तुं कृतघ्न इव सत्क्रियाम् ॥

बाल-पुत्रां गुणवतीं कुल–श्लाघ्यां पतिव्रताम्।
देवीमर्हसि न त्यक्तुं व्यसनीवोत्तमं यशः ॥

नास्मि यातुं पुरं शक्तो दह्यमानेन चेतसा।
त्वामरण्ये परित्यज्य सुमन्त्र इव राघवम् ॥"

बुद्धचरितस्य सर्वाधिको मार्मिकः प्रसङ्गः यशोधरा–विलापोऽस्ति। यदा छन्दको नामाश्ववाहः कन्थको नामाश्वश्च वनात् प्रत्यावृत्तौ तदा गौतमी सहसैव गौतमस्य महाभिनिष्क्रमण-वृत्तान्तं परिज्ञाय दुःखाभिभूता संजाता। सा तु स्वपतेरभिनिष्क्रमणस्य निदानं निश्चेतुमशक्ता विविधाभिः नव-नवोद्भावनाभिः भावतरङ्गैस्तरङ्गायितं स्वहृदय– देशमन्तर्द्वन्द्वतामानयतिस्म। गत-धैर्या सा यशोधरा कदाचित् तपोभूमेः तप-साधनायाश्च कष्टकारिणो दृश्यान् परिकल्प्य भूयसीं व्यथामवाप, कदाचित् पत्नी-विरहितेन सिद्धार्थेन विहितस्य धर्मानुष्ठानस्य वैफल्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निश्चकर्ष, कदाचित् तपश्चर्यया स्वर्गं गत्वा अप्सरसामुपभोगस्योपलब्धये प्रियतमः प्रयतत इति चानुममौ । इत्थमनेकाभिरुद्भावनाभिरन्तर्दह्यमाना यशोधरा मनस्यचिन्तयत्:—

" सुजात–जालावतताङ्गुली मृदू निगूढगुल्फौ बिसपुष्प–कोमलौ ।
वनान्त–भूमिं कठिनां कथं नु तौ सचक्रमध्यौ चरणौ गमिष्यतः ॥

विमानपृष्ठे शयनासनोचितं महार्हवस्त्रागुरु–चन्दनार्चितम् ।
कथं नु शीतोष्ण–जलागमेषु तच्छरीरमोजस्वि वने भविष्यति ॥

शुचौ शयित्वा शयने हिरण्मये प्रबोध्यमानो निशि तूर्य–निस्वनैः ।
कथं बत स्वप्स्यति सोऽद्य मे व्रती पटैकदेशान्तरिते महीतले ॥

स मामनाथां सहधर्मचारिणीमपास्य धर्मं यदि कर्त्तुमिच्छति ।
कुतोऽस्य धर्मः सहधर्मचारिणीं विना तपो यः परिभोक्तुमिच्छति ॥

शृणोति नूनं स न पूर्वपार्थिवान् महासुदर्श–प्रभृतीन् पितामहान् ।
वनानि पत्नीसहितानुपेयुषस्तथा हि धर्मं मदृते चिकीर्षति ॥ "इति ।

एवं बुद्धचरितस्य महाकाव्यस्य सर्वाण्यपि पात्राणि मनोद्वन्द्वस्य विषयतामलभन्त । एतस्यापवाद–रूपेण केवलं महाकाव्यनायकः गौतम एव प्रस्तोतुं शक्यते यः प्रारम्भादेव कृत–संकल्पतया दृढ–निश्चयतया च न मनोद्वन्द्वतामाजगाम । परं सोऽपि संवेगोत्पत्तेः पूर्वस्मिन्, जरा जर्जरितान् वृद्धान् रोगग्रस्तान् कृश–कायान् जनान्, अकाल एव काल–कवलितान् मृत–मनुष्यांश्च दृष्ट्वाऽन्तर्व्यथां गत आसीदेव । महाकविनाऽश्वघोषेण सिद्धार्थस्य एतस्याः मनोदशायाः समुचितः उपयोगः स्व-रचनायां नाकारि इति त्वन्यत् । एषः प्रसङ्गोऽपि तत्रत्यः तस्मिन् काव्ये व्यञ्जनया एव ध्वन्यते ।

अश्वघोषस्यापरं सौन्दरनन्दाभिधानं सुललितं महाकाव्यम् । एतस्मिन् महाकाव्ये महात्मनो बुद्धस्य भ्रातुर्नन्दस्य परिव्रजनम् वर्णितमस्ति । गौतम–बुद्धस्य प्रभावात् नन्दः स्व–भार्यामनिन्द्य-सुन्दरीं सुन्दरीनाम्नीं परित्यज्य संन्यासमङ्गीचकार । परं तस्य हृदि द्वन्द्वात्मकानां विचाराणां तादृशं वात्याचक्रम् समुत्थितम् यस्मिन् सर्वेऽपि बुद्ध-प्रदत्ताः उपदेशाः आदर्शाश्च विलीनाः संजाताः । नन्दस्तु वपुषा बौद्ध भिक्षोः वेषं जग्राह परं तस्य मनस्तस्यां निसर्ग-सुन्दर्यां सुन्दर्यामिव सर्वथाऽऽसक्तमासीत् । सः यत्रकुत्रप्यागच्छत् सर्वत्र स्व–प्रेयस्या एव प्रतिकृतिमङ्कितामपश्यत् । लता–गुल्मेषु, पशु–पक्षिषु, सरःसरित्सु च तेन प्रियतमाया एव प्रतिरूपमदर्शि । अश्वघोषेण सौन्दरनन्दे प्रसङ्गोऽयमित्थं प्रस्तुतः :—

"प्रियां प्रियायाः प्रतनुं प्रियङ्गुं निशाम्य भीतामिव निष्पतन्तीम् ।
सस्मार तामश्रुमुखीं सबाष्पः प्रियां प्रियङ्गुप्रसवावदाताम् ॥

पुष्पावनद्धे तिलकद्रुमस्य दृष्ट्वान्यपुष्टां शिखरे निविष्टाम् ।
संकल्पयामास शिखां प्रियायाः शुक्लांशुकाट्टालमपाश्रितायाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लतां प्रफुल्लामतिमुक्तकस्य चूतस्य पार्श्वे परिरभ्य जाताम् ।
निशाम्य चिन्तामगमत् तदैवं शिलष्टा भवेत् मामपि सुन्दरीति ॥

पुष्पैरुपाला अपि नागवृक्षाः दान्तैः समुद्गैरपि हेमगर्भैः ।
कान्तार-वृक्षा इव दुःखितस्य न चक्षुराचिक्षिपुरस्य तत्र ॥" इति ।

भगवतो बुद्धस्य भ्रातुर्नन्दस्य मनसि विचित्रमेवैवं द्वन्द्वमजायत । एकतः तस्या अनुपम-सुन्दर्याः प्रेयस्याः प्रेमासीत् अपरतः भगवतो बुद्धस्य वैराग्य-पूर्णाः उपदेशाः आसन् । नन्देनेदं तथाऽनुभूतं यथा सः द्वयोः रथ चक्रयोर्मध्ये समागतो भवेत् यस्मात् स्थानात् कस्यामपि एकस्यां दिशि अपसरणे प्राणानां परित्राणं नास्ति । स तु तान् स्थिर-धियो बौद्ध-भिक्षून् विलोक्य विस्मितोऽभवत् यान् स्वप्रेयसीनां चपलानि विलोचनानि किञ्चिदपि न बाधन्ते स्म । एतादृश्यामेव मनोऽवस्थायाम् सः उद्गिरति :–

"अद्यापगच्छामि सुदुष्करं ते चक्रुः करिष्यन्ति च कुर्वते च ।
त्यक्त्वा प्रियामश्रुमुखीं तपो ये चेरुश्चरिष्यन्ति चरन्ति चैव ॥

ज्ञानं न मे तच्च शमाय यत् स्यात् न चास्ति रौक्ष करुणात्मकोऽस्मि ।
कामात्मकश्चास्मि गुरुश्च बुद्धः स्थितोऽन्तरे चक्रगतेरिवास्मि ॥

अहं गृहीत्वापि हि भिक्षुलिङ्गं भ्रातृषिणा द्विर्गुरुणानुशिष्टः ।
सर्वास्ववस्थासु लभे न शान्तिं प्रियावियोगादिव चक्रवाकः ॥

बद्ध्वासनं पादप-निर्भरस्थः स्वस्थो यथा ध्यायति भिक्षुरेषः ।
शक्तः क्वचिन्नाहमिवैष नूनं शान्तस्तथा तृप्त इवोपविष्टः ॥ इति ।

नन्द-भार्यायाः सुन्दर्या मानसी दशाऽपि सर्वथा द्वन्द्वात्मिका एव वर्णिताऽस्ति । तस्याः पतिः पूर्वमकथयत् यत् कपोल-पत्रावल्याः अशुष्कावस्थायामेव सः परावर्तिष्यते, परं भगवता बुद्धेन बलात् प्रव्राजितः सः स्वीयस्य वचनस्य पालनं कर्तुं सर्वथाऽसमर्थः संजातः । सुन्दरी अनवरतमजस्रं रुदती एव कालं व्यतिगमयति स्म । तस्याः मनसि अनेके अनुकूलाः प्रतिकूलाश्च विचाराः समुदपद्यन्त व्यलीयन्त च । अन्तर्द्वन्द्वाभिभूता सा किंचिदपि निर्णेतुमसमर्था भृशं शङ्कते—

"एष्याम्यनाश्यान—विशेषकायां त्वयीति कृत्वा मयि तां प्रतिज्ञाम् ।
कस्मान्नु हेतोर्दयित-प्रतिज्ञः सोद्य प्रियो मे वितथ-प्रतिज्ञः ॥

आर्यस्य साधोः करुणात्मकस्य मन्नित्य-भीरोरतिदक्षिणस्य ।
कुतो विकारोऽयमभूतपूर्वः स्वेनापरागेण ममापचारात् ॥
रतिप्रियस्य प्रियवर्तिनो मे प्रियस्य नूनं हृदयं विरक्तम् ।
तथा हि रागो यदि तस्य न स्यात् मच्चित्तरक्षी न स नागतः स्यात्" ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोद्वन्द्वव्यथितया तयेदपि अनुमीयते यत् तस्याः पतिर्नन्दः कदाचित् अन्यस्याः प्रेयस्याः प्रेम्णि सक्तो जातः येन स मां नानुस्मरति। सा साक्रोशं व्याहरति—

"लेखार्थमादर्शमनन्य-चित्तो विभूषयन्त्या मम धारयित्वा।
बिभर्ति सोऽन्यस्य जनस्य तच्चेत् नमोस्तु तस्मै चलसौहृदाय॥" इति।

एवमश्वघोषेण स्वकीययोरुभयोर्महाकाव्ययोर्मध्ये पात्राणामन्तर्द्वन्द्वचित्रणेऽविकलं साफल्यमवापि। तत्त्वतः अश्वघोषस्य काव्य-ग्रन्था एतेनैव कारणेन महतीं प्रसिद्धिं गताः। अश्वघोषस्य काव्य-पात्राणामन्तर्द्वन्द्व-चित्रणं विलोक्य न कश्चिदपि नूतनः काव्यालोचक एवं कथयितुं शक्नोति यत् संस्कृत-काव्येषु पक्षोऽयमुपेक्षितइति। मदीयेयं धारणा यत् संस्कृत-साहित्ये सर्वत्रापि काव्य-नाटकेषु पात्राणामन्तर्द्वन्द्ववर्णनमुपलभ्यते। दृष्टि-भङ्ग्या परिवर्त्तनेन स्वस्थया समालोचनया च तथ्यमुपलभ्यत इति अवधान-दानमावश्यकम्। इह तु 'स्थाली-पुलाक-न्यायेन' मया अश्वघोष एव समुपस्थापितः। एतावता नेदं सिद्ध्यति यदन्यत्रैतद्वैशिष्ट्यस्य अभाव इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. चूडानाथभट्टरायः

मालतीमाधवे भवभूतिः

कविः समाजस्य स्वरूपं निभाल्य सर्वेषां पुरतः प्रस्तौति दृश्यकाव्यम्। तत्र दर्शकाः समाजं विलोकयन्ति रङ्गमञ्चे। किञ्च परिशीलनेन गुणदोषौ विवेचयन्ति विपश्चितः। संस्कृतेः परम्परा, समाजस्य भावना, कवेः कल्पना च नाटके सुरक्षिता भवति। नाटकञ्चाऽभिनयद्वारा प्रस्तूयते। पात्रानुसारेण संभाषणं, तस्मिन् स्वनिहितस्याशयस्य प्रकाशनमपि महद्दुष्करं कार्यं भवति। रसानुबोधेन स्वोद्देश्ये समाजानुनयनं कुर्वन्ति कवयः। तस्मादेवाकथयन् प्राचार्याः "नाटकान्तानि काव्यानि" इति। अतएव संस्कृतभाषायां नाटकस्य माहात्म्यं सर्वोत्कर्षेण वर्वर्ति।

भवभूतिः सिद्धहस्तः किल नाटकरचनायाम्। स कविः सप्तमशतवैक्रमाब्दे प्रादुर्बभूव। तस्मिन् समये समाजस्य कीदृशी अवस्था आसीत्। तस्य नाटकस्याऽध्ययनेन परिज्ञायते। वीरकरुणशृङ्गाराः त्रय एव भवन्ति स्थायिभावा रसा इति विदुषां मतमस्ति। रसत्रयं प्रतिपादयितुं महाकविरसौ महावीरचरित–मालतीमाधवोत्तररामचरिताभिधानानि त्रीणि नाटकानि व्यरचयत्। वीररसे महावीरचरितं जागर्ति। उत्तररामचरिते 'एको रसः करुण एवेति स्वसिद्धान्तं प्रत्यपीपदत्। तथैव शृङ्गारे मालतीमाधवं नाटकं सुशोभते। किञ्च मर्यादापुरुषोत्तमस्य रामभद्रस्य चरितं पुरस्कृत्य नाटकद्वयं रचयति स्म कल्याणाभिमुखः कविः।

मालती माधवे कवेः समाजं प्रति विद्रोहः परिदृश्यते। मौलिके समाजिके नाटकेऽस्मिन् वृद्धविवाहस्योपहासं, पाखण्डधर्मस्य विनाशं सत्यप्रणयस्य विजयं च प्रतिपादयति नाटककारः। कामन्दकीसदृशी तपस्विनी मालतीतुल्या प्रणयपरायणा, कपालकुण्डलातुल्या पाखण्डधर्मानुरक्तात्र नाटके स्त्रियः सन्ति। नन्दमाधवमकरन्दाघोरघण्टा अपि पुरुषपात्रे विद्यन्ते। सप्तशतवैक्रमाब्दस्य भारतवर्षस्य समाजः सुरक्षितोऽस्ति तत्र। नरहिंसायाः स्वरूपं, बौद्धभिक्षुस्य श्रमणिञ्च याथातथ्येन स्थापयति। न किल तत्र साम्प्रदायिकःकविर्विभाति। पतिपत्न्योः परस्परं ज्ञप्तिं निर्दिश्य महाकविरित्थं श्लोकयामास—

प्रेयो मित्रं बन्धुता वा समग्रा सर्वे कामाः शेवधिर्जीवितं वा।
स्त्रीणां भर्ता धर्मदाराश्च पुंसामित्यन्योन्यं वत्सयोर्ज्ञातमस्तु॥ इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मर्त्यमपि स्वर्गयति कविः प्रणयरससेचनेन। कालिदासप्रभृतयोऽपि नाशक्नुवन् तथा प्रतिपादयितुम्। किञ्च समाजस्थं दोषं विलोक्य व्यथितः कविः स्वानुभूतिं प्रकटयितुं यदा प्रयतते तदा नेत्ररोगी दीपशिखामिव तं जनं समाजो निर्वापयति। परन्तु न हि विरमति तदापि भवभूतिर्मतः स्वकृत्यात्। तस्य बलवती आशा पुरतः प्रोत्साहयति। सत्यमाह महाकविः—

उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा।
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥ इति।

त्रिभुवनविश्वविद्यालयस्य सप्तमदीक्षान्तसमारोहावसरे मालतीमाधवनाटकं प्रदर्शितमासीत्। नाटकं विलोकयितुं विश्वविद्यालयकुलपतयः श्री५महाराजाधिराजाः समागच्छन्। एतादृशं प्रशस्यं कार्यं वयं सर्वे समर्थयामः। अनया दिशा पुरातनः समाजो यदि नाम रङ्गमञ्चे प्रस्तूयेत तदा संस्कृतज्ञा अन्धविश्वासिनः प्रगतिमार्गनिरोधकाः इत्यादयो दोषाः स्वतो विलीना भवेयुः।

अस्मिन् कार्ये पण्डितान् प्रोत्साह्य उपकुलपतिः रुद्रराजपाण्डेयः प्रधानाचार्य सूर्यबहादुरशाक्यश्च स्वकर्तव्यं प्रदर्शयामासतुः। हिन्दु-राज्ये संस्कृतस्य प्राथम्यं न विवादास्पदं भवति। संस्कृतस्य न्यासो नेपालस्य हस्ते विद्यते। एकमात्रं हिन्दुराज्यं विद्यते तत्रापि यदि अस्य महिमा न भवेत् तदा कस्य हानिः स्यात्, एतदेव विचारणीयं विद्यते। यथा आङ्ग्लभाषायाः विशिष्टाध्ययनाय आक्सफोर्डविश्वविद्यालये गच्छन्ति तथैव संस्कृतस्य संस्कृत्यध्ययनाय नेपाले समागच्छन्तु सर्वे इत्याशा मम हृदि सदैव स्फुरति। भवभूतेः आशा इव ममापि सफली-भवतु सा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. अम्बिकाप्रसादोऽधिकारी

सुलोचनामहाकाव्यं परम्परायां नवीनः प्रयोगः

सुलोचनानामकः प्रबन्धो नेपालीयसाहित्यजगति आदिमहाकवेः श्रीलक्ष्मीप्रसाददेवकोटामहोदयस्य द्वितीयं महाकाव्यम्। एतदग्रजं शाकुन्तलं २००२ वैक्रमाब्दे आदिमहाकाव्यात्मनोदियाय। एतदुदयात् पूर्वं नेपालीसाहित्ये महाकाव्यं हिमाच्छन्नदेशे सर्प इवासीत्। केचन नैराश्यवादिनो नेपालीभाषायां महाकाव्यग्रथनमेवाशक्यमिति भ्राम्यन्ति स्म। समर्थाः प्रतिभाः साधारणजनैरशक्यमिति तर्कितमेव शक्यमिति निदर्शयन्ति। सारस्वतः कविः शाकुन्तलं महाकाव्यं जगुन्थ, नेपालीसाहित्यिकांश्चमच्चकार। त्रिभिरेव मासैः सश्लोकिताः सप्तत्रिंशदधिकैकोनविंशतिशतश्लोका येषु बहवः श्लोकाश्चतुरः पादानतियन्ति, कतिपये श्लोकाः शताधिकपादयुक्ता अपि सन्ति देवकोटामहोदयस्यासामान्यां कवित्वशक्ति चकासयन्ति। कतिचन साहित्यिका असाधारणीभ्यां व्युत्पत्तिप्रतिभाभ्यामुज्जृम्भमाणं शाकुन्तलमसहमाना उत्कलितैरनेकैर्दोषैर्दूषयितुमारभन्त दुरूहकल्पनागर्भं, दुर्बोधशब्दबहुलञ्चेति; न त्रिभिर्मासैरुपनिबद्धमिति; सामयिकी जनभावना महाकाव्ये न प्रतिफलितेति। कृतिनो वचसा न विवदन्ते, अपभाषकान् सुकृतेनैव प्रतिभाषन्ते। अपभाषकाणां मुखमुद्रणाय देवकोटामहोदयः सुलोचनामहाकाव्यमुपनिबद्धवान् दशभिरेव दिवसैः परिशीलयतां सुबोधं विधाय, यथासम्भवं सामयिकैः सामाजिकरूपरागैः रञ्जयित्वा। परप्रशंसने कदर्याश्छिद्रमेवान्वेषयन्ति। महाकविस्तादृशान् पुरोभागिन उपहसन् सुलोचनाभूमिकायां लिखति—अस्य महाकाव्यत्वकथनमलज्ञताप्रकाशनमेवेति केचनाक्षिपेयुरिति।

वस्तुतः एतस्मिन् महाकाव्ये ईदृशाक्षेपस्यावसरो नास्ति। एतन्महाकाव्यं महाकाव्यपरम्परायां नवीनः प्रयोगः। न च नेपालीसाहित्ये सुदृढा परम्परैव न दृश्यते, महाकाव्यपरम्परायास्तु अभाव एव सुलोचनानिबन्धसमये। नेपालीसाहित्ये प्रथमो महाकविरेव लक्ष्मीप्रसादः। तस्यैव वर्षैकज्येष्ठस्य प्रथममहाकाव्यस्य परम्परामूलत्वकल्पनं, एकवर्षकनिष्ठस्य द्वितीयमहाकाव्यस्य परम्परायां नवीनप्रयोगत्वकल्पनं न कथमपि तर्कसहमिति वाच्यम्। संस्कृतसाहित्यपरम्पराया एव नेपालीपरम्परागतत्वात्। संस्कृतसाहित्यपाठकैरेव नेपालीभाषायां साहित्यरचनमारब्धम्। संस्कृतवाङ्मयस्य वस्तुना, शिल्पेन च नेपालीसाहित्यं प्रकाशमागाम, विकासपथे ससार। यदि निष्पक्षं सत्यमन्विष्येत तदाऽद्यपर्यन्तं नेपालीसाहित्यसेविषु संस्कृतच्छात्राणामाधिक्यं लभ्येत। नेदं कस्याश्चन भाषाया यशोगानम्, अपि तु सत्यस्य कथनमात्रम्। संस्कृतसाहित्यस्यापूरेणैव नेपालीसाहित्यं लब्धभूमिकं विद्यते, विकसद् वर्तते, उत्तरोत्तरं संवर्धिष्यते, आकल्पं च स्थास्यतीत्यत्र न विज्ञानां विवादावसरः। ननु संस्कृतेतर–साहित्यानां नेपालीसाहित्ये महान् प्रभावो विद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्यत्वे बौद्धिकतावादिनः साहित्यिका विश्वसाहित्ये दृश्यमानाननेकान् प्रयोगान् प्रयुञ्जानाः सन्तीति चेत् सत्यम् । एतादृशी प्रवृत्तिः, यदि राष्ट्रियेणैव रूपेणौचित्येन च प्रवर्तमाना, वाञ्छनीयैव साहित्यस्य समृद्ध्यर्थं, विस्तारार्थं, विश्वजनीनतासंपत्त्यर्थम् । उक्तः प्रभाव, उक्ता प्रवृत्तिश्च नेपालीसाहित्यस्य संस्कृतसाहित्यपरम्परामूलत्वं न मनागप्यपकुरुतः । शाखाप्रशाखापत्रपल्लवादिभिर्मूलं सुदृढमेव भवति । शाखादीनां समृद्धिर्मूलस्य स्वस्थत्वं दृढत्वञ्चानुमापयति । अन्तरराष्ट्रियताया विकासो राष्ट्रमुपकरोति । एवमेवान्तरराष्ट्रियवस्तुशिल्पयोः प्रभावो विकासो वा परम्परायाः मूलस्य संस्कृतसाहित्यस्य नापकारकः किन्तूपकारक एव भवति । केवलं मूलं नोपेक्षणीयम्, न चोपेक्षितुं शक्यम् । दृष्टं सर्वैः संस्कृतोपेक्षाप्रसङ्गेन सञ्चालितस्य झर्रोप्रयोगाभियानस्य स्वल्पेनैव कालेनासाफल्यम् । तथाकथिता झर्रोप्रयोक्तार एवाधुनातनेषु स्वलेखेषु सप्ततिप्रतिशतंसंस्कृतशब्दानुपयुञ्जते, तथापि नेपालीसाहित्यं न संस्कृतसाहित्यमूलकमितिजल्पनं विचारमौढ्यादपरं न किञ्चित् । किं बहुना, नेपालीसाहित्यमित्येष शब्द एव संस्कृतशब्दः। नेपालीसाहित्यविधासु कविता-काव्य-महाकाव्यरूपक-नाटक-कथोपन्यासादयो यावन्तः शब्दाः प्रचलन्ति ते सर्वे एव संस्कृतशब्दाः । संस्कृतभाषाद्वेषिणोऽपि विद्वांसः संस्कृतस्य साहाय्यंविना न किमपि प्रवक्तुं ग्रन्थितुं वा पारयन्ते । अयमेवसंस्कृतस्य महिमा गरिमा च यद् द्विषतोऽपि पदे पदे साहाय्यं करोति । मातुः स्वभाव एवैषः । सत्यमुक्तं भगवता श्री शङ्कराचार्येण-"नहि माता समुपेक्षते सुत"मिति । त्यजामोऽधुना नेपालीसाहित्यस्य वार्तामु, नेपालाभाषैव संस्कृतशब्दापूरिता । एतस्यां स्थितावपि नेपालीसाहित्यपरम्परा न संस्कृतसाहित्यपरम्परामूलेति कथनमज्ञानमूलकम्, ज्ञानेऽपि वाऽपलापोद्देश्यकम्, द्रोहमात्रहेतुकं वेति प्रतिपत्तुं शक्नुवन्ति विज्ञाः । ज्ञानलवदुर्विदग्धाः, अकारणमत्सरिणश्च यद्वा तद्वा कथयन्तु नाम; नेपालीसाहित्यं संस्कृतसाहित्यपरम्परात एव विकसितं, विकसच्चास्ते इत्येव परमार्थः । देवकोटामहोदयेनास्मिन् विकासक्रमे सुलोचनामहाकाव्यविरचनेन नेपालीसाहित्ये विकसन्त्यां महाकाव्यपरम्परायामभीष्टा क्रान्तिरानीता; युगचेतनावद्भिर्महाकाव्ये केवलमादर्शप्रदर्शनमननुसृत्य समाजे दृश्यमानं प्रियमप्रियं वा सत्यं प्रदर्शनीयमिति सन्देशो दत्तः । इयं प्रवृत्तिः प्राचीनतायामन्धश्रद्धालुभ्यो न रोचेतापीति शङ्कते महाकविः सुलोचनाभूमिकायाम् ।

देवकोटामहोदये यावती प्रतिभा तावती शक्तिः, यावती च शक्तिस्तावती एव विनीतिः । स स्थाने विरोधिनः प्रहरति न कटूक्त्या, अपितु हास्येन, विनयप्रदर्शनेन । "अत्राहं पद्यमयोपन्यासकारः संवृत्तः स्याम् । उपन्यासस्य पद्यमयत्वमपि नेपालीसाहित्येऽपूर्वत्वात् चमत्कारमेवावहेते'ति शास्त्रीयां रीतिमनुसृत्य प्रवद्धे शाकुन्तले नवीनतोपासकैरधराः परावर्तिताः तामननुसृत्य निबद्धे सुलोचना महाकाव्ये प्राचीनताभक्ता नासिकामाकुञ्चयेयुः । सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता । यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः" ॥ इति सत्यमुक्तं महाकविना भवभूतिना । अरोचकिनः मत्सरिणश्चालोचकानगणयित्वाग्रे सरन्त्यो युगप्रतिभा युगानुकूलाभी रचनाभिर्युगं परिवर्तयन्ति । सर्वत्रेतिहासे इदमेव दृश्यते–निन्दकानामगतिर्निर्मातॄणां प्रगतिः देवकोटामहो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयेन सुलोचनाप्रबन्धे युगानुरूपं वस्तूपनिबध्य महाकाव्यपरम्परायां वाञ्छिता क्रान्तिरानीता, प्रगतिर्विहिता ।

सुलोचनामहाकाव्ये परम्परागतमहाकाव्यस्य रचनासम्बन्धीनि कानिचित्, वर्णनासम्बन्धीनि बहूनि लक्षणानि सङ्गच्छन्ते, वस्तुसम्बन्धि तु नैकमपि लक्षणं समन्वेति । महाकाव्यस्य वस्तुसम्बन्धिषु नियमेषु कथाया ऐतिहासिक-पौराणिक-लौकिकान्यतमत्वं, शृङ्गारवीरशान्तेषु कस्यचन रसस्य प्राधान्यं नायकस्य धीरोदात्तत्वकुलीनत्वादीनि प्राधान्येनाऽपेक्ष्यन्ते ।। नायकस्य विजयेनाभ्युदयेन च महाकाव्यमुपसंहरणीयमिति परम्परागता मान्यता । महाकाव्येऽसत्यस्यान्यायस्य च दमनं प्रदर्शनीयमिति प्राचीनानामभिप्रेतम् । सुलोचनामहाकाव्यं नैतान् नियमाननुसरति । अत्र कथा कविना कल्पिता, कस्यचन रसस्य शास्त्रीयरीत्या परिपाकः कविना न लक्ष्यीकृतः; करुणरसस्य स्वत एव मुख्यरूपेणाऽऽस्वादेऽपि महाकाव्ये तस्य रसस्य प्राधान्येन परिपाको न शास्त्रसम्मतः । अस्य प्रधाननायकोऽनङ्गनाथो ब्राह्मणादसवर्णायां स्त्रियां जातः 'खत्री' सोऽपि विजितो, न विजेता । नायिका सुलोचना विवाहिते पत्यौ न भक्तिमती, नवाऽनुरक्तिमती । पत्यौ तस्या व्यभिचारादर्शनेऽपि अभिचारोऽपलपितुमशक्य एव । सा विवाहात् पूर्वमनङ्गनाथे आबद्धं हृदयं विवाहानन्तरमपि ततः प्रत्यावृत्य पत्यौ विलासिसिहे आसञ्जयितुं न शक्नोति । सामाजिकनियमाननुल्लङ्घयन्ती सुलोचना प्रियतममनङ्गनाथं भगवति श्रीकृष्णे समारोप्य स्वकीयामपरितृप्तां श्रीकृष्णोपासनाद्वारा प्रतीकात्मककामवासनामुन्नयन्ती परोक्षपद्धत्याऽनङ्गनाथमेवोपास्ते । बालविधवाया, वैधव्येऽपि पुरुषसंसर्गेण प्रसूताया विजुलीदेव्यास्तिमिरमर्दनेन सह दाम्पत्यसम्बन्धं प्रदर्श्य बालविधवानां, दुष्टैः प्रतारणपूर्वकमुपभुज्य त्यक्तानाञ्च नारीणां पुनर्विवाहे सम्मतिर्महाकविनाऽभिव्यक्ता । नायकस्य, नायिकायाश्च दुःखं परां काष्ठां प्रापय्य ग्रन्थ उपसंहृतः— सततमुत्पीड्यमानो नायक उन्माद्यति, निरन्तरेणात्याचारेण क्षीणा नायिका प्राणांस्त्यजति ।। एवं महाकाव्यवस्तुनि महतीं क्रान्तिं विहितवान् महाकविः ।

सुलोचनामहाकाव्यकारेण कृता क्रान्तिर्न केवलं क्रान्तिमभिलक्ष्य, न वा परम्परां प्रति विद्रोहमुद्दिश्य । स महाकविः सम्यक् समाजचित्रणमुद्दिश्य महाकाव्ये नाटकीयमुपन्यासीयञ्च वस्तु ग्रन्थितुकामः परम्परागत-नियमामंवादिनमपूर्वं प्रयोगं प्रयुक्तवान् । समाजचित्रणे समाजस्य वस्तुस्थितिर्याथातथ्येन प्रदर्शनीया भवति; कथाचरित्रादिकाः समाजिकयथार्थप्रतिरूपकाः सम्पादनीया भवन्ति । सुलोचनाग्रन्थनकाले नेपालीयसमाजस्य दुरवस्थाऽऽसीत्; प्रगतिशीलविचारशालिनो निर्दोषा नरा नार्यश्च समाजे प्रचलद्भिर्मिथ्यादम्भैः कुरीतिभिश्चाऽनवरतमभिहन्यमाना, अत्याचारेण च निपिष्यमाणा आसन् । समाजस्य संस्कारे, उन्नयने च प्रयस्यतां सच्चरित्राणामसफलता, उन्नतेरवरोधका मिथ्यादम्भाः मिथ्यादाम्भिकानामपि अनिष्टापत्त्या पश्चात्तापः, दुःसमाधेया वैवाहिकी समस्या च सुलोचनामहाकाव्यस्य मुख्या विषयाः । महाकाव्ये एतादृशानि तथ्यानि ग्रथयितुकामः कविर्नवीनं वस्तु प्रायुङ्क्त । पुरातनानां वस्तुविषयाणां नियमानां सर्वथा परिपालने अधुनातनानीदृशानि विषयवस्तूनि अशक्याभिव्यञ्जनानि भवन्ति । परम्पराप्रेमाणोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावकाः सुलोचनां रचनां सुलोचामेव निर्धारयन्ति, एतस्या रचनाया महाकाव्यत्वं समर्थयन्ते। सतृणाभ्यवहारिणो मर्म नाभिजानीयुः, मर्म बुद्ध्वापि दुराग्रहा मत्सरिणः, कुचोद्यं चोदयन्तोऽरोचकिनो मा नाम स्पृहयेयुः सुलोचनामहाकाव्याय। एतेषां दुरालोचनाभिरेतस्य महाकाव्यस्य महत्त्वमीषदपि नापकृष्यते। युगानुकूलां रचनामाकाङ्क्षन्तः पाठकाः एतन्-महाकाव्यं नेपालीयसाहित्ये श्रीलक्ष्मीप्रसादस्यानुत्तमं वरदानमेव निश्चिन्वन्ति। कतिपयलक्षण विसंवादोऽस्य न दूषणम्। लक्षणानि निकषोपलाः, यत्र संघर्षणेन काश्चन रचना उपादेयत्वेन, काश्चन हेयत्वेन च निर्णीयेरन्। लक्ष्याणि समवलोक्य लक्षणानि निर्मीयन्ते। पूर्वजानामर्हणीयानां लक्ष्याणां वैशिष्ट्यान्येव सहृदयानां समालोचनां प्राप्य लक्षणत्वेन परिणमन्ते।

पूर्वरचनानां वैशिष्ट्यद्योतकानि न कस्यचन बन्धनानि। लक्षणकर्तॄणामयमाशयः — पूर्वरचनानां सफलताप्रयोजकानि एतानि लक्षणानि. यदि कश्चन साहित्यिकस्तादृशीं सफलतां कामयते तदा स इमां पद्धतिमनुसरत्विति। अयं नाग्रहो, नवाऽऽदेश; किन्त्वतिदेश; परामर्शः प्रथमकल्पिका आभ्यासिका अनुकुर्वन्तु, अनुसरन्तु समुचितमेव; प्रतिभावन्तः प्रयोगविधया लक्षणविसंवाद्यप्यपूर्वं वस्तु सृजन्तु, न कश्चन प्रतिबन्धः; सारगर्भाणामुत्कृष्टानां स्वागतमेव भवति। परम्पराया वास्तवोऽभिप्रायोऽयमेव। परम्परायामनेके प्रयोगा उपयोगाश्चानवरतं भवन्ति। काले काले प्रयुक्तानाञ्च प्रयोगोपयोगादीनां चिरादविरतं प्रवहमानः प्रवाह एव, अविच्छिन्नोऽतिदीर्घः क्रम एव परम्परा। नूतनानां प्रयोगाणामात्मसादकरणे परम्पराया अस्तित्वमेव लुप्यते। झरीणां समये समये पात एव सरितः सागरांश्च धारयति, पूरयति विस्तारयति च शिखरिणीनां क्षुद्रस्रोतसामपसारणे स्रोतस्विनीनां, स्रोतस्विनीनामप्रवेशने तरङ्गिणीनां, तरङ्गिणीनां सङ्गमविघाते महानदीनां, महानदीनामसमवाये महतां सागराणामस्तित्वमेव न भवेत्। महतां सागराणामस्तित्वे, पूरितत्वे च एकैकस्य जलबिन्दोः पातः प्रयोजकः; एवमेव परम्परायाः आयतत्वे, विशालत्वे चैकैकस्य सफलप्रयोगस्य प्रयोजकता, वाञ्छनीयता भवति।

सुलोचना महाकाव्यं परम्परायां नवीनः प्रयोगः। एतस्य विशेषताभिर्भावकाः प्रभाविताः। अतः परं नेपालीमहाकाव्यस्य लक्षणं सुलोचनामहाकाव्यस्य वैशिष्ट्यमपि समावेश्य प्रवक्तव्यं भवति। सुलोचनामहाकाव्यस्येव वस्तु समुपादाय ग्रथितस्य 'चिसो चूल्हो महाकाव्यस्य समालोचक-संमता सफलता सुलोचनामहाकाव्यस्य परम्परायां नवीनताधानेन युगप्रवर्तकत्वं साधयति। प्रचलितपरम्परायाः परिपालने, परम्परायां नवीनताधानेन युगप्रवर्तने च अद्य पर्यन्तं सफलो महाकवि. श्रीलक्ष्मीप्रसाददेवकोटामहोदय एव नान्य इत्यत्र इतिहासः साक्षी, प्रमाणञ्च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. शिवराज आचार्य

उपनिषद्को दर्शन यसै जीवनको दर्शन हो

वेदान्त-दर्शन, अद्वैतदर्शन, जनकको दर्शन, वसिष्ठको दर्शन, गीतादर्शन, ब्रह्मवाद आदि नामले प्रसिद्ध भएको यो उपनिषदको दर्शन हाम्रो यस जीवनसित सम्बन्ध नराखेर खालि परलोकको मात्र कुरा गर्ने दर्शन हैन । यो दर्शनको विषय हो यही हाम्रो जीवन । तेस कारणले यो दर्शनमा हाम्रो आफ्नो अनुभव ठूलो प्रमाण मानिन्छ । अरु कतिपय शास्त्रहरुमा झैं यहाँ वेद मात्र प्रमाण हो भन्ने जरूरत छैन । यहाँ वेद आदि र अनुभव आदि दुवै थरि प्रमाण मानिन्छन्[१] । तर हाम्रा कति अनुभवहरु भ्रान्त भएका पनि हामि पाउँछौ । तेस कारणले हाम्रो अनुभव वेद अनुसारको हुनुपर्छ भन्ने मात्र कुरा हो । तेसै कारणले उपनिषद पनि शास्त्रले जेजे भन्दछ त्यो त्यो मान्दा मात्र आतमा चिनिन्छ नभनेर 'परमात्माले कान आदि इन्द्रियलाइ वाहिर फर्काइदिएर मारेका छन्, तेस कारणले ज्ञान गर्नेले आत्मादेखि भिन्न बाहिरका विषयमात्र जान्दछ, आफ्नो नित्यता बुझ्न खोज्ने कोही विवेकी मानिस आफ्नो इन्द्रियलाइ आत्मापट्टि अर्थात् आँफूपट्टि फर्काएर भित्री आत्मालाइ चिन्दछ'[२] भनेर भन्छ । अर्थात् मानिसलाइ आफ्नो जीवनको मूल तत्त्व जान्न आफ्नै चिन्तनले धेरै मद्दत गर्छ । यही हाम्रो जीवनको मूल तत्वको यथार्थ अनुभव गर्नु नै यो दर्शनको विषय हो । तेस कारणले यो दर्शनको विषय कुनै कल्पित वा अनुभव गर्न नसकिने वा जीवनदेखि बिलकूल भिन्न कुरो हैन । हाम्रो शरीरमा पनि रहेको यही आत्माको अध्ययन गर्ने भएकाले नै यो शास्त्रलाई "शारीरकमीमांसा" पनि भनिन्छ[३] । शारीरक भनेको शरीरमा रहने आत्मा हो, मीमांसा भनेको विचार हो । अव शारीरकमीमांसा भनेको 'आत्माको विचार' हुन आउँछ । तसर्थ हामी जीवनका अरु साना साना समस्याको समाधान गर्ने प्रयत्न गर्न अरु साना साना पक्षहरुको विचार गर्ने शास्त्रहरु त पढ्छौं भने जीवनको रहस्य खुलाउन प्रयत्न गर्दै जीवनको मूल तत्त्वको विषयमा विचार गर्ने यस दर्शनको हामीले राम्ररी अध्ययन गर्नु पर्छ । यसबाट जीवनका सबै किसिमका समस्याहरुको समाधान गर्नमा महत्त्वपूर्ण मद्दत मिल्न सक्दछ ।

सांसारिक जीवन कसैको पनि पूर्ण हुँदैन । धेरै कमजोरीहरु त्यसमा हुन्छन् । मानिस सँधैं एकथरि न एकथरि दुःख भोगिरहन्छ । तथापि म पूर्णतामा पुग्न सक्छु भन्ने चेतना सम्म पनि नहुनाले मानिस केही बाटो नपाएर निराश जीवन बिताइरहेको हुन्छ, दुःख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोगिरहेको हुन्छ । कति ती अपूर्णताहरुलाइ साधारण चलतीका उपायले हटाउन खोज्दछन्, तर आखीरमा सफलता मिल्दैन । अनि मानिसहरु अलमलिइरहेका हुन्छन् । यस्ता मानिसहरुलाइ तिमी पूर्णतामा पुग्न सक्दछौ, तिम्रा सम्पूर्ण इच्छा पूर्ण हुन सक्छन्, तिमी आनन्दको सागरमा डुब्न सक्छौ, आऊ यो बाटो हिंड भनेर उपनिषद् भन्छ[4] । उपनिषद्को यो सन्देश जुनवेला त्रिवर्णमा साङ्ग वेद अनिवार्य रूपले पढ्ने चलन थियो त्यो वेला धेरैजसो मानिसहरुमा पुग्थ्यो । तर अहिले यो सन्देश नै नपाउने मानिसहरु धेरै भए जस्ता बुझिन्छन् । तसर्थ उपनिषद्को त्यो सन्देश लोकभाषाका माध्यमले यो भाषा बुझ्ने सबैमा पुऱ्याउने यो लेखको मुख्य लक्ष्य हो । यसरी उपनिषद्को त्यो सन्देश पाए पछि जसका मनमा यो रहस्यमय जीवनका विषयमा केही जान्न अनन्त उत्कण्ठा हुन्छ, जो यस जीवनका अपूर्णताबाट छुटकारा पाएर पूर्णतामा पुग्न अत्यन्त उत्सुक हुन्छ उ उपनिषद्ले देखाएको बाटो समात्न तत्पर हुन्छ, उसलाई सबैभन्दा बढी चाख यही बाटामा हुन्छ । यो बाटो छाडेर यसको बदला उ अरुथोक केहीं लिन चाँहँदैन ।

वेदान्त हामीलाई आत्मा यही हो यस्तै हुन्छ भनेर साक्षात् देखाउँदैन । अनेक उपलक्षणहरुद्वारा चिनाउन बल गर्दै खालि यसरी विचार गर्दै जाऊ आत्माको यथार्थ अनुभव तिमीलाई हुन्छ भनेर विचार गर्दै जाने बाटो मात्र देखाउँछ ।

बाटो देखाउँदा उपनिषद् भन्छ—दृश्य (देखिने) र ज्ञेय (जान्न सकिने) पदार्थ जति छन् तिनको परीक्षा गर अर्थात् ती सँधै रहने हुन् कि आउनेजाने हुन् चिन, अनि तिमी ती सप्पै बाह्य वस्तुहरु आउनेजाने रहेछन् भन्ने सिद्धान्तमा पुग्नेछौ, ती वस्तुहरु आउनेजाने रहेछन् भन्ने थाह पाएपछि र तिमी दिगो सुख पाउन सक्छौ भन्ने (उपनिषद्को) कुराले लोभ्याएपछि ती आउने वस्तुमा तिमी सारै लम्पट हुने छैनौ, तिमी सबै काम हल्का-रूपले कर्तव्यबुद्धिले गर्नेछौ, फलमा तिमी हिरिक्क हुनेछैनौ । उपनिषद्ले भने बमोजिम नभएर कहिलेकाँहि पहिल्यै परेको बानीले गर्दा मानिसको मन बाह्य विषयमानै लम्पट हुन खोज्छ, त्यस वेला मानिसले विवेकबाट काम लिनु पर्छ । जुन विषयमा मन लम्पट हुन खोज्छ त्यस विषयको जाँच गर्न थालिहाल्नुपर्छ । परीक्षा गरेपछि थाह हुन्छ कि त्यो विषय अनित्य हो र त्यसमा धेरै दोषहरु छन् । यस्तो ज्ञान भएपछि मानिसको मन त्यस विषयमा सारै लम्पट हुँदैन । यसरी कुनै विषयमा पनि लम्पट नभएपछि मानिसको विवेक गर्ने शक्ति धेरै बढ्छ । अनि उसलाई धेरै शान्ति मिल्न थाल्छ र विवेक गर्नेवाला सधैं रहने कहिल्यै न बिग्रने, सुखरूप र सारै नै ठूलो र पूर्ण रहेछ भन्ने पनि मानिसले बुझ्दै आउँछ । अनि उसको सबैथोक सिद्ध हुँदै आउँछ ।

यो दर्शन सप्पै मानिसले अँगाल्न सकिने दर्शन हो । यसमा वर्ण र आश्रम आदि धर्मको बार छैन । माथि लेखिएको किसिमले उपनिषद्ले देखाएको बाटोमा सबैलाई चाख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाग्न गारो छ, किनभने यस लौकिक जीवनको अपूर्णताको नै सबैलाई चेतना हुँदैन, चाख नागे छि चाहिं यज्ञ यागादि नगरेका र गर्न नसक्नैले पनि यो बाटो समात्न सकिंदैन कि भनेर डराउनु पर्दैन, किनभने यज्ञादि सारै नै बाहिरी साधन हुन्[6], ती भन्दा भित्री साधन शमादि भए पछि यज्ञादि गर्न नसक्नाले पछि हट्न पर्दैन। यस बाटामा गहीरो चाख लगेपछि मन तथा इन्द्रियहरू पनि जथाभावी चल्दैनन्, सहनशीलता कर्तव्य-परायणता आदि सच्चरित्रहरु स्वत: आउँछन्। अनि त्यो बाटो समात्न गारो पर्दैन। अनाश्रमी-हरु पनि यो दर्शन अँगाल्न सक्छन् भन्ने कुरा श्रुति, सूत्र र भाष्यबाट पनि स्पष्टै बुझिन्छ[7]।

यस दर्शनको समाजको निमित्त पनि ठूलो उपयोगिता छ। सच्चा समाजसेवी, सच्चा नेता, आदर्श नागरिक आदि समाजका हित अत्यन्त आवश्यक व्यक्तिहरु तयार गर्नमा यस दर्शनले ठूलो भाग लिन सक्छ। मनुले पनि यहा दर्शन अँगालेको मानिस सम्पूर्ण लोकको अधिपति हुन समेत योग्य हुन्छ भनेका छन्[8]। यस दर्शनको अध्ययनबाट मानिसमा उदाउने व्यापक र उदार तथा लोककल्याण गर्ने दृष्टिकोणलाइ ध्यानमा राखेर नै मनुले तेसो भनेका हुन्। तसर्थ हामी अलिकति विवेकबाट काम लियौं र यो उपनिषद्ले देखाएको बाटो समातौं, यसबाट व्यक्ति, समाज तथा सारा संसारको कल्याण हुन सक्छ ॥

१. न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायां किन्तु श्रुत्यादयोऽनुभवादयश्च यथासम्भवमिह प्रमाणम्, अनुभवावसानत्वात् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य। —शारीरकमीमांसाभाष्य, १।१।२॥
२. पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ —कठोपनिषद्, २।१।१॥
३. यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः। —शारीरकमीमांसाभाष्य, उपोद्घात।
४. य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच। – छान्दोग्योपनिषद्, ८।७.१॥
५. परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। –मुण्डकोपनिषद्, १।२।१२॥
६. तत्राप्येवंविदिति विद्यासंयोगात्प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यम् —शारीरकमीमांसाभाष्य, ३।४।२७॥
७. अन्तरा चापि तु अनाश्रमित्वेन वर्तमानोऽपि विद्यायामधिक्रियते। कुतः तद्दृष्टेः रैक्ववाचक्नवीप्रभृतीनामेवंभूतानामपि ब्रह्मवित्त्वश्रुत्युपलब्धेः। — शारीरकमीमांसाभाष्य ३।४।३६॥
८. सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च।
सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति ॥ —मनुस्मृति, १२। १००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा. दुर्गाप्रसाद दवाडी

धर्ममा प्रमाण के ?

श्रीहरि:

"अथातो धर्मजिज्ञासा" (मीमांसादर्शन १।१।१) धर्मका के प्रमाण छ? यस सम्बन्धमा विचार गर्नु भन्दा पूर्व धर्म के हो, यो जान्नु आवश्यक छ। आंग्लभाषामा धर्मका निमित्त शब्द छ, Religion त्यस शब्दको कोशमा जो अर्थ दिइएको छ, त्यो यस प्रकार छ - Recognition of god and duty towards him. ईश्वरलाई मान्नु [ईश्वरको स्वीकृति] र त्यसको प्रति कर्तव्य, Obedience and service to god, ईश्वरको आज्ञापालन र सेवा, Prevalent system of faith and worship. विश्वास र पूजाको प्रबल पद्धति, Prevalent = Powerful शक्तियुक्त, Practice of sacred rites. पवित्र धार्मिक उत्सवको अभ्यास, Rites = Religious ceremony, Religious observance धार्मिक उत्सव, धार्मिक निरीक्षण, आदि दिइएको छ। यसरी पाश्चात्य दृष्टिकोणका अनुसार धर्म भन्ने वित्तिकै ईश्वर साक्षात् अथवा परम्परया त्यस भित्र पर्छ। यो पाश्चात्य दृष्टिकोणानुसार धर्मको अर्थ अर्थात् परिभाषा हो।

हामी स्वमतानुसार पनि धर्मको लक्षण गरौं। "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" (वैशेषिकसूत्र १-१-२) जसबाट लौकिक र पारमार्थिक सिद्धि प्राप्त हुन्छ त्यो धर्म हो। "चोदनालक्षणोऽर्थो धर्मः" [मीमांसादर्शन १।१।२] वेदमा जसको प्रेरणा गरिएको छ त्यो धर्म हो। वेदको अर्थ ईश्वरीय या उत्कृष्टतम ज्ञान हो: वेद ज्ञानका आदि-स्रोत हुन्, यो सिद्ध भै सकेको छ। उपनिषद्हरू पनि वेदै हुन् र यिनको महत्ता शोपेनहर जस्ता पाश्चात्यहरूमा महत्तम मानिएका दार्शनिकले पनि स्वीकार गरेकै छन्।

मनुका अनुसार–

